

# GRAMMATICAL ANALYSIS OF

# SRIMAD BAGAVAD GITA

(Padacheda, Padaparichaya, Padartha, Anvaya, Thathparyam and Grammatical portions for all the Shlokas)

Part 2 - Chapters : 7 To 12

# GRAMMATICAL ANALYSIS
# OF
# SRIMAD BAGAVAD GITA

## CHAPTERS 7 - 12

Prepared By

Brahmachari Saravanan

(Gurusevak of Pujyasri Omkarananda Mahaswamiji)



**Jagadguru Sri Sri Sri Bharati Tirtha Mahasannidhanam**
**Jagadguru Sri Sri Sri Vidhushekara Bharati Sannidhanam**

भारतीकरुणापात्रं भारती पदभूषणम् ।
भारती पदमारुढं भारतीतीर्थमाश्रये ।।
विद्याविनयसम्पन्नं वीतरागं विवेकिनम् ।
वन्दे वेदान्ततत्त्वज्ञं विधुशेखरभारतीम् ।।



**Pujyasri Omkarananda Saraswati Mahaswamiji**

वेदवेदान्तशास्त्रज्ञं धर्मरक्षणनायकम् ।
चिद्भवानन्दशिष्यं तं परं सन्मार्गदर्शिनम् ।।
अपारकरुणापात्रम् वेदपुरीनिवासिनम् ।
आत्मविद्यागुरुं वन्दे ओङ्कारानन्दसद्गुरुम् ।।

# Preface

Ānandam - is the one common goal that every living being in the world pursues. Among all living beings, only humans have the unique ability to choose the source of their Ānandam. For other creatures, which lack this capacity to choose, Ānandam simply means survival without pain. Human pursuits, however, are classified broadly into Dharma, Artha, Kāma, and Mokṣa. Among these, the scriptures declare Mokṣa as the supreme goal, for Mokṣa alone is permanent, while all other goals are inherently transient and temporary.

As Lord Krishna says in the *Bhagavad Gītā* chapter 15:
"यत् गत्वा न निवर्तन्ते ।"—"*having reached that state, there is no return*".

Our scriptures teach that Mokṣa is "*Owning up to one's own nature as Brahman*":
"अहं ब्रह्मास्मि।" ("*I am Brahman*").

Sureśvarācārya, in his *Mānasollāsa*, beautifully states:

आत्मलाभात् परो लाभो नास्तीति मुनयो विदुः ।
तल्लाभार्थं कविः स्तौति स्वात्मानं परमेश्वरम् ॥

*"Sages say that there is no greater gain than gain of Ātman. With a view to this gain, the sage adores his own Self as Parameśvara."*

To realize our true nature as Brahman, it is necessary first to learn about Brahman. The Veda-s—specifically the end portion called Vedanta (the Upaniṣad-s)—are considered the primary source of this knowledge.

Vyasa Bhagavān states in the *Brahma Sutra*:
शास्त्रयोनित्वात् ।
"*Because Scriptures are the source (of the knowledge of Brahman).*"

Though the Upaniṣad-s speak clearly about Brahman, their subtle teachings can appear difficult to grasp. As Swami Chinmayananda says, "*the Upaniṣad-s are a tough nut to crack.*" Out of compassion, the Lord Himself presented this same truth in the form of the Bhagavad Gītā, making it accessible to all.

As one of the Gītā dhyāna śloka-s says:

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

Downloaded from www.omkaravidya.com

*“All the Upaniṣad-s are the cows, the milker is Kṛṣṇa (the son of Nanda), Arjuna is the calf, the people of purified intellect are the drinkers, and the milk is the great nectar of the Gita.”*

For a calf, the best food—and the food it can consume—is cow's milk. Though the verse specifies Arjuna as the calf, we too can consider ourselves calves, eager to drink the milk of the Bhagavad Gītā.

A sincere sādhaka does not merely study the Bhagavad Gītā casually, but strives to understand each śloka by carefully examining every word, and discerning how each word is connected. Such an approach enables one to remember the śloka-s along with their meaning more easily. This work undertakes the task of breaking down each śloka into its component words and arranging them in proper sequence to provide clear meaning—an approach termed अन्वयः (anvaya) in Saṃskṛtam.

At the outset, I offer this work at the feet of the Lord, without whose grace none of this would be possible.

My prostrations at the Lotus feet of the Sringeri Ubhaya Jagadgurus **Śrī Śrī Śrī Bharatī Tirtha Mahāsannidhānam** and **Śrī Śrī Śrī Vidhuśekhara Bhāratī Sannidhānam** by whose blessings I had the fortune to complete this work.

My prostrations to **Pujyaśrī Omkārānanda Saraswati Mahāswamīji,** who has been the guiding light for this endeavor. Swāmiji was delighted to see this work completed and blessed that it may reach all sincere seekers.

My prostrations to **Swāmini Brahmaleenānanda Saraswati,** from whom I had the privilege of learning the Bhagavad Gītā.

My prostrations to **Śrīmatī Dr. Umamaheswari,** who taught me Saṃskṛtam.

My sincere thanks to **Śrīmatī. Sudha Srinivaas**, who worked with me to validate and proofread this work to make it error-free.

May this work serve as a humble offering and a small aid for all sincere seekers of truth.

With pranāms,
**Brahmacārī Saravaṇan**

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता
# सप्तमोऽध्यायः
# ज्ञानविज्ञानयोगः

Downloaded from www.omkaravidya.com

मूलश्लोकः

श्री भगवानुवाच
मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १॥

पदच्छेदः
मयि आसक्तमनाः पार्थ योगं युञ्जन् मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि तत् श्रृणु

पदपरिचयः
मयि - दकार त्रि स एक
आसक्तमनाः - सकार पु प्र एक
पार्थ - अकार पु सं प्र
योगं - अकार पु द्वि एक
युञ्जन् - तकार पु प्र एक
मदाश्रयः - अकार पु प्र एक
असंशयं - अकार पु द्वि एक
समग्रं - अकार पु द्वि एक
मां - दकार त्रि द्वि एक
यथा - अव्ययम्
ज्ञास्यसि - लृट् मपु एक
तत् - दकार नपु द्वि एक
श्रृणु - लोट् मपु एक

पदार्थः

Downloaded from www.omkaravidya.com

मयि - परमेश्वरे

आसक्तमनाः - मग्नमनाः

पार्थ - अर्जुन

योगं - योगम्

युञ्जन् - समाधानं कुर्वन्

मदाश्रयः - मामेव अवलम्भमानः

असंशयं - असंशयं

समग्रं - समस्तम्

मां - माम्

यथा - यथा

ज्ञास्यसि - अवगमिष्यसि

तत् - तत्

श्रृणु - आकर्ण्य

अन्वयः

हे पार्थ! मयि आसक्तमनाः मदाश्रयः (सन्) योगं युञ्चन् यथा माम् ज्ञास्यसि असंशयं समग्रं तत् श्रृणु ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये प्रथमः श्लोकः । भगवान् श्रीकृष्णः *हे पार्थ ! परमेश्वरे आसक्तमनाः योगं कुर्वन् अहमेव परमेश्वरः इति आश्रयः सन् समग्रं मां येनप्रकारेण ज्ञास्यसि तत् आकर्ण्य ! ।* एवम् अवदत् ।

व्याकरणम्

▶सन्धिः

मयि + असक्तमनाः - यण्सन्धिः

Downloaded from www.omkaravidya.com

तत् + श्रृणु - श्चुत्वसन्धिः छत्वसन्धिः

▶समासः
आसक्तं मनः यस्य सः आसक्तमनाः - समानाधिकरणबहुव्रीहिसमासः
न संशयम् - असंशयम् - नञ्तत्पुरुषः
अहम् आश्रयः यस्य सः मदाश्रयः - समानाधिकरणबहुव्रीहिसमासः

## श्रीमद्भगवद्गीता - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥ ७.२॥

पदच्छेदः
ज्ञानं ते अहम् सविज्ञानम् इदं वक्ष्यामि अशेषतः यत् ज्ञात्वा न इह भूयः अन्यत् ज्ञातव्यम् अवशिष्यते

पदपरिचयः
ज्ञानं - अकार नपु द्वि एक
ते - दकार त्रि च एक
अहम् - दकार त्रि प्र एक
सविज्ञानम् - अकार नपु द्वि एक
इदं - मकार नपु द्वि एक
वक्ष्यामि - लृट् उपु एक
अशेषतः - अव्ययम्

Downloaded from www.omkaravidya.com

यत् - दकार नपु द्वि एक
ज्ञात्वा - क्त्वान्तम्
न - अव्ययम्
इह अव्ययम्
भूयः अव्ययम्
अन्यत् - तकार नपु प्र एक
ज्ञातव्यम् - तव्यत् अन्तम्
अवशिष्यते - लट् प्रपु एक

पदार्थः
ज्ञानं - ज्ञानम्
ते - तुभ्यम्
अहम् - अहम्
सविज्ञानम् - विज्ञानसहितम्
इदं - इदम्
वक्ष्यामि - कथयिष्यामि
अशेषतः - समस्तम्
यत् - यत्
ज्ञात्वा - विदित्वा
न - न
इह - अत्र
भूयः - पुनः
अन्यत् - अन्यत्
ज्ञातव्यम् – बोद्धव्यम्
अवशिष्यते - अवशेषः भवति

अन्वयः
यत् ज्ञात्वा इह भूयः अन्यत् ज्ञातव्यम् न अवशिष्यते अहम् इदं ज्ञानं सविज्ञानम् अशेषतः ते वक्ष्यामि ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये द्वितीयः  श्लोकः । भगवान् श्रीकृष्णः "यत् ज्ञानं ज्ञात्वा मोक्षमार्गे पुनः अन्यत् ज्ञातव्यम् न अवशिष्यते तत् विज्ञानसहितम् इदं ज्ञानम्  अशेषतः अहं तुभ्यं कथयिष्यामि ।" एवम अवदत् ।

व्याकरणम्

▶सन्धिः

ते + अहम्  - पूर्वरूपसन्धिः

वक्ष्यामि + अशेषतः - यण्सन्धिः

यत् + ज्ञात्वा - श्चुत्वसन्धिः

न + इह - गुणसन्धिः

भूयः + अन्यत् - विसर्गउकारः पूर्वरूपसन्धिः

अन्यत् + ज्ञातव्यम् - श्चुत्वसन्धिः

▶कृदन्ताः

अशेषतः - आ + शिष्+ तसिल् प्रत्ययः

ज्ञात्वा - ज्ञा + क्त्वा प्रत्ययः

ज्ञातव्यम् - ज्ञा + तव्यत् प्रत्ययः

श्रीमद्भगवद्गीता  - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ७.३ ॥

पदच्छेदः

Downloaded from www.omkaravidya.com

मनुष्याणां सहस्रेषु कश्चित् यतति सिद्धये यतताम् अपि सिद्धानां कश्चित्
मां वेत्ति तत्त्वतः

पदपरिचयः
मनुष्याणां - अकार पु ष बहु
सहस्रेषु - अकार पु स बहु
कश्चित् - अव्ययम्
यतति - लट् प्रपु एक
सिद्धये - इकार स्त्री च एक
यतताम् - तकार पु ष बहु
अपि - अव्ययम्
सिद्धानां - अकार पु ष बहु
कश्चित् - अव्ययम्
मां दकार त्रिषु द्वि एक
वेत्ति - लट् प्रपु एक
तत्त्वतः - अव्ययम्

पदार्थः
मनुष्याणां - नराणाम्
सहस्रेषु - अनेकेषु
कश्चित् - कश्चित्
यतति - प्रयत्नं करोति
सिद्धये - सिद्ध्यर्थम्
यतताम् - प्रयत्नं कुर्वताम्
अपि - अपि
सिद्धानां - यतताम्
कश्चित् - कश्चित्
मां - माम्

Downloaded from www.omkaravidya.com

वेत्ति - जानाति
तत्त्वत: - तत्त्वत:

अन्वयः
मनुष्याणां सहस्रेषु कश्चित्  सिद्धये यतति । यतताम् अपि सिद्धानां ( सहस्रेषु) कश्चित् मां  तत्त्वत: वेत्ति ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां सप्तमे अध्याये तृतीय: श्लोक: । भगवान् श्रीकृष्ण: "अनेकेषु मनुष्येषु मध्ये कश्चित्  सिद्ध्यर्थं प्रयत्नं करोति । तेषां यतताम् अपि अनेकेषु सिद्धेषु कश्चित् मां  तत्त्वत: वेत्ति ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
कश्चित् + यतति - जश्त्वसन्धि:
कश्चित् + माम् - अनुनासिकासन्धि:

श्रीमद्भगवद्गीता  - सप्तमोऽध्याय: - ज्ञानविज्ञानयोग:

मूलश्लोक:

भूमिरापोऽनलो वायु: खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ७.४॥

पदच्छेदः
भूमि: आप: अनल: वायु: खं मन: बुद्धि: एव च अहङ्कार: इति इयं मे भिन्ना प्रकृति: अष्टधा

Downloaded from www.omkaravidya.com

पदपरिचयः
भूमिः - इकार स्त्री प्र एक
आपः - पकार स्त्री नित्यं  बहुवचनान्तः
अनलः - अकार पु प्र एक
वायुः  - उकार पु प्र एक
खं - अकार नपु प्र एक
मनः - सकार नपु प्र एक
बुद्धिः - इकार स्त्री प्र एक
एव  - अव्ययम्
च  - अव्ययम्
अहङ्कारः - अकार पु प्र एक
इति  - अव्ययम्
इयं - मकार स्त्री प्र एक
मे - दकार त्रि ष एक
भिन्ना - आकार स्त्री प्र एक
प्रकृतिः इकार स्त्री प्र एक
अष्टधा - अव्ययम्

पदार्थः
भूमिः - पृथिवी
आपः - जलम्
अनलः - अग्निः
वायुः - मरुत्
खं - आकाशः
मनः - अन्तःकरणम्
बुद्धिः - मतिः
एव - एव

Downloaded from www.omkaravidya.com

च - च
अहङ्कारः - अहङ्कारः
इति - एवम्
इयं - एषा
मे - मम
भिन्ना - छिन्ना
प्रकृतिः - प्रकृतिः
अष्टधा - अष्टभिः प्रकारैः

अन्वयः
भूमिः आपः अनलः वायुः खं मनः बुद्धिः अहङ्कारः इति इयं मे प्रकृतिः अष्टधा भिन्ना ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये चतुर्थः श्लोकः । भगवान् श्रीकृष्णः "पृथिवी आपः अनलः वायुः खं मनः बुद्धिः अहङ्कारः इति यथोक्ता इयं प्रकृतिः मम मायाशक्तिः अष्टभिः प्रकारैः भिन्ना ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
भूमिः + आपः - विसर्गरेफः
आपः + अनलः - विसर्गउकारः पूर्वरूपसन्धिः
अनलः + वायुः-विसर्गउकारः
मनः + बुद्धिः -विसर्गउकारः
बुद्धिः + एव - विसर्गरेफः
अहङ्कारः + इति - विसर्गलोपः
इति + इयं - सवर्णदीर्घसन्धिः
प्रकृतिः + अष्टधा - विसर्गरेफः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता  - सप्तमोऽध्याय: - ज्ञानविज्ञानयोग:

मूलश्लोक:

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥७.५॥

पदच्छेदः
अपरा इयम् इत: तु अन्यां प्रकृतिं विद्धि मे पराम् जीवभूतां महाबाहो यया इदं धार्यते जगत्

पदपरिचय:
अपरा - आकार स्त्री प्र एक
इयम् - मकार स्त्री प्र एक
इत: - अव्ययम्
तु - अव्ययम्
अन्यां -- आकार स्त्री द्वि एक
प्रकृतिं - इकार स्त्री द्वि एक
विद्धि - लोट् मपु एक
मे - दकार त्रिषु ष एक
पराम् - आकार स्त्री द्वि एक
जीवभूतां - आकार स्त्री द्वि एक
महाबाहो - उकार पु सं प्र
यया - दकार स्त्री तृ एक
इदं -मकार नपु  प्र एक
धार्यते - धृ + णिच् + कर्मणि प्रपु एक
जगत् - तकार नपु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
अपरा - निकृष्टा
इयम् - असौ
इतः - इतः
तु - तु
अन्यां - अन्याम्
प्रकृतिं - शक्तिम्
विद्धि - जानीहि
मे - मम
पराम् - प्रकृष्टाम्
जीवभूतां - प्राणधारिणीम्
महाबाहो - अर्जुन
यया - यया
इदं - एतत्
धार्यते - भार्यते
जगत् - भुवनम्

अन्वयः
हे महाबोहो ! इयम् (प्रकृतिः) अपरा । तु इतः अन्यां मे परां प्रकृतिं जीवभूतां विद्धि यया इदं जगत् धार्यते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये पञ्चमः श्लोकः । भगवान् श्रीकृष्णः "हे महाबाहो ! इयम् अष्टधा भिन्ना प्रकृतिः अनर्थकरी संसारबन्धनात्मिका । इता अस्याः यथोक्तायाः तु अन्यां यथा इदं जगत् धार्यते तां जीवभूतां मम आत्मभूताम् परां प्रकृष्टां प्रकृतिं इति विद्धि ।" एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

अपरा + इयम्व - गुणसन्धिः

इतः + तु - विसर्गसकारः

तु + अन्याम् - यण्सन्धिः

यया + इदम् - गुणसन्धिः

▶समासः

अपरा - न परा - नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ७.६॥

पदच्छेदः

एतद्योनीनि भूतानि सर्वाणि इति उपधारय अहं कृत्स्नस्य जगतः प्रभवः प्रलयः तथा

पदपरिचयः

एतद्योनीनि - इकार नपु प्र बहु

भूतानि - अकार नपु प्र बहु

सर्वाणि - अकार नपु प्र बहु

इति - अव्ययम्

उपधारय - लोट् मपु एक

Downloaded from www.omkaravidya.com

अहं - दकार त्रि प्र एक
कृत्स्नस्य - अकार नपु ष एक
जगतः - तकार नपु ष एक
प्रभवः - अकार पु प्र एक
प्रलयः - अकार पु प्र एक
तथा - अव्ययम्

पदार्थः
एतद्योनीनि -एतद्योनीनि
भूतानि - भूतानि
सर्वाणि - सकलानि
इति - एवम्
उपधारय - जानीहि
अहं - अहम्
कृत्स्नस्य - समस्तस्य
जगतः - लोकस्य
प्रभवः - उत्पत्तिः
प्रलयः - विनाशः
तथा - तथा

अन्वयः
सर्वाणि भूतानि एतद्योनीनि इति उपधारय । तथा अहं (एव) कृत्स्नस्य जगतः प्रभवः प्रलयः च ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये षष्ठः श्लोकः । भगवान् श्रीकृष्णः "सर्वाणि भूतानि एतद्योनीनि इति जानीहि । मम प्रकृती सर्वभूतानां कारणम् ।

Downloaded from www.omkaravidya.com

अतः अहं समस्तस्य जगतः उत्पत्तिः तथा विनाशः च। प्रकृतिद्वयद्वारेण अहं सर्वज्ञः ।" एवम् अवदत् ।

व्याकरणम्

▶सन्धिः

सर्वाणि + इति - सवर्णदीर्घसन्धिः

इति + उपधारय - यण्सन्धिः

प्रलयः + तथा - विसर्गसकारः

▶समासः

एते योनी यस्य तत् एतद्योनि - समानाधिकरणबहुव्रीहिसमासः

## श्रीमद्भगवद्गीता - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥७.७॥

पदच्छेदः

मत्तः परतरं न अन्यत् किञ्चित् अस्ति धनञ्जय मयि सर्वम् इदं प्रोतं सूत्रे मणिगणाः इव

पदपरिचयः

मत्तः - अव्ययम्

परतरं - अकार नपु प्र एक

न- अव्ययम्

Downloaded from www.omkaravidya.com

अन्यत् - तकार नपु प्र एक
किञ्चित् - अव्ययम्
अस्ति - लट् प्रपु एक
धनञ्जय - अकार पु सं प्र
मयि - दकार त्रि स एक
सर्वम् - अकार पु प्र एक
इदं - मकार नपु प्र एक
प्रोतं - अकार नपु प्र एक
सूत्रे - अकार नपु स एक
मणिगणाः - अकार पु प्र बहु
इव - अव्ययम्

पदार्थः
मत्तः - परमेश्वरात्
परतरं - उत्कृष्टतरम्
न - न
अन्यत् - अन्यत्
किञ्चित् - किमपि
अस्ति - विद्यते
धनञ्जय - अर्जुन
मयि परमेश्वरे
सर्वम् - सकलम्
इदं - एतत्
प्रोतं - योजितम्
सूत्रे - तन्तौ
मणिगणाः - मणिसमूहाः
इव - इव

Downloaded from www.omkaravidya.com

अन्वयः
हे धनञ्जय! मत्तः परतरं अन्यत् किञ्चित् नास्ति । सूत्रे मणिगणाः इव मयि सर्वम् इदं प्रोतम् ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये सप्तमः श्लोकः । भगवान् श्रीकृष्णः "हे धनञ्जय! परमेश्वरात् परतरम् अन्यत् किञ्चित् न विद्यते । यथा दीर्घतन्तुषु पटवत् सूत्रे मणिगणाः प्रोताः तथा मयि इदं सर्वं प्रोतम् ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
किञ्चित् + अस्ति - जश्त्वसन्धिः
मणिगणाः + इव - विसर्गलोपः

▶समासः
मणीनां गणः मणिगणः ते मणिगणाः - षष्ठीतत्पुरुषः

▶कृदन्ताः
मत्तः - अस्मद् + तसिल् प्रत्ययः

श्रीमद्भगवद्गीता - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ७.८॥

Downloaded from www.omkaravidya.com

पदच्छेदः
रसः अहम् अप्सुः कौन्तेय प्रभा अस्मि शशिसूर्ययोः प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु

पदपरिचयः
रसः - अकार पु प्र एक
अहम् - दकार त्रि प्र एक
अप्सुः पकार स्त्री स बहु
कौन्तेय - अकार पु सं प्र
प्रभा - अ◌ाकार स्त्री प्र एक
अस्मि - लट् उपु एक
शशिसूर्ययोः - अकार पु स द्वि
प्रणवः अकार पु प्र एक
सर्ववेदेषु - अकार पु स बहु
शब्दः - अकार पु प्र एक
खे - अकार नपु स एक
पौरुषं - अकार नपु प्र एक
नृषु - ऋकार पु स बहु

पदार्थः
रसः - सारः
अहम् - अहम्
अप्सुः - जलेषु
कौन्तेय - अर्जुन
प्रभा - ज्योतिः
अस्मि - अस्मि
शशिसूर्ययोः - चन्द्रार्कौ
प्रणवः - ओङ्कारः

Downloaded from www.omkaravidya.com

सर्ववेदेषु - सकलागमेषु
शब्दः - ध्वनिः
खे - आकाशे
पौरुषं -पुरुषत्वम्
नृषु - मनुष्येषु

अन्वयः
हे कौन्तेय! अहम् अप्सुः रसः  शशिसूर्ययोः प्रभा  सर्ववेदेषु प्रणवः खे शब्दः नृषु पौरुषम् अस्मि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये अष्टमः श्लोकः । भगवान् श्रीकृष्णः "हे कौन्तेय! यथा अहम् अप्सुः रसः एवमेव शशिसूर्ययोः प्रभा अस्मि ।  सर्ववेदेषु प्रणवः  आकाशे शब्दः मनुष्येषु पौरुषम् च अस्मि ।"  एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
रसः + अहम - विसर्गउकारः पूर्वरूपसन्धिः
अप्सुः + कौन्तेय - विसर्गलोपः
प्रभा + अस्मि - सवर्णदीर्घसन्धिः

▶समासः
शशिः च सूर्यः च शशिसूर्यौ - इतरेतरद्वन्द्वसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता  - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥७.९॥

पदच्छेदः
पुण्यः गन्धः पृथिव्यां च तेजः च अस्मि विभावसौ जीवनं सर्वभूतेषु तपः च अस्मि तपस्विषु

पदपरिचयः
पुण्यः - अकार पु प्र एक
गन्धः  - अकार पु प्र एक
पृथिव्यां  - ईकार स्त्री स एक
च  अव्ययम्
तेजः  - सकार नपु प्र एक
च  अव्ययम्
अस्मि - लट् उपु एक
विभावसौ  - अकार पु प्र एक
जीवनं - अकार नपु प्र एक
सर्वभूतेषु - अकार नपु स बहु
तपः  - सकार नपु प्र एक
च - अव्ययम्
अस्मि - लट् उपु एक
तपस्विषु  - नकार पु स बहु

पदार्थः

Downloaded from www.omkaravidya.com

पुण्यः - सुरभिः
गन्धः - सुगन्धः
पृथिव्यां - भूमौ
च - च
तेजः - कान्तिः
च - च
अस्मि - भवामि
विभावसौ - अग्नौ
जीवनं - जीवनं
सर्वभूतेषु - सर्वप्राणिषु
तपः - तपः
च - च
अस्मि - भवामि
तपस्विषु - मुनिषु

अन्वयः
पृथिव्यां पुण्यः गन्धः च विभावसौ तेजः च अस्मि । (अहं) सर्वभूतेषु जीवनं तपस्विषु तपः च अस्मि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये नवमः श्लोकः । भगवान् श्रीकृष्णः "पृथिव्यां पुण्यः गन्धः च अग्नौ दीप्तिः च अस्मि । अहं सर्वप्राणिषु जीवनं तपस्विषु तपः च अस्मि तस्मिन् तपसि मयि तपस्विनः प्रोताः ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
पुण्यः + गन्धः - विसर्गउकारः

Downloaded from www.omkaravidya.com

च + अस्मि - सवर्णदीर्घसन्धिः
तपः + च - विसर्गसकारः
च + अस्मि - सवर्णदीर्घसन्धिः

▶समासः
सर्वाणि भूतानि - सर्वभूतानि - विशेषणपूर्वपदकर्मधारयसमासः

श्रीमद्भगवद्गीता - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ ७.१०॥

पदच्छेदः
बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् बुद्धिः बुद्धिमताम् अस्मि तेजः तेजस्विनाम् अहम्

पदपरिचयः
बीजं - अकार नपु द्वि एक
मां - दकार त्रि द्वि एक
सर्वभूतानां - अकार नपु ष एक
विद्धि - लोट् मपु एक
पार्थ - अकार पु सं प्र
सनातनम् - अकार नपु द्वि एक
बुद्धिः - इकार स्त्री प्र एक
बुद्धिमताम् - तकार पु ष बहु

Downloaded from www.omkaravidya.com

अस्मि - लट् उपु एक
तेजः - सकार नपु प्र एक
तेजस्विनाम् - नकार पु ष बहु
अहम् - दकार त्रि प्र एक

पदार्थः
बीजं - प्ररोहकारणम्
मां - माम्
सर्वभूतानां - सकलप्राणिनाम्
विद्धि - जानीहि
पार्थ - अर्जुन
सनातनम् - चिरन्तनम्
बुद्धिः - अन्तः करणम्
बुद्धिमताम् - विवेकशक्तिमतां
अस्मि - भवामि
तेजः -प्रागल्भ्यम्
तेजस्विनाम् - प्रागल्भानाम्
अहम् - अहम्

अन्वयः
हे पार्थ! (त्वम्) सर्वभूतानां सनातनम् बीजं मां विद्धि । बुद्धिमताम् बुद्धिः तेजस्विनाम् तेजः अहम् अस्मि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये दशमः श्लोकः । भगवान् श्रीकृष्णः "हे पार्थ! चिरन्तरं सर्वभूतानां बीजं माम् एवम् विद्धि । विवेकशक्तिमतां बुद्धिः तेजस्विनाम् तेजः च अहम् अस्मि ।" एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

बुद्धिः + बुद्धिमताम् - विसर्गरेफः

तेजः + तेजस्विनाम्- विसर्गसकारः

### श्रीमद्भगवद्गीता - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ७.११॥

पदच्छेदः

बलं बलवतां च अहं कामरागविवर्जितम् धर्माविरुद्धः भूतेषु कामः अस्मि भरतर्षभ

पदपरिचयः

बलं - अकार नपु. प्र एक

बलवतां - तकार पु ष बहु

च - अव्ययम्

अहं - दकार त्रिषु प्र एक

कामरागविवर्जितम् - अकार नपु. प्र एक

धर्माविरुद्धः - अकार पु. प्र एक

भूतेषु - अकार नपु स बहु

कामः - अकार नपु. प्र एक

अस्मि - लट् उपु एक

भरतर्षभ - अकार पु. सं प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
बलं - सामर्थ्यम्
बलवतां - ओजस्विनाम्
च - च
अहं - अहम्
कामरागविवर्जितम् - कामरागविवर्जितम्
धर्माविरुद्धः - नियताविरुद्धः
भूतेषु - प्राणिषु
कामः - आशा
अस्मि - भवामि
भरतर्षभ - अर्जुन

अन्वयः
हे भरतर्षभ! बलवतां कामरागविवर्जितम् बलं भूतेषु धर्माविरुद्धः कामः च अहम् अस्मि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये एकादशः श्लोकः । भगवान् श्रीकृष्णः "अहं बलवतां सामर्थ्यमस्मि । तत् सामर्थ्यं कामरागविवर्जितम् । अलब्धेषु विषयेषु तृष्णा - कामः प्राप्तेषु विषयेषु रञ्जना - रागः । हे भरतकुल श्रेष्ठ! प्राणिषु धर्माविरुद्धः कामः च अस्मि ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
च + अहम् - सवर्णदीर्घसन्धिः
धर्माविरुद्धः + भूतेषु - विसर्गउकारः

Downloaded from www.omkaravidya.com

कामः + अस्मि - विसर्गउकारः पूर्वरूपसन्धिः

▶समासः
कामः च रागः च - कामरागौ - इतरेतरद्वन्द्वसमासः
कामरागाभ्यां विवर्जितम् कामरागविवर्जितम् - तृतीयातत्पुरुषः
न विरुद्धः - अविरुद्धः - नञ्तत्पुरुषः
धर्मस्य अविरुद्धः - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

ये चैव सात्विका भावा राजसास्तमसाश्च ये ।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ ७.१२॥

पदच्छेदः
ये च एव सात्विकाः भावाः राजसाः तमसाः च ये मत्तः एव इति तान् विद्धि न तु अहं तेषु ते मयि

पदपरिचयः
ये - दकार पु प्र बहु
च - अव्ययम्
एव - अव्ययम्
सात्विकाः - अकार पु प्र बहु
भावाः - अकार पु प्र बहु
राजसाः - अकार पु प्र बहु
तमसाः - अकार पु प्र बहु

Downloaded from www.omkaravidya.com

च - अव्ययम्
ये - दकार पु प्र बहु
मत्तः - अव्ययम्
एव - अव्ययम्
इति - अव्ययम्
तान् - दकार पु द्वि बहु
विद्धि - लोट् मपु एक
न - अव्ययम्
तु - अव्ययम्
अहं - दकार त्रिषु प्र एक
तेषु - दकार पु स बहु
ते दकार पु प्र बहु
मयि - दकार त्रिषु स एक

पदार्थः
ये - ये
च - च
एव - एव
सात्विकाः - सत्त्वनिर्वृताः
भावाः - पदार्थाः
राजसाः - रजोनिर्वृताः
तमसाः - तमोनिर्वृताः
च - च
ये - ये
मत्तः - मत्तः
एव - एव
इति - इति
तान् - तान्

Downloaded from www.omkaravidya.com

विद्धि - जानीहि

न – न तु - तु

अहं – अहम् तेषु - तेषु

ते – ते मयि - मयि

अन्वयः

ये च एव सात्विकाः भावाः ये राजसाः च तमसाः च तान् मत्तः एव इति विद्धि । अहं न तेषु (अस्मि) । ते मयि (सन्ति) ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये द्वादशः श्लोकः । भगवान् श्रीकृष्णः “ये सत्त्वनिर्वृताः एव भावाः रजोनिर्वृताः एव भावाः तमोनिर्वृताः एव भावाः च मत्तः एवं जानीहि । तान् मत्तः एव जायमानान् विद्धि । तेषु तदधीनः अहं नास्मि । परन्तु ते मयि मद्वशाः मदधीनाः सन्ति ।“ एवं अवदत् ।

व्याकरणम्

▶सन्धिः_

च + एव - वृद्धिसन्धिः

सात्विकाः + भावाः - विसर्गलोपः

भावाः + राजसाः - विसर्गलोपः

राजसाः + तामसाः - विसर्गसकारः

तामसाः + च - विसर्गसकारः

एव + इति - गुणसन्धिः

तु + अहं - यण्सन्धिः

मत्तः - अस्मद् + तसिल् प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ ७.१३॥

पदच्छेदः
त्रिभिः गुणमयैः भावैः एभिः सर्वमिदं जगत् मोहितं न अभिजानाति माम् एभ्यः परम् अव्ययम्

पदपरिचयः
त्रिभिः - इकार पु तृ नित्य बहु
गुणमयैः - अकार पु तृ बहु
भावैः - अकार पु तृ बहु
एभिः - मकार पु तृ बहु
सर्वम् - अकार नपु प्र एक
इदं - मकार नपु प्र एक
जगत् - तकार नपु प्र एक
मोहितं - अकार नपु प्र एक
न - अव्ययम्
अभिजानाति - लट् प्रपु एक
माम् - दकार त्रिषु द्वि एक
एभ्यः - मकार पु प बहु
परम् - अकार पु द्वि एक
अव्ययम् - अकार पु द्वि एक

पदार्थः
त्रिभिः - त्रिविधैः

Downloaded from www.omkaravidya.com

गुणमयैः - गुणविकारैः
भावैः + पदार्थैः
एभिः - एतैः
सर्वम् - सकलम्
इदम् - एतत्
जगत् - पृथिवी
मोहितं - अविवेकताम्
न - न
अभिजानाति - वेत्ति
माम् - माम्
एभ्यः यथोक्तेभ्यः गुणेभ्यः
परम् - व्यतिरिक्तम्
अव्ययम् - व्ययरहितम्

अन्वयः
एभिः त्रिभिः गुणमयैः भावैः इदं सर्वं जगत् मोहितं एभ्यः परम् अव्ययम् मां न अभिजानाति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये त्रयोदशः श्लोकः । भगवान् श्रीकृष्णः "त्रिभिः गुणविकारैः एभिः पदार्थैः प्राणिजातं इदं जगत् मोहितं एभ्यः मां न अभिजानाति । एभ्यः परम् व्ययरहितम् मां अभिजानाति ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
त्रिभिः + गुणमयैः - विसर्गरेफः
गुणमयै + भावैः - विसर्गरेफः

Downloaded from www.omkaravidya.com

भावैः + एभिः विसर्गरेफः
न + अभिजानाति - सवर्णदीर्घसन्धिः

▶समासः
न व्ययम् - अव्ययम् - नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥७.१४॥

पदच्छेदः
दैवी हि एषा गुणमयी मम माया दुरत्यया माम् एव ये प्रपद्यन्ते मायाम् एतां तरन्ति ते

पदपरिचयः
दैवी - ईकार स्त्री प्र एक
हि - अव्ययम्
एषा - दकार स्त्री प्र एक
गुणमयी - ईकार स्त्री प्र एक
मम - दकार त्रिषु ष एक
माया -आकार स्त्री प्र एक
दुरत्यया - आकार स्त्री प्र एक
माम् - दकार त्रिषु द्वि एक
एव - अव्ययम्

Downloaded from www.omkaravidya.com

ये - दकार पु प्र बहु
प्रपद्यन्ते -लट् प्रपु बहु
मायाम् - आकार स्त्री द्वि एक
एतां -दकार स्त्री द्वि एक
तरन्ति - लट् प्रपु बहु
ते - दकार पु प्र बहु

पदार्थः
दैवी -वैष्णवी
हि - हि
एषा -इयम्
गुणमयी - त्रिगुणात्मिका
मम - मम
माया - माया
दुरत्यया - दुः खेन अत्यया
माम् - माम्
एव - एव
ये - ये
प्रपद्यन्ते - शरणं गच्छन्ति
मायाम् - मायाशक्तिम्
एतां - इमाम्
तरन्ति - अतिक्रामन्ति
ते - ते

अन्वयः
दैवी गुणमयी मम एषा माया दुरत्यया ये माम् एव प्रपद्यन्ते ते एतां मायाम् तरन्ति हि ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये चतुर्दशः श्लोकः । भगवान् श्रीकृष्णः “दैवी त्रिगुणमयी मम एषा माया दुःखेन अत्यया । ये माम् एव प्रपद्यन्ते ते एतां मायाम् अतिक्रामन्ति । ते संसारबन्धनात् मुच्यन्ते ।“ एवम् अवदत् ।

व्याकरणम्
▶सन्धिः_
हि + एषा - यण्सन्धिः

श्रीमद्भगवद्गीता - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ ७.१५॥

पदच्छेदः
न मां दुष्कृतिनः मूढाः प्रपद्यन्ते नराधमाः मायया अपहृतज्ञानाः आसुरं भावम् आश्रिताः

पदपरिचयः
न - अव्ययम्
मां - दकार त्रि द्वि एक
दुष्कृतिनः - नकार पु प्र बहु
मूढाः - अकार पु प्र बहु

Downloaded from www.omkaravidya.com

प्रपद्यन्ते - लट् प्रपु बहु
नराधमाः - अकार पु प्र बहु
मायया - आकार स्त्री तृ एक
अपहृतज्ञानाः - अकार पु प्र बहु
आसुरं - अकार पु द्वि एक
भावम् - अकार पु द्वि एक
आश्रिताः - अकार पु प्र बहु

पदार्थः
न - न
मां - परमेश्वरम्
दुष्कृतिनः - पापशीलाः
मूढाः - अविवेकिनः
प्रपद्यन्ते - भजन्ति
नराधमाः - निकृष्टाः
मायया - मायशक्त्या
अपहृतज्ञानाः - संमुषितज्ञानाः
आसुरं - हिंसादिरूपम्
भावम् - स्वभावम्
आश्रिताः - प्राप्ताः

अन्वयः
दुष्कृतिनः मूढाः मायया अपहृतज्ञानाः आसुरं भावम् आश्रिताः  नराधमाः मां न प्रपद्यन्ते ।

तात्पर्यम्

Downloaded from www.omkaravidya.com

अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये पञ्चादशः श्लोकः । भगवान् श्रीकृष्णः "पापकारिणः मूढाः मायया अपहृतज्ञानाः आसुरं भावम् आश्रिताः  नराधमाः मां परमेश्वरं न प्रपद्यन्ते ।" एवम् अवदत् ।

व्याकरणम्

_▶सन्धिः

दुष्कृतिनः + मूढाः - विसर्गउकारः

अपहृतज्ञानाः + आसुरं - विसर्गलोपः

▶समासः

नरेषु अधमः नराधमः - सप्तमीतत्पुरुषः - ते नराधमाः

अपहृतं ज्ञानं यस्य सः अपहृतज्ञानः - समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता  - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ ७.१६॥

पदच्छेदः

चतुर्विधाः भजन्ते मां जनाः सुकृतिनः अर्जुन आर्तः जिज्ञासुः अर्थार्थी ज्ञानी च भरतर्षभ

Downloaded from www.omkaravidya.com

पदपरिचयः
चतुर्विधाः - अकार पु प्र बहु
भजन्ते - लट् प्रपु बहु
मां - दकर त्रि द्वि एक
जनाः - अकार पु प्र बहु
सुकृतिनः - नकार पु प्र बहु
अर्जुन - अकार पु स प्र
आर्तः - अकार पु प्र एक
जिज्ञासुः - उकार पु प्र एक
अर्थार्थी - नकार पु प्र एक
ज्ञानी - नकार पु प्र एक
च - अव्ययम्
भरतर्षभ - अकार पु सं प्र

पदार्थः
चतुर्विधाः - चतुष्प्रकाराः
भजन्ते - सेवन्ते
मां - माम्
जनाः - जनाः
सुकृतिनः - पुण्यवन्तः
अर्जुन - अर्जुन
आर्तः - पीडितः
जिज्ञासुः - आत्मज्ञानेच्छुः
अर्थार्थी - धनकामः
ज्ञानी - आत्मवित्
च - च
भरतर्षभ - अर्जुन

Downloaded from www.omkaravidya.com

अन्वयः
हे अर्जुन ! हे भरतर्षभ! आर्तः जिज्ञासुः अर्थार्थी ज्ञानी च चतुर्विधाः सुकृतिनः जनाः मां भजन्ते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये षोडशः श्लोकः । भगवान् श्रीकृष्णः “पूर्वजन्मसु ये कृतपुण्याः जनाः ते चतुर्विधाः आर्तः जिज्ञासुः अर्थार्थी ज्ञानी च । ते सुकृतिनः जनाः मां भजन्ते ।“ एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
चतुर्विधाः + भजन्ते - विसर्गलोपः
सुकृतिनः + अर्जुन - विसर्गउकारः पूर्वरूपसन्धिः
आर्तः + जिज्ञासुः - विसर्गउकारः
जिज्ञासुः + अर्थार्थी - विसर्गरेफः

▶समासः
अर्थः अस्ति इति अर्थी
अर्थेन आर्थीः - अर्थार्थी - तृतीयातत्पुरुषः

श्रीमद्भगवद्गीता - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

तेषां ज्ञानी नित्यमुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥७.१७॥

Downloaded from www.omkaravidya.com

पदच्छेदः
तेषां ज्ञानी नित्यमुक्तः एकभक्तिः विशिष्यते प्रियः हि ज्ञानिनः अत्यर्थम् अहं सः च मम प्रियः

पदपरिचयः
तेषां - दकार पु ष बहु
ज्ञानी - नकार पु प्र एक
नित्यमुक्तः - अकार पु प्र एक
एकभक्तिः - इकार पु प्र एक
विशिष्यते - वि+ शिष्+ कर्मणि लट् प्रपु एक
प्रियः - अकार पु प्र एक
हि - अव्ययम्
ज्ञानिनः - नकार पु ष एक
अत्यर्थम् - अव्ययम्
अहं - दकार त्रि प्र एक
सः - दकार पु प्र एक
च - अव्ययम्
मम - दकार त्रि ष एक
प्रियः - अकार पु प्र एक

पदार्थः
तेषां - तेषाम्
ज्ञानी - ज्ञानवित्
नित्यमुक्तः - सततयोगी
एकभक्तिः - अनन्यभक्तिः
विशिष्यते - विशिष्यते
प्रियः - अभिष्टः
हि - हि

Downloaded from www.omkaravidya.com

ज्ञानिनः - ज्ञानवतः
अत्यर्थम् - अतिशयने
अहं - अहम्
सः - सः
च - च
मम - वासुदेवस्य
प्रियः - प्रियः

अन्वयः
तेषां नित्यमुक्तः एकभक्तिः ज्ञानी विशिष्यते अहं हि ज्ञानिनः अत्यर्थम् प्रियः । सः च मम प्रियः हि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये सप्तदशः श्लोकः । भगवान् श्रीकृष्णः “तेषां चतुर्णां मध्ये ज्ञानि नित्ययुक्तः भवति । अन्यस्य भजनीयस्य अदर्शनात् अतः सः एकभक्तिः विशिष्यते । अहं हि ज्ञानिनः अत्यर्थम् प्रियः । सः च मम प्रियः हि ।“ एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
एकभक्तिः + विशिष्यते - विसर्गरेफः
प्रियः + हि - विसर्गउकारः
ज्ञानिनः + अत्यर्थम् - विसर्गउकारः पूर्वरूपसन्धिः
सः + च - विसर्गलोपः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥ ७.१८॥

पदच्छेदः
उदाराः सर्वे एव एते ज्ञानी तु आत्मा एव मे मतम् आस्थितः सः हि युक्तात्मा माम् एव अनुत्तमां गतिम्

पदपरिचयः
उदाराः - अकार पु प्र बहु
सर्वे - अकार पु प्र बहु
एव - अव्ययम्
एते - दकार पु प्र बहु
ज्ञानी - नकार पु प्र एक
तु - अव्ययम्
आत्मा - नकार पु प्र एक
एव - अव्ययम्
मे - दकार त्रि ष एक
मतम् - अकार नपु प्र एक
आस्थितः - अकार पु प्र एक
सः - दकार पु प्र एक
हि - अव्ययम्
युक्तात्मा - नकार पु प्र एक
माम् - दकार त्रि द्वि एक
एव - अव्ययम्

Downloaded from www.omkaravidya.com

अनुत्तमां - आकार स्त्री द्वि एक
गतिम् - इकार स्त्री द्वि एक

पदार्थः
उदाराः - उत्कृष्टाः
सर्वे - सकलाः
एव - एव
एते - इमे
ज्ञानी - तत्त्ववित्
तु - तु
आत्मा - आत्मा
एव - एव
मे - मम
मतम् - अभिप्रायः
आस्थितः - प्रवृत्तः
सः - सः
हि - हि
युक्तात्मा - समाहितचित्तः
माम् - माम्
एव - एव
अनुत्तमां - परमम्
गतिम् - पदम्

अन्वयः
एते सर्वे उदाराः एव । तु ज्ञानी आत्मा एव (इति) मे मतम् । हि सः युक्तात्मा माम् एव अनुत्तमां गतिम् आस्थितः ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोक: श्रीमद्भगवद्गीतायां सप्तमे अध्याये अष्टादश: श्लोक: । भगवान् श्रीकृष्ण: "ज्ञानि तु आत्मा एव । मत्त: न अन्य: इति मम निश्चय मतम् । हि स: समाहितचित्त: सन् माम् एव परब्रह्मगन्तव्यम् अनुत्तमां गतिं प्राप्तुं प्रवृत्त: ।" एवम् अवदत् ।

व्याकरणम्

▶सन्धिः

सर्वे + एव - यान्तवान्तदेशसन्धि: य लोप:

एव + एते - वृद्धिसन्धि:

तु + आत्मा - यण्सन्धि:

आत्मा + एव - वृद्धिसन्धि:

स: + हि - विसर्गलोप: एव + अनुत्तमां - सवर्णदीर्घसन्धि:

▶समास:

युक्त: आत्मा यस्य स: युक्तात्मा -- समानाधिकरणबहुव्रीहिसमास:

न उत्तमा - अनुत्तमा नञ्ततपुरुष: ताम्

▶कृदन्ता:

आस्थित: - आ+ स्था + क्त प्रत्यय:

श्रीमद्भगवद्गीता - सप्तमोऽध्याय: - ज्ञानविज्ञानयोग:

मूलश्लोक:

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेव: सर्वमिति स महात्मा सुदुर्लभ: ॥ ७.१९॥

Downloaded from www.omkaravidya.com

पदच्छेदः
बहूनां जन्मनाम् अन्ते ज्ञानवान् माम्  प्रपद्यते वासुदेवः सर्वम् इति सः महात्मा सुदुर्लभः

पदपरिचयः
बहूनां - उकार नपु ष बहु
जन्मनाम् - नकार नपु ष बहु
अन्ते - अकार पु स एक
ज्ञानवान् - तकार पु प्र एक
माम्  - दकार त्रि द्वि एक
प्रपद्यते - प्र + पद् + लट् प्रपु एक
वासुदेवः - अकार पु प्र एक
सर्वम् -अकार नपु द्वि एक
इति - अव्ययम्
सः - दकार पु प्र एक
महात्मा - नकार पु प्र एक
सुदुर्लभः- अकार पु प्र एक

पदार्थः
बहूनां - असंख्यानाम्
जन्मनाम् - जन्मनाम्
अन्ते - समाप्तौ
ज्ञानवान् - ज्ञानी
माम्  - वासुदेवम्
प्रपद्यते - प्राप्नोति
वासुदेवः - वासुदेवः
सर्वम् - सर्वम्
इति - एवम्

Downloaded from www.omkaravidya.com

सः - सः
महात्मा - महात्मा
सुदुर्लभः - अत्यन्तं दुष्प्रापः

अन्वयः
बहूनां जन्मनाम् अन्ते वासुदेवः सर्वम् इति ज्ञानवान् माम् प्रपद्यते । सः महात्मा सुदुर्लभः ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये नवदशः श्लोकः । भगवान् श्रीकृष्णः “ज्ञानवान् बहूनां जन्मनाम् अन्ते वासुदेवं प्रत्यगात्मानं प्रत्यक्षतः प्रपद्यते । यः एवं सर्वात्मानं मां प्रपद्यते सः महात्मा । न तत्समः अन्यः अस्ति अधिकः वा । अतः मनुष्याणां सहस्रेषु सः दुर्लभः ।“ एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
सः + महात्मा - विसर्गलोपः

▶समासः
महान् आत्मा यस्य सः महात्मा - समानाधिकरणबहुव्रीहिसमासः

▶तद्धितान्ताः
ज्ञानम् अस्य अस्ति इति ज्ञानवान् / ज्ञानी
वसुदेवस्य अपत्यं पुमान् वासुदेवः

Downloaded from www.omkaravidya.com

मूलश्लोकः

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ ७.२० ॥

पदच्छेदः
कामैः तैः तैः हृतज्ञानाः प्रपद्यन्ते अन्यदेवताः तं तं नियमम् आस्थाय प्रकृत्या नियताः स्वया

पदपरिचयः
कामैः - अकार पु तृ एक
तैः - दकार पु तृ एक
तैः - दकार पु तृ एक
हृतज्ञानाः - अकार पु प्र बहु
प्रपद्यन्ते - लट् प्रपु बहु
अन्यदेवताः - आकार स्त्री द्वि बहु
तं - दकार पु द्वि एक
तं - दकार पु द्वि एक
नियमम् - अकार पु द्वि एक
आस्थाय - ल्यबन्तम्
प्रकृत्या - इकार स्त्री तृ एक
नियताः - अकार पु प्र बहु
स्वया - आकार स्त्री तृ एक

पदार्थः
कामैः - पुत्रपशुस्वर्गादिविषयैः

Downloaded from www.omkaravidya.com

तैः - तैः
तैः - तैः
हृतज्ञानाः - अपहृतविवेकज्ञानाः
प्रपद्यन्ते - प्राप्नुवन्ति
अन्यदेवताः - इतरदेवताः
तं - तम्
तं - तम्
नियमम् - नियमम्
आस्थाय - आश्रित्य
प्रकृत्या - स्वभावेन
नियताः - नियमिताः
स्वया - आत्मीयया

अन्वयः
तैः तैः कामैः  हृतज्ञानाः स्वया प्रकृत्या नियताः तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये विंशतितमः श्लोकः । भगवान् श्रीकृष्णः "तेषां स्वभावैः नियताः तैः तैः पुत्रपशुस्वर्गादिविषयैः कामैः हृतज्ञानाः तं तं नियमं आस्थाय अन्यदेवताः पूज्यन्ते ।"  एवम अवदत् ।

व्याकरणम्
▶सन्धिः
कामैः + तैः - विसर्गसकारः
तैः + तैः - विसर्गसकारः
तैः + हृतज्ञानाः  विसर्गरेफः
प्रपद्यन्ते + अन्यदेवताः - पूर्वरूपसन्धिः

Downloaded from www.omkaravidya.com

▶समास:
हृतं  ज्ञानं येषां ते - समानाधिकरणबहुव्रीहिसमास:

▶कृदन्ता:
आस्थाय - आ + स्था + ल्यप् प्रत्यय:

श्रीमद्भगवद्गीता  - सप्तमोऽध्याय: - ज्ञानविज्ञानयोग:

मूलश्लोक:

यो यो यां यां तनुं भक्त: श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ ७.२१॥

पदच्छेदः
य: य: यां यां तनुं भक्त: श्रद्धया अर्चितुम् इच्छति ।  तस्य तस्य अचलां श्रद्धां ताम् एव विदधामि अहम्

पदपरिचय:
य: - दकार पु प्र एक
य: -  दकार पु प्र एक
यां -  दकार स्त्री द्वि एक
यां -  दकार स्त्री द्वि एक
तनुं -  उकार स्त्री द्वि एक
भक्त:  - अकार पु प्र एक
श्रद्धया - आकार स्त्री तृ एक
अर्चितुम् - तुमुनन्तम्
इच्छति - लट् प्रपु एक

Downloaded from www.omkaravidya.com

तस्य - दकार पु ष एक
तस्य  दकार पु ष एक
अचलां - आकार स्त्री द्वि एक
श्रद्धां - आकार स्त्री द्वि एक
ताम् - दकार स्त्री द्वि एक
एव - अव्ययम्
विदधामि - लट् उपु एक
अहम्  दकार त्रि प्र एक

पदार्थः
यः - यः
यः - यः
यां - याम्
यां - याम्
तनुं - देवतातनुम्
भक्तः - भजनशीलः
श्रद्धया -  आसक्त्या
अर्चितुम् - पूजयितुम्
इच्छति - अभिलषति
तस्य -  तस्य
तस्य - तस्य
अचलां - स्थिराम्
श्रद्धां - श्रद्धाम्
ताम् -  ताम्
एव - एव
विदधामि - स्थिरीकरोमि
अहम् - अहम्

Downloaded from www.omkaravidya.com

अन्वयः
यः यः भक्तः यां यां तनुं श्रद्धया अर्चितुम् इच्छति तस्य तस्य ताम् एव श्रद्धाम् अचलां अहं विदधामि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये एकविंशतितमः श्लोकः । भगवान् श्रीकृष्णः "यः यः भक्तः यां यां देवतातनुं श्रद्धया पूजयितुम् इच्छति तस्य तस्य कामिनः अचलां स्थिरां श्रद्धां तामेव अहं स्थिरीकरोमि ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
यः + यः - विसर्गउकारः
यः + माम् -विसर्गउकारः
श्रद्धया + अर्चितुम् - सवर्णदीर्घसन्धिः
विदधामि + अहम् - यण्सन्धिः

▶कृदन्ताः
अर्चितुम् - अर्च् + तुमुन् प्रत्ययः

श्रीमद्भगवद्गीता - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान्मयैव विहितान्हि तान् ॥७.२२॥

Downloaded from www.omkaravidya.com

पदच्छेदः
सः तया श्रद्धया युक्तः  तस्य आराधनम् ईहते लभते च ततः कामान् मया एव विहितान् हि तान्

पदपरिचयः
सः - दकार पु प्र एक
तया - दकार स्त्री तृ एक
श्रद्धया -  आकार स्त्री तृ एक
युक्तः  - अकार पु प्र एक
तस्य  - दकार पु ष एक
आराधनम् - अकार नपु द्वि एक
ईहते - लट् प्रपु एक
लभते  - लट् प्रपु एक
च - अव्ययम्
ततः - अव्ययम्
कामान् - अकार पु द्वि बहु
मया -  दकार त्रि तृ एक
एव - अव्ययम्
विहितान् -अकार पु द्वि बहु
हि - अव्ययम्
तान् - दकार पु द्वि बहु

पदार्थः
सः - सः
तया - तया
श्रद्धया - आसक्त्या
युक्तः  - युक्तः
तस्य - तस्य

Downloaded from www.omkaravidya.com

आराधनम् - पूजनम्
ईहते - इच्छति
लभते - प्राप्नोति
च - च
ततः - ततः
कामान् - इष्टान्
मया - मया
एव - एव
विहितान् - निर्मितान्
हि - हि
तान् - तान्

अन्वयः
सः तया श्रद्धया युक्तः तस्य आराधनम् ईहवे । ततः च मया एव विहितान् तान् कामान् लभते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये द्वाविंशतितमः श्लोकः । भगवान् श्रीकृष्णः "सः तया श्रद्धया युक्तः सन् देवतातन्वाः आराधनम् चेष्टते । तस्याः आराधिताया देवतातन्वाः ईप्सितान् कामान् लभते ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
सः + तया - विसर्गलोपः
युक्तः + तस्य - विसर्गसकारः
तस्य + आराधनम् - सवर्णदीर्घसन्धिः
मया + एव - वृद्धिसन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - सप्तमोऽध्याय: - ज्ञानविज्ञानयोग:

मूलश्लोक:

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ ७.२३॥

पदच्छेदः
अन्तवत् तु फलं तेषां तत् भवति अल्पमेधसाम् देवान् देवयज: यान्ति मत् भक्ता: यान्ति माम् अपि

पदपरिचय:
अन्तवत् - तकार नपु प्र एक
तु - अव्ययम्
फलं - अकार नपु प्र एक
तेषां - दकार पु ष बहु
तत् - दकार नपु प्र एक
भवति - लट् प्रपु एक
अल्पमेधसाम् - सकार पु ष बहु
देवान् - अकार पु द्वि बहु
देवयज: - जकार पु प्र बहु
यान्ति - लट् प्रपु बहु
मद्भक्ता: - अकार पु प्र बहु
यान्ति - लट् प्रपु बहु
माम् - दकार त्रिषु द्वि एक
अपि -अव्ययम्

पदार्थः

Downloaded from www.omkaravidya.com

अन्तवत् - विनाशि
तु - तु
फलं - फलम्
तेषां - तेषां
तत् - तत्
भवति - भवति
अल्पमेधसाम् - अल्पप्रज्ञानाम्
देवान् - देवान्
देवयजः - देवान् यजन्ति
यान्ति - प्राप्नोति
मद्भक्ताः - मम भक्ताः
यान्ति - प्रापंनोति
माम् - माम्
अपि - अपि

अन्वयः
देवयजः देवान् यान्ति । अल्पमेधसाम् तेषां तत् फलम् अन्तवत् तु भवति ।
मद्भक्ताः अपि मां यान्ति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये त्रयोविंशतितमः श्लोकः । भगवान् श्रीकृष्णः "देवयजः देवान् यान्ति । अल्पमेधसाम् तेषां तत् फलम् विनाशि भवति । मद्भक्ताः अपि मां यान्ति ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
तत् + भवति - जश्त्वसन्धिः
भवति + अल्पमेधसाम् - यण्सन्धिः

Downloaded from www.omkaravidya.com

देवयजः + यान्ति - विसर्गउकारः
मत् + भक्ताः - जश्त्वसन्धिः

▶समासः
अल्पं मेधः  यस्य सः अल्पमेधः - समानाधिकरणबहुव्रीहिसमासः -तेषाम्
देवान् यजन्ति इति देवयजः - उपपदसमासः

श्रीमद्भगवद्गीता  - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ ७.२४॥

पदच्छेदः
अव्यक्तं व्यक्तिम् आपन्नं मन्यन्ते माम् अबुद्धयः परं भावम् अजानन्तः मम अव्ययम् अनुत्तमम्

पदपरिचयः
अव्यक्तं - अकार पु द्वि एक
व्यक्तिम् - इकार स्त्री द्वि एक
आपन्नं - अकार पु द्वि एक
मन्यन्ते - लट् प्रपु बहु
माम् - दकार त्रि  द्वि एक
अबुद्धयः - इकार पु प्र बहु
परं - अकार पु द्वि एक
भावम् - अकार पु द्वि एक
अजानन्तः - तकार पु प्र बहु

Downloaded from www.omkaravidya.com

मम - दकार त्रि ष एक
अव्ययम् - अकार पु द्वि एक
अनुत्तमम् - अकार पु द्वि एक

पदार्थः
अव्यक्तं - अप्रकाशम्
व्यक्तिम् - प्रकाशम्
आपन्नं - गतम्
मन्यन्ते - चिन्तयन्ति
माम् - माम्
अबुद्धयः - अविवेकिनः
परं - उत्कृष्टम्
भावम् - स्वरूपम्
अजानन्तः - अविवेकिनः
मम - मम
अव्ययम् - व्ययरहितम्
अनुत्तमम् - निरतिशयम्

अन्वयः
अबुद्धयः मम अनुत्तमम् परम् अव्ययम् भावम् अजानन्तः । अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये चतुर्विंशतितमः श्लोकः । भगवान् श्रीकृष्णः “अविवेकिनः मम अव्ययं निरतिशयं परम् स्वरूपम् अजानन्तः । नित्यप्रसिद्धम् ते अविवेकिनः ईश्वरं सन्तं अपि माम् अप्रकाशम् इदानिं प्रकाशं गतम् इति मन्यन्ते ।“ एवम् अवदत्।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

मम + अव्ययम् - सवर्णदीर्घसन्धि:

अजानन्त: + मम - विसर्गउकार:

▶समास:

न व्यक्त: - अव्यक्त: - नञ्बहुव्रीहि:

न बुद्धि: विद्यते येषां ते - अबुद्धय: - नञ्बहुव्रीहि:

न व्यय: - अव्यय: - नञ्बहुव्रीहि:

न उत्तम: अनुत्तम: -नञ्बहुव्रीहि:

न जानन्त: अजानन्त: - नञ्तत्पुरुष:

श्रीमद्भगवद्गीता - सप्तमोऽध्याय: - ज्ञानविज्ञानयोग:

मूलश्लोक:

नाहं प्रकाश: सर्वस्य योगमायासमावृत: ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ ७.२५॥

पदच्छेदः

न अहं प्रकाश: सर्वस्य योगमाया समावृत: मूढ: अयं न अभिजानाति लोक: माम् अजम् अव्ययम्

पदपरिचय:

न - अव्ययम्

अहं - दकार त्रि प्र एक

Downloaded from www.omkaravidya.com

प्रकाशः - अकार पु प्र एक
सर्वस्य  अकार पु ष एक
योगमाया - आकार स्त्री प्र एक
समावृतः  - अकार पु प्र एक
मूढः -  - अकार पु प्र एक
अयं - मकार पु प्र एक
न - अव्ययम्
अभिजानाति - लट प्रपु एक
लोकः -  - अकार पु प्र एक
माम् - दकार त्रि द्वि एक
अजम् - अकार पु द्वि एक
अव्ययम्  - अकार पु द्वि एक

पदार्थः
न - न
अहं - अहम्
प्रकाशः - प्रकटः
सर्वस्य - सकलस्य
योगमाया - योगमाया
समावृतः - आछन्नः
मूढः - अविवेकिनः
अयं - अयम्
न - न
अभिजानाति - विद्धि
लोकः - जनः
माम् - माम्
अजम् - जननरहितम्
अव्ययम्  - व्ययरहितम्

Downloaded from www.omkaravidya.com

अन्वयः

योगमाया समावृतः अहं  सर्वस्य न प्रकाशः अयं लोकः मूढाः  अजम् अव्ययम् माम् न अभिजानाति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये पञ्चविंशतितमः श्लोकः । भगवान् श्रीकृष्णः “योगमायया समावृतः अहं  सर्वस्य न प्रकाशः:अयं लोकः मूढाः  अजम् अव्ययम् माम् न अभिजानाति । “ एवम् अबदत्।

व्याकरणम्
▶सन्धिः
मूढः + अयम् - विसर्गउकारः पूर्वरूपसन्धिः
न + अभिजानाति - सवर्णदीर्घसन्धिः
लोकः + माम् - विसर्गउकारः

▶समासः
योगमायया समावृतः - तृतीयातत्पुरुषः
न जः - अजः - नञ् तत्पुरुषः
न व्ययः - अव्ययः -  नञ् तत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥७.२६॥

पदच्छेदः
वेद अहं समतीतानि वर्तमानानि च अर्जुन भविष्याणि च भूतानि मां तु वेद न कश्चन

पदपरिचयः
वेद - लट् उपु एक
अहं - दकार त्रि प्र एक
समतीतानि - अकार नपु द्वि बहु
वर्तमानानि - अकार नपु द्वि बहु
च - अव्ययम्
अर्जुन - अकार पु सं प्र
भविष्याणि - अकार नपु द्वि बहु
च - अव्ययम्
भूतानि - अकार नपु द्वि बहु
मां - दकार त्रि द्वि एक
तु - अव्ययम्
वेद - लट् प्रपु एक
न - अव्ययम्
कश्चन - अव्ययम्

पदार्थः

Downloaded from www.omkaravidya.com

वेद - वेद्मि
अहं - अहम्
समतीतानि - समतिक्रान्तानि
वर्तमानानि - वर्तमानानि
च - च
अर्जुन - अर्जुन
भविष्याणि - आगामीनि
च - च
भूतानि - स्थावरजङ्गमानि
मां - माम्
तु - तु
वेद - वेत्ति
न - न
कश्चन -कोऽपि

अन्वयः
हे अर्जुन ! अहं समतीतानि वर्तमानानि च भविष्याणि च भूतानि वेद । तु मां न कश्चन वेद ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां सप्तमे अध्याये षड्विंशतितम: श्लोक: । भगवान् श्रीकृष्ण: "हे अर्जुन ! अहं समतीतानि वर्तमानानि च भविष्याणि च भूतानि जाने । कश्चन मां तु न वेद ।" एवम् अवदत्।

व्याकरणम्
▶सन्धिः
वेद + अहम् - सवर्णदीर्घसन्धि:
च + अर्जुन - सवर्णदीर्घसन्धि:

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता  - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि संमोहं सर्गे यान्ति परन्तप ॥७.२७॥

पदच्छेदः
इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत सर्वभूतानि संमोहं सर्गे यान्ति परन्तप

पदपरिचयः
इच्छाद्वेषसमुत्थेन - अकार पु तृ एक
द्वन्द्वमोहेन - अकार पु तृ एक
भारत - अकार पु सं प्र
सर्वभूतानि - नकार पु प्र एक
संमोहं - अकार पु द्वि एक
सर्गे - अकार पु स एक
यान्ति - लट् प्रपु बहु
परन्तप - अकार पु सं प्र

पदार्थः
इच्छाद्वेषसमुत्थेन - कामक्रोधोद्भवेन
द्वन्द्वमोहेन - द्वन्द्वाविवेकेन
भारत - अर्जुन
सर्वभूतानि - सर्वप्राणिनः
संमोहं - सम्मूढताम्
सर्गे - उत्पत्तिकाले

Downloaded from www.omkaravidya.com

यान्ति - प्राप्नुवन्ति
परन्तप - अर्जुन

अन्वयः
हे भारत। हे परन्तप! सर्गे इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन सर्वभूतानि संमोहं यान्ति ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां सप्तमे अध्याये सप्तविंशतितम: श्लोक: । भगवान् श्रीकृष्ण: “भरतकुलश्रेष्ठ! हे परन्तप! स्थूलदेहोत्पत्तौ सत्यां कामक्रोधोद्भवेन द्वन्द्वाविवेकेन सर्वप्राणिन: अपि सम्मूढत्वम्  यान्ति ।“ एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
संमोहम् + सर्गे - अनुस्वारसन्धि:

▶समास:
इच्छा च द्वेषः च - इच्छाद्वेषौ - इतरेतरद्वन्द्वसमास:
इच्छाद्वेषाभ्यां समुत्थ:
इच्छाद्वेषसमुत्थ: - तेन तृतीयातत्पुरुष:
द्वन्द्वमोहः - द्वन्द्व निमित्तः मोहः - मध्यमपद लोपी

Downloaded from www.omkaravidya.com

मूलश्लोकः

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥७.२८॥

पदच्छेदः
येषां तु अन्तगतं पापं जनानां पुण्यकर्मणाम् ते द्वन्द्वमोहनिर्मुक्ताः भजन्ते मां दृढव्रताः

पदपरिचयः
येषां - दकार पु ष बहु
तु - अव्ययम्
अन्तगतं - अकार नपु प्र एक
पापं - अकार नपु प्र एक
जनानां - अकार पु ष बहु
पुण्यकर्मणाम् - अकार पु ष बहु
ते - दकार पु प्र बहु
द्वन्द्वमोहनिर्मुक्ताः - अकार पु प्र बहु
भजन्ते - लट् प्रपु बहु
मां - दकार त्रि द्वि बहु
दृढव्रताः - अकार पु प्र बहु

पदार्थः
येषां - येषाम्
तु - तु
अन्तगतं - समाप्तप्रायम्

Downloaded from www.omkaravidya.com

पापं - कल्मषम्
जनानां - मनुष्याणाम्
पुण्यकर्मणाम् - सुकृतानाम्
ते - ते
द्वन्द्वमोहनिर्मुक्ताः - द्वन्द्वमोहनिर्मुक्ताः
भजन्ते - पूजयन्ते
मां - माम्
दृढव्रताः - गाढसङ्कल्पाः

अन्वयः
येषां पुण्यकर्मणाम् जनानां पापं तु अन्तगतं ते द्वन्द्वमोहनिर्मुक्ताः दृढव्रताः माम् भजन्ते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां सप्तमे अध्याये अष्टाविंशतितमः श्लोकः । भगवान् श्रीकृष्णः "पुण्यकर्मणाम् येषां जनानां पापं तु अन्तगतं ते द्वन्द्वमोहनिर्मुक्ताः दृढव्रताः माम् भजन्ते ।" एवम् अवदत् ।

व्याकरणम्
▶सन्धिः
तु + अन्तगतम् - यण्सन्धिः
द्वन्द्वमोहनिर्मुक्ताः + भजन्ते - विसर्गलोपः

▶समासः
पुण्यं कर्म यस्य सः - पुण्यकर्मः -समानाधिकरणबहुव्रीहिसमासः - तेषाम्
द्वन्द्वस्य मोहः- द्वन्द्वमोहः षष्ठीतत्पुरुषाः
द्वन्द्वमोहेन निर्मुक्तः - द्वन्द्वमोहनिर्मुक्तः - तृतीयातत्पुरुषः - ते
दृढं व्रतं येषां ते - दृढव्रताः - समानाधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - सप्तमोऽध्याय: - ज्ञानविज्ञानयोग:

मूलश्लोक:

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदु: कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ ७.२९॥

साधिभूताधिदैवं मां साधियज्ञं च ये विदु: ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतस: ॥७.३०॥

पदच्छेदः
जरामरणमोक्षाय माम् आश्रित्य यतन्ति ये ते ब्रह्म तत् विदु: कृत्स्नम् अध्यात्मं
कर्म च अखिलम् साधिभूताधिदैवं मां साधियज्ञं च ये विदु:
प्रयाणकाले अपि च मां ते विदुः युक्तचेतस:

पदपरिचय:
जरामरणमोक्षाय - अकार पु च एक
माम् - दकार त्रि द्वि एक
आश्रित्य - ल्यबन्तम्
यतन्ति - लट् प्रपु बहु
ये - दकार पु प्र बहु
ते - दकार पु प्र बहु
ब्रह्म - नकार नपु द्वि एक
तत् - दकार नपु द्वि एक
विदुः - लट् प्रपु बहु
कृत्स्नम् - अकार नपु द्वि एक
अध्यात्मं - अकार नपु द्वि एक

Downloaded from www.omkaravidya.com

कर्म - नकार नपु द्वि एक
च - अव्ययम्
अखिलम् - अकार नपु द्वि एक
साधिभूताधिदैवं - अकार नपु द्वि एक
मां - दकार त्रि द्वि एक
साधियज्ञं - अकार पु द्वि एक
च - अव्ययम्
ये - दकार पु प्र बहु
विदुः - लट् प्रपु बहु
प्रयाणकाले - अकार पु स बहु
अपि - अव्ययम्
च - अव्ययम्
मां - दकार त्रि द्वि एक
ते - दकार पु प्र बहु
विदुः - लट् प्रपु बहु
युक्तचेतसः - सकार पु प्र बहि

पदार्थः
जरामरणमोक्षाय - जरामरणमोक्षार्थम्
माम् - परमेश्वरम्
आश्रित्य - अवलम्ब्य
यतन्ति - प्रयतन्ते
ये - ये
ते - ते
ब्रह्म - परब्रह्म
तत् - तत्
विदुः - जानन्ति
कृत्स्नम् - समग्रम्

Downloaded from www.omkaravidya.com

अध्यात्मं - प्रत्यगात्मविषयं
कर्म - कर्तव्यम्
च - च
अखिलम् - समस्तम्
साधिभूताधिदैवं
मां - परमेश्वरम्
साधियज्ञं - अधियज्ञेन सह
च - च
ये - ये
विदुः - विदुः
प्रयाणकाले - मरणकाले
अपि - अपि
च - च
मां - परमेश्वरम्
ते - ते
विदुः - विदुः
युक्तचेतसः - समाहितचित्ताः

अन्वयः
ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति ते तत् ब्रह्म कृत्स्नं अध्यात्मं कर्म च अखिलं विदुः । ये च मां साधिभूताधिदैवं साधियज्ञं विदुः ते युक्तचेतसः प्रयाणकाले अपि मां विदुः ।

तात्पर्यम्
इमौ श्लोकौ श्रीमद्भगवद्गीतायां सप्तमे अध्याये नवविंशतितमः च त्रिंशत्तमः श्लोकौ। भगवान् श्रीकृष्णः "ये जरामरणमोक्षार्थं मां परमेश्वरं आश्रित्य यतन्ते यत् परं ब्रह्म तत् विदुः। ते तत् समस्तं प्रत्यगअत्मविषयं विदुः । ये

Downloaded from www.omkaravidya.com

साधिभूताधिदैवं साधियज्ञं च मां  विदुः ते युक्तचेतसः मरणकाले अपि  मां विदुः ।“ एवम् अवदत् ।

व्याकरणम्

▶सन्धिः

तत् + विदुः - जश्त्वसन्धिः

च + अखिलम् - सवर्णदीर्घसन्धिः

प्रयाणकाले + अपि -  पूर्वरूपसन्धिः

विदुः + युक्तचेतसः - विसर्गरेफः

▶समासः

जरा च मरणं च - जरामरणे - इतरेतरद्वन्द्वसमासः

जरामरणाभ्यां मोक्षः - जरामरणमोक्षः - पञ्चमीतत्पुरुषः

अधिभूतम् च अधिदैवम्  च - अधिभूताधिदैवम्   - समाहारद्वन्द्वसमासः

धिभूताधिदैवेन सह वर्तते इति साधिभूताधिदैवः - सहपूर्वपदकर्मधारयसमासः

प्रयाणस्य कालः - प्रयाणकालः - षष्ठीतत्पुरुषः - तस्मिन्

युक्तं चेतः यस्य सः युक्तचेतसः - समानाधिकरणबहुव्रीहिसमासः

▶कृदन्ताः

आश्रित्य - आ + श्रि + ल्यप् प्रत्ययः

श्रीमद्भगवद्गीता  - सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः ॥ ७ ॥

Downloaded from www.omkaravidya.com

पदच्छेदः

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगः नाम सप्तमः अध्यायः

पदपरिचयः
ॐ - अव् धातुः + मन् प्रत्ययः
तत् - दकार. नपु. पु एक
सत् - दकार. नपु. प्र एक
इति - अव्ययम्
श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु
उपनिषत्सु - दकार. स्त्री स बहु
ब्रह्मविद्यायां - आकार. स्त्री स एक
योगशास्त्रे - अकार. नपु. स. एक
श्रीकृष्णार्जुनसंवादे - अकार. पु. स. एक
ज्ञानविज्ञानयोगः- अकार. पु. प्र. एक
नाम - नकार.नपु. प्र एक
सप्तमः - अकार. पु. प्र एक
अध्यायः - अकार. पु. प्र एक

पदार्थः
ॐ - ओम्
तत् - तत्
सत् - सत्
इति - एवम्
श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु
उपनिषत्सु - उपनिषत्सु

Downloaded from www.omkaravidya.com

ब्रह्मविद्यायां - ब्रह्म पाठे
योगशास्त्रे - योगशास्त्रे
श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयो: मध्ये संवादे
ज्ञानविज्ञानयोग: - ज्ञानविज्ञानयोग:
नाम - नाम
सप्तम: - सप्तम:
अध्याय: - अध्याय:

अन्वयः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोग: नाम सप्तम: अध्याय: (संपूर्णम् भवति) ।

तात्पर्यम्
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोग: नाम सप्तम: अध्याय: (संपूर्णम् भवति)

व्याकरणम्
▶सन्धिः
श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धि:
योग: + नाम - विसर्ग उकार:
सप्तम: + अध्याय: - विसर्ग उकार: पूर्वरूपसन्धि:

▶ समासः
ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारय:

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता
# अष्टमोऽध्यायः
# अक्षरब्रह्मयोगः

Downloaded from www.omkaravidya.com

**मूलश्लोकः**

अर्जुन उवाच
किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ ८.१॥

अधियज्ञ: कथं कोऽत्र देहेऽस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभि: ॥८.२॥

**पदच्छेदः**

किं तत् ब्रह्म किम् अध्यात्मं किं कर्म पुरुषोत्तम अधिभूतं च किं प्रोक्तम् अधिदैवं किम् उच्यते अधियज्ञ: कथं क: अत्र देहे अस्मिन् मधुसूदन प्रयाणकाले च कथं ज्ञेय: असि नियतात्मभि:

**पदपरिचयः**

किं - मकार नपु प्र एक
तत् - दकार नपु प्र एक
ब्रह्म - नकार नपु प्र एक
किम् - मकार नपु प्र एक
अध्यात्मं - अकार नपु प्र एक
किं - मकार नपु प्र एक
कर्म - नकार नपु प्र एक
पुरुषोत्तम - अकार पु सं प्र
अधिभूतं - अकार नपु प्र एक

Downloaded from www.omkaravidya.com

च- अव्ययम्
किं - मकार नपु प्र एक
प्रोक्तम् - तकार नपु प्र एक
अधिदैवं - अकार नपु प्र एक
किम् - मकार नपु प्र एक
उच्यते - लट् कर्मणि प्रपु एक
अधियज्ञः - अकार पु प्र एक
कथं - अव्ययम्
कः - मकार पु प्र एक
अत्र - अव्ययम्
देहे - अकार पु स एक
अस्मिन् - मकार पु स एक
मधुसूदन - अकार पु सं प्र
प्रयाणकाले - अकार पु स एक
च - अव्ययम्
कथं - अव्ययम्
ज्ञेयः - अकार पु प्र एक
असि - लट् मपु एक
नियतात्मभिः - नकार पु तृ बहु

**पदार्थः**
किं - किम्
तत् - तत्
ब्रह्म -ब्रह्म
किम् - किम्
अध्यात्मं - अध्यात्मम्

Downloaded from www.omkaravidya.com

किं - किम्
कर्म - कर्म
पुरुषोत्तम - कृष्ण
अधिभूतं - अधिभूतं
च - च
किं - किम्
प्रोक्तम् - उक्तम्
अधिदैवं - अधिदैवम्
किम् - किम्
उच्यते - कथ्यते
अधियज्ञः - अधियज्ञः
कथं - कथम्
कः - कः
अत्र – अत्र
अस्मिन् – अस्मिन्
प्रयाणकाले – मरणकाले
कथं – कथम्
असि – असि
देहे – शरीरे
मधुसूदन – कृष्ण
च - च
ज्ञेयः - ज्ञेयः
नियतात्मभिः - संयतचित्तैः

**अन्वयः**

हे पुरुषोत्तम! तत् ब्रह्म किम् ? किम् अध्यात्मं ? किं कर्म ? किम् अधिभूतं च प्रोक्तम् ? अधिदैवं किम् उच्यते? ।

हे मधुसूदन! अत्र अस्मिन् देहे अधियज्ञः कः ? (सः) कथं ? प्रयाणकाले च नियतात्मभिः कथं ज्ञेयः असि? ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

इमौ श्लोकौ श्रीमद्भगवद्गीतायां अष्टमोऽध्याये प्रथमश्च द्वितीयश्च श्लोकौ । भगवान् श्रीकृष्णः "हे पुरुषोत्तम! तत् ब्रह्म किम् ? किम् अध्यात्मं ? किं कर्म ? अधिभूतं प्रोक्तम् किम् ? च अधिदैवं किम् उच्यते? । हे मधुसूदन! अत्र अस्मिन् देहे अधियज्ञः कः ? (सः) कथं ? प्रयाणकाले च नियतात्मभिः कथं ज्ञेयः असि?" एवं पृष्टवान् ।

व्याकरणम्

▶ सन्धिः

तत् + ब्रह्म - जश्त्वसन्धिः

कः + अत्र - विसर्गउकारः पूर्वरूपसन्धिः

देहे + अस्मिन् - पूर्वरूपसन्धिः

ज्ञेयः + अपि – विसर्गउकारः पूर्वरूपसन्धिः

▶ समासः

नियतः आत्मा येन सः - नियतात्मा - समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः

श्री भगवान् उवाच

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्मम् उच्यते ।

भूतभावोद्भवकरो विसर्गः कर्मसञ्ज्ञितः ॥ ८.३॥

Downloaded from www.omkaravidya.com

पदच्छेदः
अक्षरं ब्रह्म परमं स्वभावः अध्यात्मम् उच्यते भूतभावोद्भवकरः विसर्गः कर्मसञ्ज्ञितः

पदपरिचयः
अक्षरं - अकार नपु प्र एक
ब्रह्म - नकार नपु प्र एक
परमं - अकार नपु प्र एक
स्वभावः - अकार पु प्र एक
अध्यात्मम् - अकार नपु प्र एक
उच्यते - कर्मणि लट् प्रपु एक
भूतभावोद्भवकरः - अकार पु प्र एक
विसर्गः - अकार पु प्र एक
कर्मसञ्ज्ञितः अकार पु प्र एक

पदार्थः
अक्षरं - क्षररहितम्
ब्रह्म - ब्रह्म
परमं - देशकालवस्तुपरिच्छेदशून्यम्
स्वभावः - प्रत्यगात्मभावः
अध्यात्मम् - अध्यात्मम्
उच्यते - कथ्यते
भूतभावोद्भवकरः - भूतवस्तूत्पत्तिकरः
विसर्गः - द्रव्यपरित्यागः
कर्मसञ्ज्ञितः - कर्मनामकः

Downloaded from www.omkaravidya.com

अन्वयः
परमम् अक्षरं ब्रह्म स्वभाव: अध्यात्मम् उच्यते ।
भूतभावोद्भवकर: विसर्ग: कर्मसञ्ज्ञित: ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां अष्टमोऽध्याये  तृतीयश्लोक: । भगवान् श्रीकृष्ण: "देशकालवस्तुपरिच्छेदसून्यम् नाशरहितम् ब्रह्म स्वस्य प्रत्यक् आत्मा अध्यात्मम्" इति उक्तवान्  । भूतभावोद्भवकर; द्रव्यपरित्यागं कर्मसञ्ज्ञितम् इति उक्तवान् ।

व्याकरणम्
▶ सन्धिः
स्वभाव: + अध्यात्मम् - विसर्गउकार: पूर्वरूपसन्धि:
भूतभावोद्भवकर: + विसर्ग: - विसर्गउकार:
▶ समासः
भूतानां भाव: भूतभाव: - षष्ठीतत्पुरुष:
भूतभावस्य उद्भव: - भूतभावोद्भव: - षष्ठीतत्पुरुष:
भूतभावोद्भवं करोति - भूतभावोद्भवकर: - उपपदसमास:

श्रीमद्भगवद्गीता - अष्टमोऽध्याय: - अक्षरब्रह्मयोग:

मूलश्लोकः
अधिभूतं क्षरो भाव: पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥८.४॥

Downloaded from www.omkaravidya.com

पदच्छेदः
अधिभूतं क्षरः भावः पुरुषः च अधिदैवतम् अधियज्ञः अहम् एव अत्र देहे देहभृतां वर

पदपरिचयः
अधिभूतं - अकार नपु प्र एक
क्षरः - अकार पु प्र एक
भावः - अकार पु प्र एक
पुरुषः - अकार पु प्र एक
च - अव्ययम्
अधिदैवतम् - अकार नपु प्र एक
अधियज्ञः - अकार पु प्र एक
अहम् - दकार त्रि प्र एक
एव- अव्ययम्
अत्र - अव्ययम्
देहे - अकार पु स एक
देहभृतां - तकार पु ष बहु
वर - अकार पु सं प्र

पदार्थः
अधिभूतं - अधिभूतं
क्षरः - विनाशी
भावः - भावः
पुरुषः - विराड्पुरुषः
च - च
अधिदैवतम् - अधिदैवतम्

Downloaded from www.omkaravidya.com

अधियज्ञः - अधियज्ञ
अहम् - अहम्
एव - एव
अत्र - अत्र
देहे - शरीरे
देहभृतां - शरीरिणाम्
वर – श्रेष्ठ

अन्वयः
हे देहभृतां वर! क्षरः भावः अधिभूतं । पुरुषः च अधिदैवतम् । अत्र देहे अधियज्ञः अहम् एव ।
तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये चतुर्थ श्लोकः । भगवान् श्रीकृष्णः "हे देहभृतां वर! विनाशी भाव वस्तु अधिभूतम् इति उक्तवान् । विराट्पुरुषः अधिदैवतम् इति उक्तवान् । अस्मिन् देहे अहमेव अधियज्ञः ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
क्षरः + भावः - विसर्गउकारः
पुरुषः + च - विसर्गसकारः
च + अधिदैवतम् - सवर्णदीर्घसन्धिः
अधियज्ञः + अहम् - विसर्गउकारः पूर्वरूपसन्धिः
एव + अत्र -सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

मूलश्लोकः
यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥८.६॥

पदच्छेदः
यं यं वा अपि स्मरन् भावं त्यजति अन्ते कलेवरम् तं तम् एव एति कौन्तेय सदा तद्भावभावितः

पदपरिचयः
यं - दकार पु द्वि एक
यं - दकार पु द्वि एक
वा - अव्ययम्
अपि - अव्ययम्
स्मरन् - तकार पु प्र एक
भावं दकार पु द्वि एक
त्यजति - लट् प्रपु एक
अन्ते - अकार पु स एक
कलेवरम् दकार पु द्वि एक
तं - दकार पु द्वि एक
तम् - दकार पु द्वि एक
एव - अव्ययम्
एति - लट् प्रपु एक
कौन्तेय - अकार पु सं प्र
सदा - अव्ययम्

Downloaded from www.omkaravidya.com

तद्भावभावित: - अकार पु प्र एक

पदार्थः
यं - यम्
यं -यम्
वा - वा
अपि - अपि
स्मरन् - चिन्तयन्
भावं - देवताविशेषम्
त्यजति - परित्यजति
अन्ते - प्राणवियोगकाले
कलेवरम् - शरीरम्
तं - तम्
तम् - तम्
एव - एव
एति - प्राप्नोति
कौन्तेय - कौन्तेय
सदा - सर्वदा
तद्भावभावित: - तदनुसन्धान संस्कृतचित्त:

अन्वयः
हे कौन्तेय! अन्ते यं यं वा अपि भावं स्मरन् कलेवरम्
त्यजति (स:) सदा तद्भावभावित: तं तम् (भावं) एव एति ।

तात्पर्यम्

Downloaded from www.omkaravidya.com

अयं श्लोक: श्रीमद्भगवद्गीतायां अष्टमोऽध्याये  षष्ठः श्लोकः । भगवान् श्रीकृष्णः "कौन्तेय! अन्ते यं यं देवताविशेषं चिन्तयन् प्राणवियोगकाले शरीरं परित्यजति  तं तम् एव स्मृतं भावम् एति ।" एवम् अवदत् ।

व्याकरणम्

▶ सन्धिः

त्यजति + अन्ते - यण्सन्धिः

एव + एति - वृद्धिसन्धिः

▶ समासः

तस्मिन् भावः तद्भावः - सप्तमीतत्पुरुषः

तद्भावेन भावितः - तद्भावभावितः तृतीयातत्पुरुषः

श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।

मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥ ८.७॥

पदच्छेदः

तस्मात् सर्वेषु कालेषु माम् अनुस्मर युध्य च मयि अर्पितमनोबुद्धिः माम् एव एष्यसि असंशयः

Downloaded from www.omkaravidya.com

पदपरिचयः

तस्मात्   - दकार पु प एक

सर्वेषु - अकार पु स बहु

कालेषु अकार पु स बहु

माम् - दकार त्रि द्वि एक

अनुस्मर - लोट् मपु एक

युध्य - लोट् मपु एक

च - अव्ययम्

मयि - दकार त्रि स एक

अर्पितमनोबुद्धिः - इकार पु प्र एक

माम् - दकार त्रि द्वि एक

एव - अव्ययम्

एष्यसि - लृट् मपु एक

असंशयः -  अकार पु प्र एक

पदार्थः

तस्मात् - तस्मात्

सर्वेषु - सकलेषु

कालेषु - समयेषु

माम् - माम्

अनुस्मर - चिन्तय

युध्य - युद्धम् कुरु

च - च

मयि - मयि

अर्पितमनोबुद्धिः - समर्पितचित्तः

माम् - माम्

Downloaded from www.omkaravidya.com

एव - एव
एष्यसि - आगमिष्यसि
असंशय: - असंशय:

अन्वयः
तस्मात् सर्वेषु कालेषु माम् अनुस्मर युध्य च । मयि अर्पितमनोबुद्धिः माम् एव एष्यसि । असंशय:।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां अष्टमोऽध्याये सप्तमश्लोक: । भगवान् श्रीकृष्ण: “तस्मात् सर्वेषु कालेषु माम् अनुस्मर । युद्धं कुरु । मय्यर्पितमनोबुद्धिः सन् मामेव यथास्मृतं एष्यसि । अत्र असंशय: विद्यते ।“ एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
मयि + अर्पितमनोबुद्धिः - यण्सन्धि:
अर्पितमनोबुद्धिः + माम् - विसर्गरेफ:
एव + एष्यसि - वृद्धिसन्धि:
एष्यसि + असंशय: - यण्सन्धि:

▶ समासः
मन: च बुद्धि: च - मनोबुद्धी - द्वन्द्वसमास:
मयि अर्पिते मनोबुद्धिः येन स: मय्यर्पितमनोबुद्धिः व्यधिकरणबहुव्रीहिसमास:
न संशय: - असंशय: - नञ्तत्पुरुष:

Downloaded from www.omkaravidya.com

मूलश्लोकः
अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ ८.८॥

पदच्छेदः
अभ्यासयोगयुक्तेन चेतसा न अन्यगामिना परमं पुरुषं दिव्यं याति पार्थ अनुचिन्तयन्

पदपरिचयः
अभ्यासयोगयुक्तेन - अकार पु तृ एक
चेतसा - सकार नपु तृ एक
न - अव्ययम्
अन्यगामिना - नकार पु तृ एक
परमं - अकार पु द्वि एक
पुरुषं - अकार पु द्वि एक
दिव्यं - अकार पु द्वि एक
याति - लट प्रपु एक
पार्थ - अकार पु सं प्र
अनुचिन्तयन् - तकार पु प्र एक

पदार्थः
अभ्यासयोगयुक्तेन - अभ्यासयोगयुक्तेन
चेतसा - मनसा

Downloaded from www.omkaravidya.com

न - न
अन्यगामिना - अन्यगतेन
परमं - निरतिशयम्
पुरुषं - पुरुषं
दिव्यं - प्रकाशम्
याति - प्राप्नोति
पार्थ - अर्जुन
अनुचिन्तयन् - अनुध्यायन्
अन्वयः
हे पार्थ! न अन्यगामिना अभ्यासयोगयुक्तेन चेतसा दिव्यं परमं
पुरुषं अनुचिन्तयन् याति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये अष्टमः श्लोकः । भगवान् श्रीकृष्णः
"हे पार्थ! न अन्यगामिना अभ्यासयोगयुक्तेन चेतसा दिव्यं परमं
पुरुषं अनुचिन्तयन् याति ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
न + अन्यगामिना -सवर्णदीर्घसन्धिः
पार्थ + अनुचिन्तयन्- सवर्णदीर्घसन्धिः
▶ समासः
अभ्यासः एव योगः- अभ्यासयोगः -अवधारणापूर्वपदकर्मधारयसमासः
अभ्यासयोगेन युक्तः - अभ्यासयोगयुक्तः - तृतीयातत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः
कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात् ॥८.९॥

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम् ॥ ८.१०॥

पदच्छेदः
कविं पुराणम् अनुशासितारम् अणोः अणीयांसम् अनुस्मरेत् यः
सर्वस्य धातारम अचिन्त्यरूपम् आदित्यवर्णं तमसः परस्तात् प्रयाणकाले मनसा अचलेन भक्त्या युक्तः योगबलेन च एव  भ्रुवोः मध्ये प्राणम् आवेश्य सम्यक् सः तं परं पुरुषम् उपैति दिव्यम्

पदपरिचयः
कविं - इकार पु द्वि एक
पुराणम् - अकार पु द्वि एक
अनुशासितारम् - ऋकार पु द्वि एक
अणोः - उकार पु प एक
अणीयांसम् - सकार पु द्वि एक
अनुस्मरेत्- विधि प्रपु एक
यः - दकार पु प्र एक
सर्वस्य अकार पु ष एक
धातारम् - ऋकार पु द्वि एक
अचिन्त्यरूपम् - अकार पु द्वि एक

Downloaded from www.omkaravidya.com

आदित्यवर्णं - अकार पु द्वि एक
तमसः - सकार नपु प एक
परस्तात् - अव्ययम्
प्रयाणकाले - अकार पु स एक
मनसा - सकार नपु तृ एक
अचलेन - अकार नपु तृ एक
भक्त्या - इकार स्त्री तृ एक
युक्तः - अकार पु प्र एक
योगबलेन - अकार नपु तृ एक
च - अव्ययम्
एव - अव्ययम्
भ्रुवोः - ईकार स्त्री ष द्वि
मध्ये - अकार नपु स एक
प्राणम् - अकार पु द्वि एक
आवेश्य - ल्यबन्तम्
सम्यक् - अव्ययम्
सः - दकार पु प्र एक
तं - दकार पु द्वि एक
परं - अकार पु द्वि एक
पुरुषम् - अकार पु द्वि एक
उपैति लट् प्रपु एक
दिव्यम् - अकार पु द्वि एक

पदार्थः
कविं - क्रान्तदर्शिनं सर्वज्ञं
पुराणम् - चिरन्तनम्

Downloaded from www.omkaravidya.com

अनुशासितारम् - जगन्नियाकम्
अणोः - सूक्ष्मात्
अणीयांसम् - सूक्ष्मतरम्
अनुस्मरेत् - अनुचिन्तयेत्
यः कश्चित्
सर्वस्य - सकलस्य
धातारम् - रक्षकम्
अचिन्त्यरूपम् - दुर्ज्ञेयरूपम्
आदित्यवर्णं - - सूर्यसमानवर्णम्
तमसः - अन्धकारात्
परस्तात् - परस्तात्
प्रयाणकाले - मरणकाले
मनसा - मनसा
अचलेन - चलनवर्जितेन
भक्त्या - भक्त्या
युक्तः - युक्तः
योगबलेन - योगबलेन
च - च
एव - एव
भ्रुवोः - भ्रुवोः
मध्ये - मध्ये
प्राणम् - प्राणम्
आवेश्य - संस्थाप्य
सम्यक् - सम्यक्
सः - सः
तं - तम्

Downloaded from www.omkaravidya.com

परं -निरतिशयम्
पुरुषम् -पुरुषम्
उपैति - प्राप्नोति
दिव्यम् – दिव्यम्

अन्वयः
यः कविं पुराणं अनुशासितारं अणोः अणीयांसं सर्वस्य धातारम् अचिन्त्यरूपम् आदित्यवर्णं तमसः परस्तात् अनुस्मरेत् सः प्रयाणकाले भक्त्या युक्तः अचलेन मनसा योगबलेन च एव भ्रुवोः मध्ये प्राणं सम्यक् आवेश्य दिव्यम् तं परं उपैति ।

तात्पर्यम्
इमौ श्लोकौ श्रीमद्भगवद्गीतायां अष्टमोऽध्याये नवमः च दशमः श्लोकौ । भगवान् श्रीकृष्णः “यः कविं पुराणं अनुशासितारं अणोः अणीयांसं सर्वस्य धातारम् अचिन्त्यरूपम् आदित्यवर्णं तमसः परस्तात् अनुस्मरेत् सः प्रयाणकाले भक्त्या युक्तः अचलेन मनसा योगबलेन च एव भ्रुवोः मध्ये प्राणं सम्यक् आवेश्य दिव्यम् तं परं उपैति ।“ एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
अणोः + अणीयांसम् - विसर्गरेफः
मनसा + अचलेन - सवर्णदीर्घसन्धिः
युक्तः + योगबलेन - विसर्गउकारः
च + एव - वृद्धिसन्धिः
भ्रुवोः + मध्ये - विसर्गरेफः
सः + तम् - विसर्गलोपः

Downloaded from www.omkaravidya.com

▶ समासः

अचिन्त्यं रूपं यस्य सः - अचिन्त्यरूपः - समानाधिकरणबहुव्रीहिसमासः

आदित्यस्य वर्णः इव वर्णः यस्य सः - आदित्यवर्णः

▶ कृदन्ताः

आवेश्य - आ + विश् + ल्यप् प्रत्ययः

श्री कृष्णार्पणमस्तु

## श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।

यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥८.११॥

पदच्छेदः

यत् अक्षरं वेदविदः वदन्ति विशन्ति यत् यतयः वीतरागाः यत् इच्छन्तः ब्रह्मचर्यं चरन्ति तत् ते पदं संग्रहेण प्रवक्ष्ये

पदपरिचयः

यत् - दकार नपु द्वि एक

अक्षरं - अकार नपु द्वि एक

वेदविदः - तकार पु प्र बहु

वदन्ति - लट् प्रपु बहु

विशन्ति - लट् प्रपु बहु

Downloaded from www.omkaravidya.com

यत् दकार नपु द्वि एक
यतयः - इकार पु प्र बहु
वीतरागाः - अकार पु प्र बहु
यत् दकार नपु द्वि एक
इच्छन्तः - तकार पु प्र वहु
ब्रह्मचर्यं - अकार नपु द्वि एक
चरन्ति - लट् प्रपु एक
तत् दकार नपु द्वि एक
ते - दकार पु च एक
पदं - अकार नपु द्वि एक
संग्रहेण -अकार पु तृ एक
प्रवक्ष्ये - लृट् उपु एक

पदार्थः
यत् - यत्
अक्षरं - अविनाशि
वेदविदः - वेदार्थज्ञाः
वदन्ति - कथयन्ति
विशन्ति - प्रविशन्ति
यत् - यत्
यतयः - यत्नशीलाः
वीतरागाः - नष्टाभिलाषाः
यत् - यत्
इच्छन्तः - स्पृहयन्तः
ब्रह्मचर्यं - ब्रह्मचर्यं
चरन्ति -  आचरन्ति

Downloaded from www.omkaravidya.com

तत् - तत्
ते - तुभ्यम्
पदं - पदम्
संग्रहेण - संक्षेपेण
प्रवक्ष्ये – कथयिष्यामि

अन्वयः
वेदविदः यत् अक्षरं वदन्ति वीतरागाः यतयः यत् विशन्ति यत् इच्छन्तः ब्रह्मचर्यं चरन्ति तत् पदं ते संग्रहेण प्रवक्ष्ये ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये एकादशः श्लोकः । भगवान् श्रीकृष्णः "वेदार्थज्ञाः यत् अविनाशि इति वदन्ति कामक्रोधरहिताः संन्यासिनः यत् प्रविशन्ति यत् इच्छन्तः ब्रह्मचर्यं चरन्ति तत् पदं तुभ्यं संक्षेपेण कथयिष्यामि ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
यत् + अक्षरम् - जश्त्वसन्धिः
वेदविदः + वदन्ति - विसर्गउकारः
यत् + यतयः - जश्त्वसन्धिः
यतयः + वीतरागाः - विसर्गउकारः
यत् + इच्छन्तः - जश्त्वसन्धिः
इच्छन्तः + ब्रह्मचर्यम् - विसर्गउकारः
▶ समासः
विगतः रागः येभ्यः ते - वीतरागाः - समानाधिकरणबहुव्रीहिसमासः
वेदं विदन्ति इति वेदविदः - उपपदसमासः

Downloaded from www.omkaravidya.com

## श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥१२॥

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥१३॥

पदच्छेदः

सर्वद्वाराणि संयम्य मनः हृदि निरुध्य च मूर्ध्नि आधाय आत्मनः प्राणम् आस्थितः योगधारणाम् ओम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् यः प्रयाति त्यजत् देहं सः याति परमां गतिम्

पदपरिचयः

सर्वद्वाराणि - अकार नपु द्वि बहु
संयम्य - ल्यबन्तम्
मनः - सकार नपु द्वि एक
हृदि - दकार नपु स एक
निरुध्य - ल्यबन्तम्
च - अव्ययम्
मूर्ध्नि - नकार पु स एक
आधाय - ल्यबन्तम्
आत्मनः - नकार पु ष एक
प्राणम् - अकार पु द्वि एक
आस्थितः - तकार पु प्र एक

Downloaded from www.omkaravidya.com

योगधारणाम् - आकार स्त्री द्वि एक

ओम् - अव्ययम्

इति - अव्ययम्

एकाक्षरं - अकार नपु द्वि एक

ब्रह्म - नकार नपु द्वि एक

व्याहरन् - तकार पु प्र एक

माम् - दकार त्रि द्वि एक

अनुस्मरन् - तकार पु प्र एक

यः - दकार पु प्र एक

प्रयाति - लट् प्रपु एक

त्यजन्  - तकार पु प्र एक

देहं - अकार पु द्वि एक

सः - दकार पु प्र एक

याति - लट् प्रपु एक

परमां - आकार स्त्री द्वि एक

गतिम् - इकार स्त्री द्वि एक

पदार्थः

सर्वद्वाराणि -सकलेन्द्रियाणि

संयम्य - निगृह्य

मनः -चित्तम्

हृदि - हृदि

निरुध्य -   निरुध्य

च - च

मूर्ध्नि - शिरशि

आधाय - स्थापयित्वा

Downloaded from www.omkaravidya.com

आत्मनः - स्वस्य
प्राणम् - वायुम्
आस्थितः - आस्थितः
योगधारणाम् -   योगधारणाम्
ओम् - औम्
इति - इति
एकाक्षरं - एकाक्षरं
ब्रह्म - ब्रह्म
व्याहरन् - उच्चारयन्
माम् - माम्
अनुस्मरन् - अनुचिन्तयन्
यः - यः
प्रयाति - गच्छति
त्यजन् - मुञ्चन्
देहं - शरीरम्
सः - सः
याति - प्राप्नोति
परमां - श्रेष्टाम्
गतिम् – मार्गम्

अन्वयः

सर्वद्धाराणि संयम्य मनः हृदि निरुध्य आत्मनः प्राणम् मूर्ध्नि आधाय योगधारणाम् आस्थितः  ओम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् यः  देहं त्यजन् प्रयाति सः  परमां गतिम् याति ।

Downloaded from www.omkaravidya.com

तात्पर्यम्
इमौ श्लोकौ श्रीमद्भगवद्गीतायां अष्टमोऽध्याये द्वादशः त्रयोदशः च श्लोकौ।
भगवान् श्रीकृष्णः "सर्वद्वाराणि संयम्य मनः हृदि निरुध्य आत्मनः प्राणम् मूर्ध्नि आधाय योगधारणाम् आस्थितः ओम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् यः देहं त्यजन् प्रयाति सः परमां गतिम् याति ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
मनः + हृदि - विसर्गउकारः
मूर्ध्नि + आधाय - यण्सन्धिः
आधाय + आत्मनः - सवर्णदीर्घसन्धिः
अवस्थितः + योगाधारयन् - विसर्गउकारः
सः + याति - विसर्गलोपः

▶ समासः
सर्वाणि च तानि द्वाराणि च - विशेषणपूर्वपाकर्मधारयसमासः

▶ कृदन्ताः
संयम्य - सम् + यम् + ल्यप् प्रत्ययः
निरुध्य - नि + रुध् + ल्यप् प्रत्ययः
आधाय - आ + धा + ल्यप् प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥१४॥

पदच्छेदः
अनन्यचेताः सततं यः मां स्मरति नित्यशः तस्य अहं सुलभः पार्थ नित्ययुक्तस्य योगिनः

पदपरिचयः
अनन्यचेताः - नकार पु प्र एक
सततं - अव्ययम्
यः - दकार पु प्र एक
मां - दकार त्रि द्वि एक
स्मरति - लट प्रपु एक
नित्यशः  अव्ययम्
तस्य - दकार पु ष एक
अहं - दकार त्रि प्र एक
सुलभः - अकार पु प्र एक
पार्थ - अकार पु सं प्र
नित्ययुक्तस्य - अकार पु ष एक
योगिनः - नकार पु ष एक

पदार्थः

Downloaded from www.omkaravidya.com

अनन्यचेता: - अनन्यमनस्क:
सततं - सर्वदा
य: - य:
मां - माम्
स्मरति - चिन्तयति
नित्यश: - प्रतिदिनम्
तस्य - तस्य
अहं - अहम्
सुलभ: - सुलभ:
पार्थ - अर्जुन
नित्ययुक्तस्य - नित्ययुक्तस्य
योगिन: - योगवत:

अन्वयः
हे पार्थ! अनन्यचेता: य: मां नित्यश: सततं स्मरति तस्य नित्ययुक्तस्य योगिन: अहं सुलभ: ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां अष्टमोऽध्याये चतुर्दश: श्लोक: । भगवान् श्रीकृष्ण: "हे अर्जुन अनन्यचेता: य: मां नित्यश: सततं स्मरति तस्य नित्ययुक्तस्य योगिन: अहं सुलभ: ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
य: + माम् - विसर्गउकार:
तस्य + अहम् - सवर्णदीर्घसन्धि:

Downloaded from www.omkaravidya.com

▶ समासः

अन्यस्मिन् चेतः यस्य सः - अन्यचेताः  समानाधिकरणबहुव्रीहिसमासः

अनन्यचेताः - न अन्यचेताः - नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥८.१५॥

पदच्छेदः

माम् उपेत्य पुनः जन्म दुःखालयम् अशाश्वतम् न आप्नुवन्ति महात्मानः संसिद्धिं परमां गताः

पदपरिचयः

माम् - दकार त्रि द्वि एक
उपेत्य - ल्यबन्तम्
पुनः - अव्ययम्
जन्म - नकार नपु द्वि एक
दुःखालयम् - अकार नपु द्वि एक
अशाश्वतम् - अकार नपु द्वि एक
न - अव्ययम्
आप्नुवन्ति - लट् प्रपु बहु
महात्मानः - नकार पु प्र बहु

Downloaded from www.omkaravidya.com

संसिद्धिं - इकार स्त्री द्वि एक
परमां - आकार स्त्री द्वि एक
गताः - अकार पु प्र बहु

पदार्थः
माम् - ईश्वरम्
उपेत्य - प्राप्य
पुनः - भूयः
जन्म - जन्म
दु:खालयम् - दु:खालयम्
अशाश्वतम् - अनित्यम्
न - न
आप्नुवन्ति - प्राप्नुवन्ति
महात्मानः - योगिनः
संसिद्धिं - मोक्षम्
परमां - श्रेष्ठाम्
गताः - प्राप्ताः

अन्वयः
महात्मानः माम् उपेत्य परमां संसिद्धिं गताः दु:खालयम् अशाश्वतम् पुनः जन्म न आप्नुवन्ति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये पञ्चदशः श्लोकः । भगवान् श्रीकृष्णः "महात्मानः माम् उपेत्य परमां संसिद्धिं गताः दु:खालयम् अशाश्वतम् पुनः जन्म न आप्नुवन्ति ।" एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

पुनः + जन्म - विसर्गरेफः

न + आप्नुवन्ति - सवर्णदीर्घसन्धिः

▶ समासः

दुः खानाम् आलयम् - दुःखालयम् - षष्ठीतत्पुरुषः

अशाश्वतम् - न शाश्वतम् - नञ् तत्पुरुषः

▶ कृदन्ताः

उपेत्य - उप + इ + ल्यप् प्रत्ययः

## श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥८.१६॥

पदच्छेदः

आब्रह्मभुवनात् लोकाः पुनरावर्तिनः अर्जुन माम् उपेत्य तु कौन्तेय पुनः जन्म न विद्यते

पदपरिचयः

आब्रह्मभुवनात् - अकार नपु प एक

लोकाः - अकार पु प्र बहु

Downloaded from www.omkaravidya.com

पुनरावर्तिनः -  नकार पु प्र बहु
अर्जुन - अकार पु सं प्र
माम् - दकार त्रि द्वि एक
उपेत्य - ल्यबन्तम्
तु - अव्ययम्
कौन्तेय - अकार पु सं प्र
पुनः - अव्ययम्
जन्म - नकार नपु द्वि एक
न - अव्ययम्
विद्यते - लट् प्रपु एक

पदार्थः
आब्रह्मभुवनात् - ब्रह्मलोकपर्यन्तम्
लोकाः - भुवनानि
पुनरावर्तिनः - आवर्तनशीलानि
अर्जुन - अर्जुन
माम् - ईश्वरम्
उपेत्य - प्राप्य
तु - तु
कौन्तेय - अर्जुन
पुनः - भूयः
जन्म - उत्पत्तिः
न - न
विद्यते - भवति

Downloaded from www.omkaravidya.com

अन्वयः

हे अर्जुन! आब्रह्मभुवनात् लोकाः पुनरावर्तिनः हे कौन्तेय! माम् उपेत्य तु पुनः जन्म न विद्यते ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये षोडशः श्लोकः । भगवान् श्रीकृष्णः "हे अर्जुन ! ब्रह्मलोकतः सर्वलोकाः पुनरावर्तिनस्वभावाः । हे कौन्तेय! माम् उपेत्य तु पुनः जन्म न विद्यते ।" एवम् अवदत् ।

व्याकरणम्

▶ सन्धिः

आब्रह्मभुवनात् + लोकाः - परसवर्णसन्धिः

पुनरावर्तिनः + अर्जुन - विसर्गउकारः पूर्वरूपसन्धिः

पुनः + जन्म - विसर्गरेफः

▶ समासः

ब्रह्मणः भुवनम् - ब्रह्मभुवनम् - षष्ठीतत्पुरुषः तस्मात्

▶ कृदन्ताः

उपेत्य - उप + इ + ल्यप् प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः
सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥ ८.१७॥

पदच्छेदः
सहस्रयुगपर्यन्तम् अहः यत् ब्रह्मणः विदुः रात्रिं युगसहस्रान्तां ते अहोरात्रविदः जनाः

पदपरिचयः
सहस्रयुगपर्यन्तम् - अकार पु द्वि एक
अहः - अकार नपु द्वि एक
यत् - दकार नपु द्वि एक
ब्रह्मणः - नकार पु ष एक
विदुः - लट् प्रपु बहु
रात्रिं - इकार स्त्री द्वि एक
युगसहस्रान्तां - अाकार स्त्री द्वि एक
ते - दकार पु प्र बहु
अहोरात्रविदः - दकार पु प्र बहु
जनाः - अकार पु प्र बहु

पदार्थः
सहस्रयुगपर्यन्तम् - सहस्रयुगपर्यन्तम्
अहः - दिनम्
यत् - यत्

Downloaded from www.omkaravidya.com

ब्रह्मणः - प्रजापतेः
विदुः - जानन्ति
रात्रिं - निशाम्
युगसहस्रान्तां - युगसहस्रान्ताम्
ते - ते
अहोरात्रविदः - कालसंख्याविदः
जनाः - जनाः

अन्वयः
अहोरात्रविदः जनाः यत् ब्रह्मणः अहः सहस्रयुगपर्यन्तम् (इति) विदुः ते रात्रिं युगसहस्रान्तां (इति) विदुः ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये सप्तदशः श्लोकः । भगवान् श्रीकृष्णः "अहोरात्रविदः जनाः यत् ब्रह्मणः अहः सहस्रयुगपर्यन्तम् (इति) विदुः ते रात्रिं युगसहस्रान्तां (इति) विदुः ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
अहः + यत् - विसर्गरेफः
यत् + ब्रह्मणः - जश्त्वसन्धिः
ब्रह्मणः + विदुः - विसर्गउकारः
ते + अहोरात्रविदः- पूर्वरूपसन्धिः
अहोरात्रविदः + जनाः - विसर्गउकारः

▶ समासः

Downloaded from www.omkaravidya.com

सहस्रयुगानि पर्यन्तः यस्य तत्    - सहस्रयुगपर्यन्तम्
समानाधिकरणबहुव्रीहिसमासः - तम्
युगसहस्रं अन्तः यस्याः सा - युगसहस्रान्ता - व्यधिकरणबहुव्रीहिसमासः - ताम्
अहःच  रात्रिः च - अहोरात्रम् - समाहारद्वन्द्वसमासः
अहोरात्रं विदन्ति इति - अहोरात्रविदः - उपपदसमासः

## श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः
अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥८.१८॥

पदच्छेदः
अव्यक्तात् व्यक्तयः सर्वाः प्रभवन्ति अहरागमे रात्र्यागमे प्रलीयन्ते तत्र एव अव्यक्तसंज्ञके

पदपरिचयः
अव्यक्तात् - अकार नपु प एक
व्यक्तयः - इकार स्त्री प्र बहु
सर्वाः - आकार स्त्री प्र बहु
प्रभवन्ति - लट् प्रपु बहु
अहरागमे - अकार पु स एक
रात्र्यागमे - अकार पु स एक
प्रलीयन्ते - लट् प्रपु बहु

Downloaded from www.omkaravidya.com

तत्र - अव्ययम्
एव - अव्ययम्
अव्यक्तसंज्ञके - अकार पु स एक

पदार्थः
अव्यक्तात् - कारणीभूतात्
व्यक्तय: - स्थावरजङ्गमानि
सर्वा: - सकला:
प्रभवन्ति - जायन्ते
अहरागमे - दिनारम्भे
रात्र्यागमे - निशारम्भे
प्रलीयन्ते - प्रलीयन्ते
तत्र - तत्र
एव - एव
अव्यक्तसंज्ञके - अव्यक्तनामके

अन्वयः
अहरागमे अव्यक्तात् सर्वा: व्यक्तय: प्रभवन्ति । रात्र्यागमे अव्यक्तसंज्ञके तत्र एव प्रलीयन्ते ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां अष्टमोऽध्याये अष्टादश: श्लोक: । भगवान् श्रीकृष्ण: “अहरागमे अव्यक्तात् सर्वा: व्यक्तय: प्रभवन्ति ।रात्र्यागमे अव्यक्तसंज्ञके तत्र एव प्रलीयन्ते ।“ एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

अव्यक्तात् + व्यक्तय: - जश्त्वसन्धि:

प्रभवन्ति + अहरागमे - यण्सन्धि:

तत्र + एव - वृद्धिसन्धि:

एव + अव्यक्तसंज्ञके - सवर्णदीर्घसन्धि:

▶ समासः

अह्न: आगम: अहरागम: - तस्मिन् षष्ठीतत्पुरुष:

रात्र्या: आगम: रात्र्यागम: - तस्मिन् षष्ठीतत्पुरुष:

श्रीमद्भगवद्गीता - अष्टमोऽध्याय: - अक्षरब्रह्मयोग:

मूलश्लोकः

भूतग्राम: स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवश: पार्थ प्रभवत्यहरागमे ॥ ८.१९॥

पदच्छेदः

भूतग्राम: स: एव अयं भूत्वा भूत्वा प्रलीयते रात्र्यागमे अवश: पार्थ प्रभवति अहरागमे

पदपरिचयः

भूतग्राम: - अकार पु प्र एक

स: - दकार पु प्र एक

एव - अव्ययम्

अयं - मकार पु प्र एक

Downloaded from www.omkaravidya.com

भूत्वा - क्त्वान्तम्
भूत्वा - क्त्वान्तम्
प्रलीयते - लट् प्रपु एक
रात्र्यागमे - अकार पु स एक
अवशः - अकार पु प्र एक
पार्थ - अकार पु सं प्र
प्रभवति - लट् प्रपु एक
अहरागमे - अकार पु स एक

पदार्थः
भूतग्रामः - भूतसमुदायः
सः - सः
एव - एव
अयं - एषः
भूत्वा - जनित्वा
भूत्वा - जनित्वा
प्रलीयते - प्रलीयते
रात्र्यागमे -रात्र्यागमे
अवशः - अवशः
पार्थ - अर्जुन
प्रभवति - जायते
अहरागमे - अहरागमे

अन्वयः
हे पार्थ! सः एव अयं भूतग्रामः भूत्वा भूत्वा अवशः रात्र्यागमे प्रलीयते।
अहरागमे (अवशः) प्रभवति ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये नवदशः  श्लोकः । भगवान् श्रीकृष्णः "हे पार्थ! सः  एव अयं भूतग्रामः भूत्वा भूत्वा अवशः रात्र्यागमे प्रलीयते। अहरागमे (अवशः) प्रभवति ।" एवम् अवदत् ।

व्याकरणम्

▶ सन्धिः

सः + एव - विसर्गलोपः

एव + अयम - सवर्णदीर्घसन्धिः

रात्र्यागमे + अवशः - पूर्वरूपसन्धिः

प्रभवति + अहरागमे - यण्सन्धिः

▶ समासः

भूतानाम् ग्रामः - भूतग्रामः - षष्ठीतत्पुरुषः

अवशः - न वशः - नञ् तत्पुरुषः

▶ कृदन्ताः

भूत्वा - भू + क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः

परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः ।<br>
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ ८.२०॥

Downloaded from www.omkaravidya.com

पदच्छेदः

परः तस्मात् तु  भावः अन्यः अव्यक्तः अव्यक्तात् सनातनः यः सः सर्वेषु भूतेषु नश्यत्सु न विनश्यति

पदपरिचयः

परः - अकार पु प्र एक

तस्मात् - दकार नपु प एक

तु  - अव्ययम्

भावः - अकार पु प्र एक

अन्यः - अकार पु प्र एक

अव्यक्तः - अकार पु प्र एक

अव्यक्तात् - अकार नपु प एक

सनातनः - अकार पु प्र एक

यः - दकार पु प्र एक

सः- दकार पु प्र एक

सर्वेषु - अकार पु स बहु

भूतेषु - अकार पु स बहु

नश्यत्सु - तकार पु स बहु

न - अव्ययम्

विनश्यति - लट् प्रपु एक

पदार्थः

परः - श्रेष्ठः

तस्मात् - तस्मात्

तु  - तु

भावः - भावः

Downloaded from www.omkaravidya.com

अन्यः - इतरः

अव्यक्तः -अव्यक्तः

अव्यक्तात् -अव्यक्तात्

सनातनः - सनातनः

यः -यः

सः- सः

सर्वेषु - सकलेषु

भूतेषु - भूतेषु

नश्यत्सु - नश्यति चेत्

न - न

विनश्यति - नश्यति

अन्वयः

यः तस्मात् अव्यक्तात् अन्यः परः अव्यक्तः सनातनः भावः (अस्ति) सः सर्वेषु भूतेषु नश्यत्सु (सति) न विनश्यति ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये विंशतितिमः श्लोकः । भगवान् श्रीकृष्णः " यः तस्मात् अव्यक्तात् अन्यः परः अव्यक्तः सनातनः भावः अस्ति सः सर्वेषु भूतेषु नश्यत्सु (सति) न विनश्यति ।" एवम् अवदत् ।

व्याकरणम्

▶ सन्धिः

परः + तस्मात् - विसर्गसकारः

भावः + अन्यः - विसर्गउकारः

अन्यः + अव्यक्तः -विसर्गउकारः पूर्वरूपसन्धिः

Downloaded from www.omkaravidya.com

अव्यक्तः + अव्यक्तात् - विसर्गउकारः  पूर्वरूपसन्धिः
सः + सर्वेषु - विसर्गलोपः

▶ समासः
अव्यक्तः - न व्यक्तः - नञ्तत्पुरुषः

## श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ ८.२१॥

पदच्छेदः
अव्यक्तः अक्षरः इति उक्तः तम् आहुः परमां गतिम् यं प्राप्य न निवर्तन्ते तत् धाम परमं मम

पदपरिचयः
अव्यक्तः - अकार पु प्र एक
अक्षरः -  अकार पु प्र एक
इति - अव्ययम्
उक्तः - अकार पु प्र एक
तम् -  दकार पु द्वि एक
आहुः - लट् प्रपु बहु
परमां - आकार स्त्री द्वि एक
गतिम् - इकार स्त्री द्वि एक

Downloaded from www.omkaravidya.com

यं - दकार पु द्वि एक
प्राप्य - ल्यबन्तम्
न - अव्ययम्
निवर्तन्ते - लट् प्रपु बहु
तत् - दकार नपु प्र एक
धाम - नकार नपु प्र एक
परमं - अकार नपु प्र एक
मम - दकार पु ष एक

पदार्थः
अव्यक्तः - अव्यक्तः
अक्षरः - अक्षरः
इति - एवम्
उक्तः - कथितः
तम् - तम्
आहुः - वदन्ति
परमां - श्रेष्ठाम्
गतिम् - गतिम्
यं - यम्
प्राप्य - संप्राप्य
न - न
निवर्तन्ते - प्रत्यागच्छन्ति
तत् - तत्
धाम - स्थानम्
परमं - उत्कृष्टम्
मम - मे

Downloaded from www.omkaravidya.com

अन्वयः
अव्यक्तः अक्षरः इति उक्तः तम्  परमां गतिम् आहुः । यं प्राप्य न निवर्तन्ते  तत् मम परमं  धाम

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये  एकविंशतितमः श्लोकः । भगवान् श्रीकृष्णः "अव्यक्तः अक्षरः इति उक्तः तम्  परमां गतिम् आहुः । यं प्राप्य न निवर्तन्ते  तत् मम परमं  धाम ।" एवं अवदत् ।

व्याकरणम्
▶ सन्धिः
अव्यक्तः + अक्षरः - विसर्गउकारः पूर्वरूपसन्धिः
इति + उक्तः - यण्सन्धिः
उक्तः + तम् - विसर्गसकारः

▶ कृदन्ताः
प्राप्य - प्र + आप् + ल्यप् प्रत्ययः

श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः
पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तः स्थानि भूतानि येन सर्वमिदं ततम् ॥८.२२॥

Downloaded from www.omkaravidya.com

पदच्छेदः
पुरुषः सः परः पार्थ भक्त्या लभ्यः तु अनन्यया यस्य अन्तः स्थानि भूतानि येन सर्वम् इदं ततम्

पदपरिचयः
पुरुषः - अकार पु प्र एक
सः - दकार पु प्र एक
परः - अकार पु प्र एक
पार्थ - अकार पु सं प्र
भक्त्या - इकार स्त्री तृ एक
लभ्यः अकार पु प्र एक
तु - अव्ययम्
अनन्यया - अ ाकार स्त्री तृ एक
यस्य दकार पु ष एक
अन्तस्थानि नकार पु स एक
भूतानि - अकार नपु प्र बहु
येन - दकार पु तृ एक
सर्वम् - अकार नपु प्र एक
इदं - अकार नपु प्र एक
ततम् अकार नपु प्र एक

पदार्थः
पुरुषः - परमात्मा
सः - सः
परः - श्रेष्ठः
पार्थ - अर्जुन

Downloaded from www.omkaravidya.com

भक्त्या - भक्त्या
लभ्यः - प्राप्यः
तु - तु
अनन्यया - एकाग्रतया
यस्य - यस्य
अन्तः स्थानि - अन्तर्वर्तिनि
भूतानि - प्राणिनः
येन - येन
सर्वम् - सकलम्
इदं - इदम्
ततम् - व्याप्तम्

अन्वयः
हे पार्थ! भूतानि यस्य अन्तः स्थानि येन इदं सर्वं ततं सः तु परः पुरुषः अनन्यया भक्त्या लभ्यः।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये द्वाविंशतितमः श्लोकः । भगवान् श्रीकृष्णः "हे पार्थ! भूतानि यस्य अन्तः स्थानि येन इदं सर्वं ततं सः तु परः पुरुषः अनन्यया भक्त्या लभ्यः।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः

सः + परः - विसर्गलोपः
लभ्यः + तु - विसर्गसकारः
तु + अनन्यया - यण्सन्धिः
यस्य + अन्तःस्थानि - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

मूलश्लोकः
यत्र काले त्वानावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ ८.२३॥

पदच्छेदः
यत्र काले तु अनावृत्तिम् आवृत्तिं च एव योगिनः प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ

पदपरिचयः
यत्र - अव्ययम्
काले - अकार पु स एक
तु - अव्ययम्
अनावृत्तिम् - इकार स्त्री द्वि एक
आवृत्तिं - इकार स्त्री द्वि एक
च - अव्ययम्
एव - अव्ययम्
योगिनः - नकार पु प्र बहु
प्रयाताः - अकार पु प्र बहु
यान्ति - लट् प्रपु बहु
तं - दकार पु द्वि एक
कालं - अकार पु द्वि एक
वक्ष्यामि - लृट् उपु एक
भरतर्षभ - अकार पु सं प्र

Downloaded from www.omkaravidya.com

पदार्थः
यत्र - यत्र
काले - मार्गे
तु - तु
अनावृत्तिम् - अनागमनम् आवृत्तिम् - प्रत्यगमनम्
च - च
एव - एव
योगिनः - कर्मिणः
प्रयाताः - मृताः
यान्ति - प्राप्नुवन्ति
तं - तम्
कालं - मार्गम्
वक्ष्यामि - कथयिष्यामि
भरतर्षभ - अर्जुन

अन्वयः
हे भरतर्षभ! यत्र काले तु प्रयाताः योगिनः अनावृत्तिम् आवृत्तिं च एव यान्ति। तं कालं वक्ष्यामि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये त्रयोविंशतितमः श्लोकः । भगवान् श्रीकृष्णः "हे भरतर्षभ! यत्र काले तु प्रयाताः योगिनः अनावृत्तिम् आवृत्तिं च एव यान्ति । तं कालं वक्ष्यामि ।" एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

तु + अनावृत्तिम् - यण्सन्धिः

च + एव - वृद्धिसन्धिः

▶ समासः

अनावृत्ति - न अवृत्तिः - तम् - नञ्तत्पुरुषः

## श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ ८.२२॥

पदच्छेदः

अग्निः ज्योतिः अहः शुक्लः षण्मासा उत्तरायणम् तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदः जनाः

पदपरिचयः

अग्निः - इकार पु प्र एक

ज्योतिः - सकार पु प्र एक

अहः - नकार नपु प्र एक

शुक्लः - अकार पु प्र एक

षण्मासाः - अकार पु प्र बहु

Downloaded from www.omkaravidya.com

उत्तरायणम् - अकार नपु प्र एक
तत्र - अव्ययम्
प्रयाताः - अकार पु प्र बहु
गच्छन्ति - लट् प्रपु बहु
ब्रह्म - नकार नपु द्वि एक
ब्रह्मविदः - तकार पु प्रपु बहु
जनाः - अकार पु प्र बहु

पदार्थः
अग्निः - कालाभिमानिनी देवता
ज्योतिः कालाभिमानिनी देवता
अहः - अहर्देवता
शुक्लः शुक्लपक्षदेवता
षण्मासाः - षण्मासाः
उत्तरायणम् - उत्तरायणकालदेवता
तत्र - तस्मिन मार्गे
प्रयाताः मृताः
गच्छन्ति - यान्ति
ब्रह्म - ब्रह्मलोकम्
ब्रह्मविदः - ब्रह्मोपासनपरा जनाः
जनाः - जनाः

अन्वयः
अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणम् तत्र प्रयाताः ब्रह्मविदः जनाः ब्रह्म गच्छन्ति ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये चतुर्विंशतितमः श्लोकः । भगवान् श्रीकृष्णः "अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणम् तत्र प्रयाताः ब्रह्मविदः जनाः ब्रह्म गच्छन्ति ।" एवम् अवदत् ।

व्याकरणम्

▶ सन्धिः

अग्निः + ज्योतिः - विसर्गरेफः

ज्योतिः + अहः - विसर्गरेफः

षण्मासाः + उत्तरायणम् - विसर्गलोपः

प्रयाताः + गच्छन्ति - विसर्गलोपः

ब्रह्मविदः + जनाः - विसर्गउकारः

▶ समासः

ब्रह्म वेत्ति इति ब्रह्मविद् - उपपदसमासः - ते

श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ ८.२५॥

पदच्छेदः

धूमः रात्रिः तथा कृष्णः षण्मासाः दक्षिणायनम् तत्र चान्द्रमसं ज्योतिः योगी प्राप्य निवर्तते

Downloaded from www.omkaravidya.com

पदपरिचयः

धूमः - अकार पु प्र एक

रात्रिः  इकार स्त्री प्र एक

तथा - अव्ययम्

कृष्णः -  अकार पु प्र एक

षण्मासाः अकार पु प्र बहु

दक्षिणायनम् - अकार नपु प्र एक

तत्र  - अव्ययम्

चान्द्रमसं अकार नपु द्वि एक

ज्योतिः - सकार नपु द्वि एक

योगी - नकार पु प्र एक

प्राप्य - ल्यबन्तम्

निवर्तते - लट् प्रपु एक

पदार्थः

धूमः - धूमाभिमानिनी देवता

रात्रिः - रात्र्याभिमानिनी देवता

तथा - एवम्

कृष्णः - कृष्णपक्षदेवता

षण्मासाः  - षण्मासाः

दक्षिणायनम् -दक्षिणायनकालदेवता

तत्र - तत्र

चान्द्रमसं -  चान्द्रमसं

ज्योतिः - प्रकाशम्

योगी - कर्मी

प्राप्य – लब्ध्वा   निवर्तते -  पुनरायाति

Downloaded from www.omkaravidya.com

अन्वयः
धूमः रात्रिः तथा कृष्णः षण्मासाः दक्षिणायनम् तत्र (प्रयातः) योगी चान्द्रमसं ज्योतिः  प्राप्य निवर्तते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये  पञ्चविंशतितमः श्लोकः । भगवान् श्रीकृष्णः “धूमः रात्रिः तथा कृष्णः षण्मासाः दक्षिणायनम् तत्र (प्रयाताः) योगी चान्द्रमसं ज्योतिः  प्राप्य निवर्तते  ।“ एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
धूमः + रात्रिः - विसर्गउकारः
रात्रिः + तथा - विसर्गसकारः
षण्मासाः + दक्षिणायनम् - विसर्गलोपः
ज्योतिः + योगी - विसर्गरेफः

▶ कृदन्ताः
प्राप्य - प्र + आप् + ल्यप् प्रत्ययः

श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥८.२६॥

Downloaded from www.omkaravidya.com

पदच्छेदः

शुक्लकृष्णे गती हि एते जगतः शाश्वते मते एकया याति अनावृत्तिम् अन्यया आवर्तते पुनः

पदपरिचयः

शुक्लकृष्णे - आकार स्त्री प्र द्वि

गती - इकार स्त्री प्र द्वि

हि - अव्ययम्

एते - दकार स्त्री प्र द्वि

जगतः - तकार नपु ष एक

शाश्वते - आकार स्त्री प्र द्वि

मते - आकार स्त्री प्र द्वि

एकया आकार स्त्री तृ एक

याति - लट् प्रपु एक

अनावृत्तिम् - इकार स्त्री द्वि एक

अन्यया - आकार स्त्री तृ एक

आवर्तते - लट् प्रपु एक

पुनः - अव्ययम्

पदार्थः

शुक्लकृष्णे गती - मार्गौ

हि - हि

एते - इमे

जगतः - लोकस्य

शाश्वते -नित्ये

मते - अभिप्रेते

Downloaded from www.omkaravidya.com

एकया - एकेन मार्गेण
याति - प्राप्नोति
अनावृत्तिम् - अपुनर्जन्म
अन्यया - अपरेण मार्गेन
आवर्तते - आवर्तते
पुनः - भूयः

अन्वयः
एते हि शुक्लकृष्णे गती जगतः शास्वते मते । एकया अनावृत्तिम् याति ।
अन्यया पुनः आवर्तते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये षड्विंशतितमः श्लोकः । भगवान् श्रीकृष्णः "एते हि शुक्लकृष्णे गती जगतः शास्वते मते । एकया अनावृत्तिम् याति । अन्यया पुनः आवर्तते ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
हि + एते - यण्सन्धिः
याति + अनावृत्तिम् - यण्सन्धिः
अन्यया + आवर्तते - सवर्णदीर्घसन्धिः

▶ समासः
शुक्ला च कृष्णा च - शुक्लकृष्णे - इतरेतरद्वन्द्वसमासः

Downloaded from www.omkaravidya.com

मूलश्लोकः
नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ ८.२७॥

पदच्छेदः
न एते सृती पार्थ जानन् योगी मुह्यति कश्चन तस्मात् सर्वेषु कालेषु योगयुक्तः भव अर्जुन

पदपरिचयः
न - अव्ययम्
एते- दकार स्त्री द्वि द्वि
सृती - ईकार स्त्री द्वि द्वि
पार्थ - अकार पु सं प्र
जानन् - तकार पु प्र एक
योगी - नकार पु प्र एक
मुह्यति - लट् प्रपु एक
कश्चन अव्ययम्
तस्मात् - दकार पु प एक
सर्वेषु - अकार पु स बहु
कालेषु - अकार पु स बहु
योगयुक्तः - अकार पु प्र एक
भव - लोट् मपु एक
अर्जुन - अकार पु सं प्र

Downloaded from www.omkaravidya.com

पदार्थः
न - न
एते - यथोक्ते
सृती - सृती मार्गौ
पार्थ - अर्जुन
जानन् - विदन्
योगी - चिवेकी
मुह्यति - भ्राम्यति
कश्चन - कश्चन
तस्मात् - अत:
सर्वेषु - सकलेषु
कालेषु - समयेषु
योगयुक्तः समाहितचित्त:
भव - वर्तस्व
अर्जुन - अर्जुन

अन्वयः
हे पार्थ ! एते सृती  जानन् कश्चन योगी न मुह्यति  तस्मात् हे अर्जुन!  सर्वेषु कालेषु योगयुक्तः भव ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां अष्टमोऽध्याये  सप्तविंशतितम: श्लोक: । भगवान् श्रीकृष्ण: "हे पार्थ ! एते यथोक्ते सृतीमार्गौ ( संसाराय एका अन्या मोक्षाय)  जानन् कश्चन योगी न मुह्यति  । हे अर्जुन! तस्मात् सर्वेषु कालेषु समाहित: भव ।" एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

न + एते - वृद्धिसन्धिः

योगयुक्तः + भव - विसर्गउकारः

भव + अर्जुन - सवर्णदीर्घसन्धिः

▶ समासः

योगेन युक्तः - योगयुक्तः तृतीयातत्पुरुषः

श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूलश्लोकः

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ।

अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥८.२८॥

पदच्छेदः

वेदेषु यज्ञेषु तपःसु च एव दानेषु यत् पुण्यफलं प्रदिष्टम्

अत्येति तत् सर्वम् इदं विदित्वा योगी परं स्थानम् उपैति च आद्यम्

पदपरिचयः

वेदेषु - अकार पु स बहु

यज्ञेषु - अकार पु स बहु

तपःसु - सकार नपु स बहु

च - अव्ययम्

एव - अव्ययम्

दानेषु - अकार नपु स बहु

Downloaded from www.omkaravidya.com

यत् - दकार नपु द्वि एक
पुण्यफलं अकार नपु द्वि एक
प्रदिष्टम् - अकार नपु द्वि एक
अत्येति - लट् प्रपु एक
तत् - दकार नपु द्वि एक
सर्वम् - अकार नपु द्वि एक
इदं - मकार नपु द्वि एक
विदित्वा - क्त्वान्तम्
योगी - नकार पु प्र एक
परं - अकार नपु द्वि एक
स्थानम् - अकार नपु द्वि एक
उपैति - लट् प्रपु एक
च - अव्ययम्
आद्यम् - अकार नपु द्वि एक

पदार्थः
वेदेषु - निगमेषु
यज्ञेषु - यज्ञेषु
तपःसु - व्रतेषु
च - च
एव - एव
दानेषु - दानेषु
यत् - यत्
पुण्यफलं - सुकृतफलम्
प्रदिष्टम् - प्रोक्तम्
अत्येति - अतिक्राम्यति

Downloaded from www.omkaravidya.com

तत् - तत्
सर्वम् - सकलम्
इदं - इदम्
विदित्वा - ज्ञात्वा
योगी - योगी
परं - उत्तमम्
स्थानम् - स्थानम्
उपैति - प्रतिपद्यते
च - च
आद्यम् - मूलकारणम्

अन्वयः
वेदेषु यज्ञेषु दानेषु तपःसु च एव यत् पुण्यफलं प्रदिष्टम् इदं विदित्वा योगी तत् सर्वम् अत्येति । आद्यम् परं स्थानम् उपैति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां अष्टमोऽध्याये अष्टाविंशतितमः श्लोकः । भगवान् श्रीकृष्णः "वेदेषु यज्ञेषु दानेषु तपःसु च एव यत् पुण्यफलं प्रदिष्टम् इदं विदित्वा योगी तत् सर्वम् अत्येति । आद्यम् परं स्थानम् उपैति ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
च + एव - वृद्धिसन्धिः
च + आद्यम् - सवर्णदीर्घसन्धिः
▶ समासः
पुण्यस्य फलम् - पुण्यफलम् - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

▶ कृदन्ताः
विदित्वा - विद् + क्त्वा प्रत्ययः

## श्रीमद्भगवद्गीता - अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

मूल श्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगो नाम अष्टमोऽध्यायः ॥ ८ ॥

पदच्छेदः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगः नाम अष्टमः अध्यायः

पदपरिचयः
ॐ - अव् धातुः + मन् प्रत्ययः
तत् - दकार. नपु. पु एक
सत् - दकार. नपु. प्र एक
इति - अव्ययम्
श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु
उपनिषत्सु - दकार. स्त्री स बहु
ब्रह्मविद्यायां - आकार. स्त्री स एक
योगशास्त्रे - अकार. नपु. स. एक
श्रीकृष्णार्जुनसंवादे - अकार. पु. स. एक

Downloaded from www.omkaravidya.com

अक्षरब्रह्मयोगः- अकार. पु. प्र. एक
नाम - नकार.नपु. प्र एक
अष्टमः - अकार. पु. प्र एक
अध्यायः - अकार. पु. प्र एक

पदार्थः
ॐ - ओम्
तत् - तत्
सत् - सत्
इति - एवम्
श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु
उपनिषत्सु - उपनिषत्सु
ब्रह्मविद्यायां - ब्रह्म पाठे
योगशास्त्रे - योगशास्त्रे
श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयोः मध्ये संवादे
अक्षरब्रह्मयोगः - अक्षरब्रह्मयोगः
नाम - नाम
अष्टमः - अष्टमः
अध्यायः - अध्यायः

अन्वयः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगः नाम अष्टमः अध्यायः (संपूर्णम् भवति) ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगः नाम अष्टमः अध्यायः (संपूर्णम् भवति)

व्याकरणम्

▶सन्धिः

श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः

योगः + नाम - विसर्ग उकारः

अष्टमः + अध्यायः - विसर्ग उकारः पूर्वरूपसन्धिः

▶ समासः

ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारयः

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता

# नवमोऽध्यायः

# राजविद्याराजगुह्ययोगः

Downloaded from www.omkaravidya.com

मूलश्लोकः

**श्री भगवान् उवाच**
**इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।**
**ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥९.१॥**

पदच्छेदः
श्री भगवान् उवाच
इदं तु ते गुह्यतमं प्रवक्ष्यामि अनसूयवे ज्ञानं विज्ञानसहितं यत् ज्ञात्वा मोक्ष्यसे अशुभात्

पदपरिचयः
इदं - मकार नपु द्वि एक
तु - अव्ययम्
ते - दकार त्रि च एक
गुह्यतमं - अकार नपु द्वि एक
प्रवक्ष्यामि - लृट् उपु एक
अनसूयवे - उकार पु च एक
ज्ञानं - अकार नपु द्वि एक
विज्ञानसहितं - अकार नपु द्वि एक
यत् - दकार नपु द्वि एक
ज्ञात्वा - क्त्वान्तम्
मोक्ष्यसे - लृट् मपु एक
अशुभात् - अकार नपु प एक

पदार्थः

Downloaded from www.omkaravidya.com

इदं - एतत्
तु - तु
ते - तुभ्यम्
गुह्यतमं - गोप्यतमं
प्रवक्ष्यामि - कथयिष्यामि
अनसूयवे - असूयारहिताय
ज्ञानं - ज्ञानं
विज्ञानसहितं - विज्ञानसहितं
यत् - यत्
ज्ञात्वा - विदित्वा
मोक्ष्यसे - परित्यक्ष्यसे
अशुभात् - संसारात्

अन्वयः
श्री भगवान् उवाच
(अहं) इदं तु गुह्यतमं विज्ञानसहितं ज्ञानं अनसूयवे ते प्रवक्ष्यामि । यत् ज्ञात्वा अशुभात् मोक्ष्यसे ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये प्रथमः श्लोकः । भगवान् श्रीकृष्णः "यत् ज्ञानं ज्ञात्वा संसारात् मोक्ष्यसे तत् गुह्यतमं विज्ञानसहितं इदं ब्रह्मज्ञानं अनसूयवे तुभ्यं कथयिष्यामि ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
प्रवक्ष्यामि + अनसूयवे - यण्सन्धिः
यत् + ज्ञात्वा - जश्त्वसन्धिः श्चुत्वसन्धिः
मोक्ष्यसे + अशुभात् - पूर्वरूपसन्धिः

Downloaded from www.omkaravidya.com

▶ समासः
विज्ञानेन सहितम् - विज्ञानसहितम् - तृतीयातत्पुरुषः

▶ कृदन्ताः
ज्ञात्वा - ज्ञा + क्त्वा प्रत्ययः

## श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः
राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥९.२॥

पदच्छेदः
राजविद्या राजगुह्यं पवित्रम् इदम् उत्तमम् प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुम् अव्ययम्

पदपरिचयः
राजविद्या - आकार स्त्री प्र एक
राजगुह्यं - अकार नपु प्र एक
पवित्रम् - अकार नपु प्र एक
इदम् - मकार नपु प्र एक
उत्तमम् - अकार नपु प्र एक
प्रत्यक्षावगमं - अकार नपु प्र एक
धर्म्यं - अकार नपु प्र एक
सुसुखं - अकार नपु प्र एक

Downloaded from www.omkaravidya.com

कर्तुम् - तुमुनन्तम्
अव्ययमं - अकार नपु प्र एक

पदार्थः
राजविद्या - पराविद्या
राजगुह्यं - अतीवगोप्यम्
पवित्रम् - पावनम्
इदम् - एतत्
उत्तमम् - श्रेष्ठम्
प्रत्यक्षावगमं - स्फुटबोधम्
धर्म्यं - धर्मोपेतम्
सुसुखं - सुलभम्
कर्तुम् - अनुष्ठितुम्
अव्ययम् - नाशरहितम्
अन्वयः
इदम् राजविद्या राजगुह्यं पवित्रम् उत्तमम् प्रत्यक्षावगमं धर्म्यं कर्तुम् सुसुखं अव्ययम् ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमोऽध्याये द्वितीयः श्लोकः । भगवान् श्रीकृष्णः *इदं ज्ञानम् पराविद्या अतीवगुह्यं परमपवित्रम् उत्तमम् । इदं ज्ञानम् प्रत्यक्षावगमं । इदं ज्ञानम् धर्मोपेतम् । इदं ज्ञानम् कर्तुं सुलभम् नाशरहितम् च ।* एवम् अवदत् ।

व्याकरणम्

▶ समासः
विद्यानां राजा - राजविद्या - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

गुह्यानां राजा - राजगुह्यं - षष्ठीतत्पुरुषः
प्रत्यक्षेण अवगमः यस्य तत् - प्रत्यक्षेणवगमम् - तृतीयातत्पुरुषः
न व्ययम् - अव्ययम् - नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः
अश्रद्दधानाः पुरुषाः धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ ९.३॥

पदच्छेदः
अश्रद्दधानाः पुरुषाः धर्मस्य अस्य परन्तप अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि

पदपरिचयः
अश्रद्दधानाः - अकार पु प्र बहु
पुरुषाः - अकार पु प्र बहु
धर्मस्य - अकार पु ष एक
अस्य - मकार पु ष एक
परन्तप - अकार पु सं प्र
अप्राप्य - लयबन्तम्
मां - दकार त्रि द्वि एक
निवर्तन्ते - लट् प्रपु बहु
मृत्युसंसारवर्त्मनि - नकार नपु स एक

पदार्थः
अश्रद्दधानाः - श्रद्धाविरहिताः

Downloaded from www.omkaravidya.com

पुरुषाः - नराः
धर्मस्य -ज्ञानधर्मस्य
अस्य - अस्य
परन्तप - अर्जुन
अप्राप्य - अलब्ध्वा
मां - माम्
निवर्तन्ते - निश्चयने आवर्तन्ते
मृत्युसंसारवर्त्मनि - मृत्युसंसारमार्गे

अन्वयः
हे परन्तप ! अस्य धर्मस्य अश्रद्दधानाः पुरुषाः माम् अप्राप्य मृत्युसंसारवर्त्मनि निवर्तन्ते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमोऽध्याये तृतीयः श्लोकः । भगवान् श्रीकृष्णः "हे परन्तप ! अस्य धर्मस्य अश्रद्दधानाः पुरुषाः माम् अप्राप्य मृत्युसंसारवर्त्मनि निवर्तन्ते ।" एवम् अवदत्
व्याकरणम्
▶ सन्धिः
पुरुषाः + धर्मस्य - विसर्गलोपः
धर्मस्य + अस्य - सवर्णदीर्घसन्धिः

▶ समासः
अश्रद्दधानाः - न श्रद्दधानाः - नञ्तत्पुरुषः

▶ कृदन्ताः
प्राप्य - प्र + आप् + ल्यप् प्रत्ययः
न प्राप्य – अप्राप्य

Downloaded from www.omkaravidya.com

मूलश्लोकः
मया ततमिदं सर्वं जगतदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थित: ॥९.४॥

पदच्छेदः
मया ततम् इदं सर्वं जगत् अव्यक्तमूर्तिना मत्स्थानि सर्वभूतानि न च अहं तेषु अवस्थित:

पदपरिचयः
मया - दकार त्रि तृ एक
ततम् - अकार नपु प्र एक
इदं - मकार नपु प्र एक
सर्वं - अकार नपु प्र एक
जगत् - तकार नपु प्र एक
अव्यक्तमूर्तिना - इकार पु तृ एक
मत्स्थानि - नकार पु प्र बहु
सर्वभूतानि - अकार नपु प्र बहु
न - अव्ययम्
च - अव्ययम्
अहं - दकार त्रि प्र एक
तेषु - दकार नपु स एक
अवस्थित: - अकार पु प्र एक

पदार्थः
मया - मया
ततम् - व्याप्तम्

Downloaded from www.omkaravidya.com

इदं - इदम्
सर्वं - सकलम्
जगत् - जगत्
अव्यक्तमूर्तिना - करणगोचरस्वरुपेण
मत्स्थानि - मत्स्थानि
सर्वभूतानि - सर्वभूतानि
न - न
च - च
अहं - अहम्
तेषु - तेषु
अवस्थितः - अवस्थितः

अन्वयः
अव्यक्तमूर्तिना मया इदं सर्वं जगत् ततम् । सर्वभूतानि मत्स्थानि ।अहं च तेषु न अवस्थितः ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमोऽध्याये चतुर्थः श्लोकः ।भगवान् श्रीकृष्णः "अव्यक्तमूर्तिना मया इदं सर्वं जगत् ततम् । सर्वभूतानि मत्स्थानि ।अहं च तेषु न अवस्थितः ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
जगत् + अव्यक्तमूर्तिना - जश्त्वसन्धिः
च + अहं - सवर्णदीर्घसन्धिः
तेषु + अवस्थितः - यण्सन्धिः

▶ समासः
न व्यक्ता - अव्यक्ता - नञ्तत्पुरुषः

Downloaded from www.omkaravidya.com

अव्यक्ता मूर्तिः यस्य सः अव्यक्तमूर्तिः - समानाधिकरणबहुव्रीहिसमासः - तेन

▶ कृदन्ताः
अवस्थितः - अव + स्था + क्त प्रत्ययः

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः
यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥९.६॥

पदच्छेदः
यथा आकाशस्थितः नित्यं वायुः सर्वत्रगः महान् तथा सर्वाणि भूतानि मत्स्थानि इति उपधारय

पदपरिचयः
यथा - अव्ययम्
आकाशस्थितः - अकार पु प्र एक
नित्यं - अव्ययम्
वायुः - उकार पु प् एक
सर्वत्रगः - अकार पु प्र एक
महान् - तकार पु प्र एक
तथा- अव्ययम्
सर्वाणि - अकार नपु प्र बहु
भूतानि - अकार नपु प्र बहु

Downloaded from www.omkaravidya.com

मत्स्थानि - नकार पु प्र बहु
इति - अव्ययम्
उपधारय - उप + धृ + णिच् मपु एक

पदार्थः
यथा - यथा
आकाशस्थित: - नभसि वर्तमान:
नित्यं - सर्वदा
वायु: - अनिल:
सर्वत्रग: - सर्वत्र गच्छति
महान् - परिमाणत:
तथा - तथा
सर्वाणि - सकलानि
भूतानि - भूतानि
मत्स्थानि - मत्स्थानि
इति - इति
उपधारय - जानीहि

अन्वयः
यथा आकाशस्थित: महान् वायु: नित्यं सर्वत्रग: तथा सर्वाणि भूतानि मत्स्थानि इति उपधारय ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां नवमोऽध्याये षष्ठ: श्लोक: । भगवान् श्रीकृष्ण: "यथा लोके आकाशस्थित: महान् वायु: सदा सर्वत्र गच्छति तथा आकाशे सर्वगते मयि असंश्लेषेण एव स्थितानि इति जानीहि ।" एवम् अवदत् ।

व्याकरणम्

Downloaded from www.omkaravidya.com

▶ सन्धिः
यथा + आकाशस्थितः - सवर्णदीर्घसन्धिः
आकाशस्थितः + नित्यं - विसर्गउकारः
सर्वत्रगः + महान् - विसर्गउकारः
मत्स्थानि + इति - सवर्णदीर्घसन्धिः
इति + उपधारय - यण्सन्धिः

▶ समासः
आकाशे स्थितः - अकाशस्थितः - सप्तमीतत्पुरुषः
सर्वत्र गच्छति इति - सर्वगः - उपपदसमासः

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥९.७॥

पदच्छेदः
सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् कल्पक्षये पुन तानि कल्पादौ विसृजामि अहम्

पदपरिचयः
सर्वभूतानि - अकार नपु प्र बहु
कौन्तेय - अकार पु सं प्र
प्रकृतिं - इकार स्त्री द्वि एक

Downloaded from www.omkaravidya.com

यान्ति - लट् प्रपु बहु
मामिकाम् -आकार स्त्री द्वि एक
कल्पक्षये - अकार पु स एक
पुनः - अव्ययम्
तानि - अकार नपु द्वि बहु
कल्पादौ इकार पु. स एक
विसृजामि - वि + सृज् + लट् उपु एक
अहम् - दकार त्रि प्र बहु

पदार्थः
सर्वभूतानि - समस्तभूतानि
कौन्तेय - अर्जुन
प्रकृतिं - प्रकृतिं
यान्ति - प्राप्नुवन्ति
मामिकाम् - मदीयाम्
कल्पक्षये - प्रलयकाले
पुनः - भूयः
तानि - तानि
कल्पादौ - उत्पत्तिकाले
विसृजामि - उत्पादयामि
अहम् - अहम्

अन्वयः
हे कौन्तेय! सर्वभूतानि कल्पक्षये मामिकाम् प्रकृतिं यान्ति । पुनः कल्पादौ तानि अहं विसृजामि ।

Downloaded from www.omkaravidya.com

तात्पर्यम्

अयं श्लोक: श्रीमद्भगवद्गीतायां नवमोऽध्याये सप्तम: श्लोक: । भगवान् श्रीकृष्ण: "हे कौन्तेय! प्रलयकाले सर्वभूतानि मदीयां अपरां प्रकृतिं यान्ति । भूय: अहम् उत्पत्तिकाले तानि भूतानि पूर्ववत् उत्पादयामि ।" एवम् अवदत् ।

व्याकरणम्

▶ सन्धिः

पुन: + तानि - विसर्गसकार:

विसृजामि + अहम् - यण्सन्धि:

▶ समासः

कल्पस्य क्षय: - कल्पक्षय: - षष्ठीतत्पुरुष:

कल्पस्य आदि: - कल्पादि - षष्ठीतत्पुरुष:

श्रीमद्भगवद्गीता - नवमोऽध्याय: - राजविद्याराजगुह्ययोग:

मूलश्लोकः

प्रकृतिं स्वामवष्टभ्य विसृजामि पुन: पुन: ।

भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ९.८॥

पदच्छेदः

प्रकृतिं स्वाम् अवष्टभ्य विसृजामि पुन: पुन: भूतग्रामम् इमं कृत्स्नम् अवशं प्रकृते: वशात्

Downloaded from www.omkaravidya.com

पदपरिचयः
प्रकृतिं - इकार स्त्री द्वि एक
स्वाम् - आकार स्त्री द्वि एक
अवष्टभ्य - ल्यबन्तम्
विसृजामि - लट् उपु एक
पुनः - अव्ययम्
पुनः - अव्ययम्
भूतग्रामम् - अकार पु द्वि एक
इमं - अकार पु द्वि एक
कृत्स्नम् - अकार पु द्वि एक
अवशं - अकार पु द्वि एक
प्रकृतेः - इकार स्त्री ष एक
वशात् - अकार पु प एक

पदार्थः

प्रकृतिं - मायाशक्तिम्
स्वाम् - स्वीयाम्
अवष्टभ्य - वशीकृत्य
विसृजामि - उत्पादयामि
पुनः - भूयः
पुनः - भूयः
भूतग्रामम् - भूतसमुदायम्
इमं - इमम्
कृत्स्नम् - सर्वम्
अवशं - अस्वतन्त्रम्
प्रकृतेः - स्वभावस्य
वशात् - वशात्

Downloaded from www.omkaravidya.com

अन्वयः
(अहं) स्वाम् प्रकृतिं अवष्टभ्य प्रकृते: वशात्  कृत्स्नम् अवशं इमं भूतग्रामम् पुन: पुन:  विसृजामि ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां नवमोऽध्याये अष्टम: श्लोक: । भगवान् श्रीकृष्ण: “हं स्वाम् प्रकृतिं अवष्टभ्य प्रकृते: वशात्  कृत्स्नम् अवशं इमं भूतग्रामम् पुन: पुन:  विसृजामि ।“ एवं अवदत् ।

व्याकरणम्
▶ सन्धिः
प्रकृते: + वशात् - विसर्गरेफ:

▶ समासः
भूतग्रामम् - भूतानां ग्रामम् - षष्ठीतत्पुरुष:
न वश: - अवश: - नञ्तत्पुरुष:

▶ कृदन्ता:
अवष्टभ्य:- अव+ स्तम्भु+ ल्यप् प्रत्यय:

Downloaded from www.omkaravidya.com

मूलश्लोकः
न च मां तानि कर्माणि निबध्नन्ति धनञ्जय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९.९॥

पदच्छेदः
न च मां तानि कर्माणि निबध्नन्ति धनञ्जय उदासीनवत् आसीनम् असक्तं तेषु कर्मसु

पदपरिचयः
न - अव्ययम्
च - अव्ययम्
मां - दकार त्रि द्वि एक
तानि - दकार नपु प्र बहु
कर्माणि- नकार नपु प्र बहु
निबध्नन्ति - लट् प्रपु बहु
धनञ्जय - अकार पु सं प्र
उदासीनवत् - अव्ययम्
आसीनम् - अकार पु द्वि एक
असक्तं - अकार पु द्वि एक
तेषु - दकार नपु स बहु
कर्मसु - नकार नपु स बहु

पदार्थः
न - न
च - च
मां - ईशम्

Downloaded from www.omkaravidya.com

तानि - तानि
कर्माणि - कर्माणि
निबध्नन्ति - संयच्छन्ति
धनञ्जय - अर्जुन
उदासीनवत् - उपेक्षकवत्
आसीनम् - आसीनम्
असक्तं - फलासङ्गरहितम्
तेषु - तेषु
कर्मसु - कर्मसु

अन्वयः

हे धनञ्जय! तेषु कर्मसु असक्तं च उदासीनवत् आसीनम् मां तानि कर्माणि न निबध्नन्ति ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां नवमोऽध्याये नवमः श्लोकः । भगवान् श्रीकृष्णः "हे धनञ्जय! तेषु कर्मसु असक्तं उदासीनवत् आसीनम् च मां तानि कर्माणि न निबध्नन्ति ।" एवम् अवदत् ।

व्याकरणम्

▶ सन्धिः

उदासीनवत् + आसीनम् - जश्त्वसन्धिः

Downloaded from www.omkaravidya.com

मूलश्लोकः

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥ ९.१०॥

पदच्छेदः
मया अध्यक्षेण प्रकृतिः सूयते सचराचरम् हेतुना अनेन कौन्तेय जगत् विपरिवर्तते

पदपरिचयः
मया - दकार त्रि तृ एक
अध्यक्षेण - अकार पु तृ एक
प्रकृतिः - इकार स्त्री प्र एक
सूयते - लट् प्रपु एक
सचराचरम् - अकार नपु द्वि एक
हेतुना - उकार पु तृ एक
अनेन - मकार पु तृ एक
कौन्तेय - अकार पु सं प्र
जगत् - तकार नपु प्र ऐक
विपरिवर्तते - लप

पदार्थः
मया - मया
अध्यक्षेण - अध्यक्षेण
प्रकृतिः - माया

Downloaded from www.omkaravidya.com

सूयते - उत्पादयति
सचराचरम् - सजङ्गमस्थावरम्
हेतुना - निमित्तेन
अनेन - एतेन
कौन्तेय - अर्जुन
जगत् - विश्वम्
विपरिवर्तते - विपरिणमते

अन्वयः
हे कौन्तेय! मया अध्यक्षेण प्रकृतिः सचराचरम् सूयते । अनेन हेतुना जगत् विपरिवर्तते ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमोऽध्याये दशमः श्लोकः । भगवान् श्रीकृष्णः "हे कौन्तेय! मया अध्यक्षेण प्रकृतिः सचराचरम् सूयते । अनेन हेतुना जगत् विपरिवर्तते ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
मया + अध्यक्षेण -सवर्णदीर्घसन्धिः
हेतुना + अनेन - सवर्णदीर्घसन्धिः
जगत् + विपरिवर्तते - जश्त्वसन्धिः

▶ समासः
चरं च अचरं च - चराचरम् समाहारद्वन्द्वसमासः
चराचरैः सह वर्तते इति - सहपूर्वपदकर्मधारयसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥ ९.११॥

पदच्छेदः
अवजानन्ति मां मूढाः मानुषीं तनुम् आश्रितम् । परं भावम् अजानन्तः मम भूतमहेश्वरम्

पदपरिचयः
अवजानन्ति - लट् प्रपु बहु
मां - दकार त्रि द्वि एक
मूढाः - अकार पु प्र बहु
मानुषीं - ईकार स्त्री द्वि एक
तनुम् - उकार स्त्री द्वि एक
आश्रितम् - अकार पु द्वि एक
परं - अकार पु द्वि एक
भावम् - अकार पु द्वि एक
अजानन्तः - तकार पु प्र बहु
मम - दकार त्रि ष एक
भूतमहेश्वरम् - अकार पु द्वि एक

पदार्थः

अवजानन्ति - परिभवन्ति

Downloaded from www.omkaravidya.com

मां - ईश्वरम्
मूढा: - अविवेकिन:
मानुषीं - मनुष्यसम्बन्धिनीम्
तनुम् - मूर्तिम्
आश्रितम् - प्राप्तम्
परं - प्रकृष्टम्
भावम् - परमात्मतत्त्वम्
अजानन्त: - अनवगच्छन्त:
मम - इश्वरस्य
भूतमहेश्वरम् - भूताधिपम्

अन्वयः

मम परं भावम् अजानन्त: मूढा: भूतमहेश्वरम् मां मानुषीं तनुम् आश्रितम् अवजानन्ति ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां नवमे अध्याये एकादश: श्लोक: । भगवान् श्रीकृष्ण: "मम प्रकृष्टं परमात्मतत्त्वं अजानन्त: मूढा: भूतमहेश्वरम् मां मानुषीं देहं आश्रितम् अवजानन्ति ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
अजानन्त: + माम् - विसर्गउकार:

▶ समासः
न जानन्त: - अजानन्त: - नञ्तत्पुरुष:
भूतानां महेश्वर: - भूतमहेश्वर: - षष्ठीतत्पुरुष: तम्

Downloaded from www.omkaravidya.com

मूलश्लोकः

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥९.१२॥

पदच्छेदः

मोघाशाः मोघकर्माणः मोघज्ञानाः विचेतसः राक्षसीम् आसुरीं च एव प्रकृतिं मोहिनीं श्रिताः

पदपरिचयः
मोघाशाः - अकार पु प्र बहु
मोघकर्माणः - अकार पु प्र बहु
मोघज्ञानाः - अकार पु प्र बहु
विचेतसः - अकार पु प्र बहु
राक्षसीम् - ईकार स्त्री द्वि एक
आसुरीं - ईकार स्त्री द्वि एक
च - अव्ययम्
एव - अव्ययम्
प्रकृतिं - इकार स्त्री द्वि एक
मोहिनीं - ईकार स्त्री द्वि एक
श्रिताः - अकार पु प्र बहु

पदार्थः

मोघाशाः - वृथा आशाः

Downloaded from www.omkaravidya.com

मोघकर्माणः - वृथाकर्माणः
मोघज्ञानाः - निष्फलज्ञानाः
विचेतसः - विगतविवेकाः
राक्षसीम् - राक्षससम्बन्धिनीम्
आसुरीं - असुरसम्बन्धिनीम्
च - च
एव - एव
प्रकृतिं - प्रकृतिम्
मोहिनीं - मोहकरीम्
श्रिताः - आश्रिताः

अन्वयः
मोघाशाः मोघकर्माणः मोघज्ञानाः विचेतसः राक्षसीम् आसुरीं च मोहिनीं प्रकृतिं एव श्रिताः ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये द्वादशः श्लोकः । भगवान् श्रीकृष्णः "मोघाशाः मोघकर्माणः मोघज्ञानाः विचेतसः राक्षसीम् आसुरीं च मोहिनीं प्रकृतिं एव श्रिताः ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
मोघाशाः + मोघकर्माणः - विसर्गलोपः
मोघकर्माणः + मोघज्ञानाः - विसर्गउकारः
मोघज्ञानाः +विचेतसः -विसर्गलोपः
च + एव - वृद्धिसन्धिः

▶ समासः

Downloaded from www.omkaravidya.com

मोघाः आशाः यस्य सः - मोघाशा - समानाधिकरणबहुव्रीहिसमासः
मोघानि कर्माणि यस्य सः - मोघकर्मा समानाधिकरणबहुव्रीहिसमासः
मोघं ज्ञानं यस्य सः - मोघज्ञानः - समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - अथ नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥९.१३।

पदच्छेदः
महात्मानः तु मां पार्थ दैवीं प्रकृतिम् आश्रिताः भजन्ति अनन्यमनसः ज्ञात्वा भूतादिम् अव्ययम्

पदपरिचयः
महात्मानः - नकार पु प्र बहु
तु - अव्ययम्
मां - दकार त्रि द्वि एक
पार्थ - अकार पु सं प्र
दैवीं - ईकार स्त्री द्वि एक
प्रकृतिम् - इकार स्त्री द्वि एक
आश्रिताः - अकार पु प्र बहु
भजन्ति - लट् प्रपु बहु
अनन्यमनसः - सकार. पु प्र बहु
ज्ञात्वा - क्त्वान्तम्
भूतादिम् - इकार पु द्वि एक

Downloaded from www.omkaravidya.com

अव्ययम् - अकार पु द्वि एक

पदार्थः

महात्मानः - अक्षुद्रचित्ताः

तु - तु

मां - ईश्वरम्

पार्थ - अर्जुन

दैवीं - देवसम्बन्धिनीम्

प्रकृतिम् - स्वभावम्

आश्रिताः - प्राप्ताः

भजन्ति - सेवन्ते

अनन्यमनसः - एकाग्रचित्ताः अनन्यचित्तेन

ज्ञात्वा - विदित्वा

भूतादिम् - भूतादिम्

अव्ययम् - कारणम्

अन्वयः

हे पार्थ! महात्मानः तु दैवीं प्रकृतिम् आश्रिताः मां भूतादिं अव्ययम् ज्ञात्वा अनन्यमनसः भजन्ति ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये त्रयोदशः श्लोकः । भगवान् श्रीकृष्णः *

“हे पार्थ! महात्मानः तु दैवीं प्रकृतिम् आश्रिताः मां भूतादिं अव्ययम् ज्ञात्वा अनन्यमनसः भजन्ति ।“ एवम् अवदत् ।

व्याकरणम्

Downloaded from www.omkaravidya.com

▶ सन्धिः
महात्मानः + तु - विसर्गसकारः
भजन्ति + अनन्यचेतसः - यण्सन्धिः
अनन्यमनसः + ज्ञात्वा विसर्गउकारः

▶ समासः
भूतानाम् आदिः भूतादि - षष्ठीतत्पुरुषः

▶ कृदन्ताः
ज्ञात्वा - ज्ञा + क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥९.१४॥

पदच्छेदः
सततं कीर्तयन्तः मां यतन्तः च दृढव्रताः नमस्यन्तः च मां भक्त्या नित्ययुक्ताः उपासते

पदपरिचयः
सततं - अव्ययम्
कीर्तयन्तः - तकार पु प्र बहु
मां - दकार त्रि द्वि एक
यतन्तः - तकार पु प्र बहु
च - अव्ययम्

Downloaded from www.omkaravidya.com

दृढव्रताः - अकार पु प्र बहु
नमस्यन्तः तकार पु प्र बहु
च - अव्ययम्
मां - दकार त्रि द्वि एक
भक्त्या - इकार स्त्री तृ एक
नित्ययुक्ताः - अकार पु प्र बहु
उपासते - लटं प्रपु वहु

पदार्थः
सततं - सर्वदा
कीर्तयन्तः - गायन्तः
मां - ब्रह्मस्वरूपम्
यतन्तः - प्रयतन्तः
च - च
दृढव्रताः - स्थिरनियमाः
नमस्यन्तः - नमस्कारं कृतवन्तः
च - च
मां - ब्रह्मस्वरूपम्
भक्त्या - भक्त्या
नित्ययुक्ताः - सततयोगाः
उपासते - सेवन्ते

अन्वयः
दृढव्रताः सततं कीर्तयन्तः यतन्तः च मां नमस्यन्तः च नित्ययुक्ताः भक्त्या मां उपासते ।

तात्पर्यम्

Downloaded from www.omkaravidya.com

अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये  चतुर्दशः श्लोकः । भगवान् श्रीकृष्णः "दृढव्रताः सततं कीर्तयन्तः   यतन्तः च मां नमस्यन्तः च नित्ययुक्ताः भक्त्या मां उपासते ।" एवम् अवदत् ।

व्याकरणम्

▶ सन्धिः

कीर्तयन्तः + मां - विसर्गउकारः

यतन्तः + च - विसर्गसकारः

नमस्यन्तः + च - विसर्गसकारः

नित्ययुक्ताः + उपासते - विसर्गलोपः

▶ समासः

दृढं व्रतं यस्य सः - दृढव्रतः - समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता  - नवमोऽध्यायः  - राजविद्याराजगुह्ययोगः

मूलश्लोकः

ज्ञानयज्ञेन चाप्यन्ये यतन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ ९.१५॥

पदच्छेदः

ज्ञानयज्ञेन च अपि अन्ये यतन्तः  माम् उपासते एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्

पदपरिचयः

ज्ञानयज्ञेन - अकार पु तृ एक

च - अव्ययम्

Downloaded from www.omkaravidya.com

अपि   अव्ययम्
अन्ये - अकार पु प्र बहु
यतन्तः  - तकार पु प्र बहु
माम् - दकार त्रि द्वि एक
उपासते - लट् प्रपु बहु
एकत्वेन - अकार नपु तृ एक
पृथक्त्वेन -अकार नपु तृ एक
बहुधा  - अव्ययम्
विश्वतोमुखम् - अकार पु द्वि एक

पदार्थः
ज्ञानयज्ञेन
च - च
अपि - अपि
अन्ये - इतरे
यतन्तः  - पूजयन्तः
माम् - ईश्वरम्
उपासते - सेवन्ते
एकत्वेन -  एकतया
पृथक्त्वेन -  पृथक्तया
बहुधा - बहुप्रकारेण
विश्वतोमुखम्- सर्वतोमुखम्

अन्वयः
अन्ये च अपि ज्ञानयज्ञेन यतन्तः मां विश्वतोमुखं  एकत्वेन पृथक्त्वेन बहुधा उपासते ।

तात्पर्यम्

Downloaded from www.omkaravidya.com

अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये  पञ्चदशः श्लोकः । भगवान् श्रीकृष्णः “अन्ये च अपि ज्ञानयज्ञेन यतन्तः मां विश्वतोमुखं  एकत्वेन पृथक्त्वेन बहुधा उपासते ।“ एवम् अवदत् ।

व्याकरणम्

▶ सन्धिः

च + अपि - सवर्णदीर्घसन्धिः

अपि + अन्ये - यण्सन्धिः

यतन्तः + माम् - विसर्गउकारः

▶ समासः

ज्ञानं एव यज्ञः - ज्ञानयज्ञः - अवधारणापूर्वपदकर्मधारयसमासः - तेन

विश्वतः मुखानि यस्य सः - विश्वतोमुखः - व्यधिकरणबहुव्रीहिसमासः - तम्

श्रीमद्भगवद्गीता  - नवमोऽध्यायः  - राजविद्याराजगुह्ययोगः

मूलश्लोकः

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥९.१६॥

पदच्छेदः

अहं क्रतुः अहं यज्ञः स्वधा अहम् अहम् औषधम् मन्त्रः अहम् अहम् एव आज्यमं अहम् अग्निः अहं हुतम्

Downloaded from www.omkaravidya.com

पदपरिचयः

अहं - दकार. त्रि प्र एक

क्रतुः - उकार पु प्र एक

अहं - दकार. त्रि प्र एक

यज्ञः - अकार. पु प्र एक

स्वधा - आकार स्त्री प्र एक

अहम्- दकार. त्रि प्र एक

अहम् - दकार. त्रि प्र एक

औषधम् -अकार नपु प्र एक

मन्त्रः - अकार पु प्र एक

अहम् - दकार. त्रि प्र एक

अहम् - दकार. त्रि प्र एक

एव - अव्ययम्

आज्यमं - अकार. नपु प्र एक

अहम् - दकार. त्रि प्र एक

अग्निः - इकार. पु प्र एक

अहं - दकार. त्रि प्र एक

हुतम् - अकार. नपु प्र एक

पदार्थः

अहं - अहम्

क्रतुः - श्रौतकर्मभेदः

अहं - अहम्

यज्ञः - स्मार्तकर्म

स्वधा - पितृभ्यः प्रदेयमन्नम्

अहम् - अहम्

अहम् - अहम्

औषधम् - भेषजम्

Downloaded from www.omkaravidya.com

मन्त्रः - वेदमन्त्रः
अहम् - अहम्
अहम् - अहम्
एव - एव
आज्यम् - हविः
अहम् - अहम्
अग्निः - हुतभुक्
अहं - अहम्
हुतम् - हवनकर्म

अन्वयः
अहं क्रतुः अहं यज्ञः अहं स्वधा अहम् औषधम् अहं मन्त्रः अहम् आज्यमं अहम् एव अग्निः अहम्  हुतम् ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये  षोडषः श्लोकः । भगवान् श्रीकृष्णः "अहं क्रतुः अहं यज्ञः अहं स्वधा अहम् औषधम् अहं मन्त्रः अहम् आज्यमं अहम् एव अग्निः अहम्  हुतम् ।"  एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
क्रतुः + अहं - विसर्गरेफः
स्वधा + अहम् - सवर्णदीर्घसन्धिः
मन्त्रः +  अहम् - विसर्गउकारः
एव +  आज्यमं - सवर्णदीर्घसन्धिः
अग्निः + अहं - विसर्गरेफः

Downloaded from www.omkaravidya.com

मूलश्लोकः

पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोंकार ऋक्सामयजुरेव च ॥ ९.१७॥

पदच्छेदः
पिता अहम् अस्य जगतः माता धाता पितामहः वेद्यं पवित्रम् ओंकारः ऋक् साम यजुः एव च

पदपरिचयः
पिता - ऋकार पु प्र एक
अहम् - दकार त्रि प्र एक
अस्य - मकार नपु ष एक
जगतः - तकार नपु ष एक
माता - ऋकार स्त्री प्र एक
धाता - ऋकार पु प्र एक
पितामहः - अकार पु प्र एक
वेद्यं - अकार नपु प्र एक
पवित्रम् - अकार नपु प्र एक
ओंकारः - अकार पु प्र एक
ऋक् - चकार स्त्री प्र एक
साम - नकार नपु प्र एक
यजुः - षकार नपु प्र एक
एव - अव्ययम्
च - अव्ययम्

Downloaded from www.omkaravidya.com

पदार्थः
पिता - जनक:
अहम् - अहम्
अस्य - एतस्य
जगत: - भवनस्य
माता - जननी
धाता - कर्मफलधाता
पितामह: - पितु: पिता
वेद्यं - वेदितव्यम्
पवित्रम् - पावनम्
ओंकार: - प्रणव:
ऋक् - ऋक्
साम - साम
यजु: - यजु:
एव - एव
च - च

अन्वयः
अहम् एव अस्य जगत: पिता माता धाता पितामह: वेद्यं पवित्रम् ओंकार: ऋक् साम यजु: च ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां नवमे अध्याये सप्तदश: श्लोक: । भगवान् श्रीकृष्ण: "अहम् एव अस्य भुवनस्य जनक: जननी कर्मफल विधाता पितु: पिता वेदितव्यं पावनम् ओंकार: ऋक् साम यजु: च ।" एवम् अवदत् ।

व्याकरणम्

Downloaded from www.omkaravidya.com

▶ सन्धिः

पिता + अहम् - सवर्णदीर्घसन्धिः

जगतः + माता - विसर्गउकारः

यजुः + एव - विसर्गरेफः

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥ ९. १८॥

पदच्छेदः

गतिः भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधानं बीजम् अव्ययम्

पदपरिचयः

गतिः - इकार स्त्री प्र एक

भर्ता - ऋकार पु प्र एक

प्रभुः - उकार पु प्र एक

साक्षी - नकार पु प्र एक

निवासः - अकार पु प्र एक

शरणं - अकार नपु प्र एक

सुहृत् - तकार पु प्र एक

प्रभवः - अकार पु प्र एक

प्रलयः - अकार पु प्र एक

स्थानं - अकार नपु प्र एक

निधानं - अकार नपु प्र एक

Downloaded from www.omkaravidya.com

बीजम् -अकार नपु प्र एक
अव्ययम् - अकार नपु प्र एक

पदार्थः
गतिः - कर्मफलम्
भर्ता - पोष्टा
प्रभुः - स्वामी
साक्षी - द्रष्टा
निवासः - निवासः
शरणं - आर्तिहरः
सुहृत् - प्रत्युपहारानपेक्षः (सन्) उपकारी
प्रभवः - उत्पत्तिः
प्रलयः - प्रलयः
स्थानं - स्थानं
निधानं - निधानम्
बीजम् - बीजम्
अव्ययम् - नाशरहितम्

अन्वयः
गतिः भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधानं अव्ययम् बीजम् (अहम् एव) ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये अष्टादशः श्लोकः । भगवान् श्रीकृष्णः "गतिः भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधानं अव्ययम् बीजम् अहम् एव।" एवम् अवदत् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

गतिः + भर्ता -विसर्गरेफः

▶ समासः

न व्ययम् - अव्ययम् - नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ ९.१९॥

पदच्छेदः

तपामि अहम् अहं वर्षं निगृह्णामि उत्सृजामि च अमृतं च एव मृत्युः च सत् असत्अहम् अर्जुन

पदपरिचयः

तपामि - लट् उपु एक

अहम् दकार त्रि प्र एक

अहं दकार त्रि प्र एक

वर्षं - अकार पु द्वि एक

निगृह्णामि लट् उपु एक

उत्सृजामि - लट् उपु एक

च - अव्ययम्

अमृतं - अकार नपु प्र एक

च - अव्ययम्

Downloaded from www.omkaravidya.com

एव - अव्ययम्
मृत्युः - उकार पु प्र एक
च - अव्ययम्
सत् - तकार पु प्र एक
असत् - तकार पु प्र एक
अहम् - दकार त्रि प्र एक
अर्जुन - अकार पु सं प्र

पदार्थः

तपामि - तपामि
अहम् - अहम्
अहं - अहम्
वर्षं - वृष्टिम्
निगृह्णामि - रुणध्मि
उत्सृजामि- उत्सृजामि
च -च
अमृतं - अमृतम्
च - च
एव - एव
मृत्युः - मरणम्
च - च
सत् - कार्यम्
असत् - कारणम्
अहम् - अहम्
अर्जुन - अर्जुन

अन्वयः

Downloaded from www.omkaravidya.com

हे अर्जुन! अहं तपामि अहं वर्षं निगृह्णामि उत्सृजामि च । अमृतं च मृत्युः च सत् असत् च अहम् एव ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये नवदशः श्लोकः । भगवान् श्रीकृष्णः "हे अर्जुन! अहं तपामि अहं वर्षं निगृह्णामि उत्सृजामि च । अमृतं च मृत्युः च सत् असत् च अहम् एव ।" एवम् अवदत् ।

व्याकरणम्

▶ सन्धिः

तपामि + अहम् - यण्सन्धिः

निगृह्णामि + उत्सृजामि यण्सन्धिः

च + एव - वृद्धिसन्धिः

मृत्युः + च - विसरंगसकारः

सत् + असत् - जश्त्वसन्धिः

असत् + च - श्चुत्वसन्धिः

च + अहम् - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमसाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥ ९.२०॥

पदच्छेदः

त्रैविद्याः मां सोमपाः पूतपापाः यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते ते पुण्यम् आसाद्य सुरेन्द्रलोकम् अश्नन्ति दिव्यान् दिवि देवभोगान्

Downloaded from www.omkaravidya.com

पदपरिचयः
त्रैविद्याः - अकार पु प्र बहु
मां - दकार त्रि द्वि एक
सोमपाः - अकार पु प्र बहु
पूतपापाः - अकार पु प्र बहु
यज्ञैः - अकार पु तृ बहु
इष्ट्वा - क्त्वान्तम्
स्वर्गतिं - इकार स्त्री द्वि एक
प्रार्थयन्ते - लट् प्रपु वहु
ते - दकार पु प्र बहु
पुण्यम् - अकार पय द्वि एक
आसाद्य - ल्यबन्तम्
सुरेन्द्रलोकम् - अकार पु द्वि एक
अश्नन्ति - लट प्रपु बहु
दिव्यान् - अकार पु द्वि बहु
दिवि - आकार स्त्री स एक
देवभोगान् - अकार पु द्वि बहु

पदार्थः
त्रैविद्याः - ऋग्यजुःसामविदुः
मां - माम्
सोमपाः - सोमं पिबन्ति
पूतपापाः - शुद्धकिल्बिषाः
यज्ञैः - यज्ञैः
इष्ट्वा - पूजयित्वा
स्वर्गतिं - स्वर्गगमनम्
प्रार्थयन्ते - प्रार्थयन्ते

Downloaded from www.omkaravidya.com

ते - ते
पुण्यम् - पुण्यम्
आसाद्य - प्राप्य
सुरेन्द्रलोकम् - शतक्रतोः स्थानम्
अश्नन्ति - अनुभवन्ति
दिव्यान् - दिव्यान्
दिवि - स्वर्गे
देवभोगान् - देवभोगान्

अन्वयः
त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते । ते पुण्यम् सुरेन्द्रलोकम् आसाद्य दिवि दिव्यान् देवभोगान् अश्नन्ति ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये विंशतितमः श्लोकः । भगवान् श्रीकृष्णः "ऋग्यजुसामविदुः सोमपाः शुद्धकिल्बिषाः मां यज्ञैः पूजयित्वा स्वर्गगमनम् प्रार्थयन्ते । ते पुण्यम् सुरेन्द्रलोकम् प्राप्य स्वर्गे दिव्यान् देवभोगान् अश्नन्ति ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
पूतपापाः + यज्ञैः - विसर्गलोपः
यज्ञैः + इष्ट्वा - विसर्गरेफः

▶ समासः
तिस्रः विद्याः येषां ते त्रैविद्याः - समानाधिकरणबहुव्रीहिसमासः
सोमं पिबति इति सोमपः - उपपदसमासः - ते
पूतं पापं यस्य सः - पूतपापः - समानाधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

सुराणाम् इन्द्रः - सुरेन्द्रः - षष्ठीतत्पुरुषः
सुरेन्द्रस्य लोकः - सुरेन्द्रलोकः षष्ठीतत्पुरुषः
देवानाम् भोगः - देवभोगः -षष्ठीतत्पुरुषः - ते

▶ कृदन्ताः
इष्ट्वा - इष् + क्त्वा प्रत्ययः
आसाद्य - आ + षद् + ल्यप् प्रत्ययः

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामाकामा लभन्ते ॥ ९.२१॥

पदच्छेदः
ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति एवं त्रयीधर्मम् अनुप्रपन्नाः गतागतं कामाकामाः लभन्ते

पदपरिचयः
ते - दकार पु प्र बहु
तं - दकार पु द्वि एक
भुक्त्वा - क्त्वान्तम्
स्वर्गलोकं - अकार पु द्वि एक
विशालं - अकार पु द्वि एक
क्षीणे - अकार नपु स एक
पुण्ये - अकार नपु स एक

Downloaded from www.omkaravidya.com

मर्त्यलोकं - अकार पु द्वि एक
विशन्ति - लट् प्रपु बहु
एवं - अव्ययम्
त्रयीधर्मम् - अकार पु द्वि एक
अनुप्रपन्नाः - दकार पु प्र बहु
गतागतं - अकार नपु द्वि एक
कामाकामाः - अकार पु प्र बहु
लभन्ते - लट् प्रपु बहु

पदार्थः
ते - ते
तं - तम्
भुक्त्वा - अनुभूय
स्वर्गलोकं - स्वर्गलोकं
विशालं - विस्तीर्णम्
क्षीणे - विनष्टे
पुण्ये - पुण्ये
मर्त्यलोकं - मनुष्यलोकं
विशन्ति - आविशन्ति
एवं - एवम्
त्रयीधर्मम् - त्रयीधर्मम्
अनुप्रपन्नाः - अनुसृताः
गतागतं - यातायातम्
कामाकामाः - कामाकामाः
लभन्ते - प्राप्नुवन्ति

अन्वयः

Downloaded from www.omkaravidya.com

ते तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे मर्त्यलोकं विशन्ति । एवं त्रयीधर्मम् अनुप्रपन्ना: कामाकामा: गतागतं लभन्ते ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां नवमे अध्याये एकविंशतितम: श्लोक: । भगवान् श्रीकृष्ण: "ते तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे मर्त्यलोकं विशन्ति । एवं त्रयीधर्मम् अनुप्रपन्ना: कामाकामा: गतागतं लभन्ते ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
कामाकामा: + लभन्ते - विसर्गलोप:
अनुप्रपन्ना: + गतागतं - विसर्गलोप:

▶ समासः
कामान् कामयन्ते - कामकामा: उपपदसमास:
मर्त्यानाम् लोक: - मर्त्यलोक: षष्ठीतत्पुरुष:
गतं च अहतं च अनयो: समाहार: - गातागतम् समाहारद्वन्द्वसमास:

▶ कृदन्ता:
भुक्त्वा - भुज् + क्त्वा प्रत्यय:

श्रीमद्भगवद्गीता - नवमोऽध्याय: - राजविद्याराजगुह्ययोग:

मूलश्लोकः

अनन्याश्चिन्तयन्तो मां ये जना: पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ ९.२२॥

Downloaded from www.omkaravidya.com

पदच्छेदः

अनन्याः चिन्तयन्तः मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहामि अहम्

पदपरिचयः

अनन्याः - अकार पु प्र बहु
चिन्तयन्तः - तकार पु प्र बहु
मां - दकार त्रि द्वि एक
ये - दकार पु प्र बहु
जनाः - अकार पु प्र बहु
पर्युपासते - लट् प्रपु बहु
तेषां - दकार पु ष बहु
नित्याभियुक्तानां - अकार पु ष बहु
योगक्षेमं - अकार नपु द्वि एक
वहामि - लट् उपु एक
अहम् - दकार त्रि प्र एक

पदार्थः

अनन्याः - अपृथगभूताः
चिन्तयन्तः - ध्यायन्त
मां - माम्
ये - ये
जनाः - नराः
पर्युपासते - सर्वतः सेवन्ते
तेषां - तेषाम्
नित्याभियुक्तानां - सततयोगीनाम्
योगक्षेमं - अप्राप्तस्य प्रापणम् रक्षणम् च
वहामि - प्रापयिम

Downloaded from www.omkaravidya.com

अहं - अहम्

अन्वयः
ये जना: अनन्या: मां चिन्तयन्त: पर्युपासते नित्याभियुक्तानां तेषां योगक्षेमं अहं वहामि ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां नवमे अध्याये द्वाविंशतितम: श्लोक: । भगवान् श्रीकृष्ण: "ये जना: अनन्या: मां चिन्तयन्त: पर्युपासते नित्याभियुक्तानां तेषां योगक्षेमं अहं वहामि ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
अनन्या: + चिन्तयन्त: - विसर्गसकार:
चिन्तयन्त: + मां - विसर्गउकार:
वहामि + अहम् - यण्सन्धि:

▶ समासः
योग: च क्षेम: च एतेषां समाहार: योगक्षेमम् - समाहारद्वन्द्वसमास:

श्रीमद्भगवद्गीता - नवमोऽध्याय: - राजविद्याराजगुह्ययोग:

मूलश्लोकः

येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विता: ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ ९.२३ ॥

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।

Downloaded from www.omkaravidya.com

न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ ९.२४॥

पदच्छेदः
ये अपि अन्यदेवताः भक्ताः यजन्ते श्रद्धयान्विताः ते अपि माम् एव कौन्तेय यजन्ति अविधिपूर्वकम् अहं हि सर्वयज्ञानां भोक्ता च प्रभुः एव च न तु माम् अभिजानन्ति तत्त्वेन अतः च्यवन्ति ते

पदपरिचयः
ये - दकार पु प्र बहु
अपि - अव्ययम्
अन्यदेवताः - आकार स्त्री द्वि बहु
भक्ताः - अकार पु प्र बहु
यजन्ते - लट् प्रपु बहु
श्रद्धया - आकार स्त्री तृ एक
अन्विताः - अकार पु प्र बहु
ते - दकार पु प्र बहु
अपि - अव्ययम्
माम् - दकार त्रि द्वि एक
एव - अव्ययम्
कौन्तेय - अकार पु सं प्र
यजन्ति - लट् प्रपु बहु अविधिपूर्वकम् - अकार नपु द्वि एक
अहं - दकार त्रि प्र एक
हि - अव्ययम्
सर्वयज्ञानां - अकार पु ष बहु
भोक्ता - ऋकार पु प्र एक
च - अव्ययम्
प्रभुः - उकार पु प्र एक
एव - अव्ययम्

Downloaded from www.omkaravidya.com

च - अव्ययम्
न - अव्ययम्
तु - अव्ययम्
माम् - दकार त्रि द्वि एक
अभिजानन्ति - लट् प्रपु बहु
तत्त्वेन - अकार नपु तृ एक
अतः - अव्ययम्
च्यवन्ति - लट् प्रपु बहु
ते - दकार पु प्र बहु

पदार्थः
ये - ये
अपि - अपि
अन्यदेवताः - इतरदेवताः
भक्ताः - भक्ताः
यजन्ते - पूजयन्ते
श्रद्धया - आस्तिक्यबुद्धया
अन्विताः - अनुगताः
ते - ते
अपि - अपि
माम् - माम्
एव - एव
कौन्तेय - कुन्तीपुत्र
यजन्ति - सेवन्ते
अविधिपूर्वकम् - अज्ञानपूर्वकम्
अहं - अहम्
हि - हि
सर्वयज्ञानां - सकलयज्ञनाम्

Downloaded from www.omkaravidya.com

भोक्ता- अनुभविता
च - च
प्रभुः - नाथः
एव - एव
च - च
न - न
तु - तु
माम् - माम्
अभिजानन्ति - सम्यक् विदन्ति
तत्त्वेन - तत्त्वेन
अतः - अतः
च्यवन्ति - प्रच्यवन्ते
ते - ते

अन्वयः

हे कौन्तेय ! ये अपि भक्ताः श्रद्धया अन्विताः अन्यदेवताः यजन्ते ते अपि अविधिपूर्वकम् माम् एव यजन्ति । अहं एव हि सर्वयज्ञानां भोक्ता प्रभुः च । तु ते न तत्त्वेन मां अभिजानन्ति । अतः ते च्यवन्ति ।

तात्पर्यम्

इमौ श्लोकौ श्रीमद्भगवद्गीतायां नवमे अध्याये त्रयविंशतितमः च चतुर्विंशतितमः श्लोकौ । भगवान् श्रीकृष्णः "हे कौन्तेय ! ये अपि भक्ताः श्रद्धया अन्विताः अन्यदेवताः यजन्ते ते अपि अविधिपूर्वकम् माम् एव यजन्ति । अहम् एव सर्वयज्ञानां भोक्ता च प्रभुः च । माम् तत्त्वेन न अभिजानन्ति । अतः ते च्यवन्ति च ।" एवम अवदत् ।

व्याकरणम्

Downloaded from www.omkaravidya.com

▶ सन्धिः

ये + अपि - पूर्वरूपसन्धिः
अपि + अन्यदेवताः - यण्सन्धिः
भक्ताः + यजन्ते - विसर्गलोपः
श्रद्धया + अन्विताः - सवर्णदीर्घसन्धिः
ते + अपि - पूर्वरूपसन्धिः
भजन्ति + अविधिपूर्वकम् - यण्सन्धिः

प्रभुः + एव - विसर्गरेफः
तत्त्वेन + अतः - सवर्णदीर्घसन्धिः
अतः + च्यवन्ति - विसर्गसकारः

▶ समासः

अविधिपूर्वकम् - न विधिपूर्वकम् - नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः

यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥९.२५॥

पदच्छेदः

यान्ति देवव्रताः देवान् पितॄन् यान्ति पितृव्रताः भूतानि यान्ति भूतेज्याः यान्ति मद्याजिनः अपि माम्

पदपरिचयः

यान्ति - लट् प्रपु बहु
देवव्रताः - अकार पु प्र बहु

Downloaded from www.omkaravidya.com

देवान् - अकार पु द्वि बहु
पितॄन् - ऋकार पु द्वि बहु
यान्ति - लट् प्रपु बहु
पितृव्रता: - अकार पु प्र बहु
भूतानि - अकार नपु द्वि बहु
यान्ति - लट् प्रपु बहु
भूतेज्या: - अकार पु प्र बहु
यान्ति - लट् प्रपु बहु
मद्याजिन: - नकार पु प् बहु
अपि - अव्ययम्
माम् - दकार त्रि द्वि एक

पदार्थः
यान्ति - गच्छन्ति
देवव्रता: - देवपरायमणा:
देवान् -देवान्
पितॄन् - पितॄन्
यान्ति- गच्छन्ति
पितृव्रता: -पितृभक्ता:
भूतानि - भूतानि
यान्ति - गच्छन्ति
भूतेज्या: - भूतानां पूजका:
यान्ति - गच्छन्ति
मद्याजिन: -मद्यजनशीला:
अपि - अपि
माम् - माम्

अन्वयः

Downloaded from www.omkaravidya.com

देवव्रताः देवान् यान्ति । पितृव्रताः पितॄन् यान्ति । भूतेज्याः भूतानि यान्ति । मद्याजिनः अपि माम् यान्ति ।

तात्पर्यम्

अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये पञ्चविंशतितमः श्लोकः । भगवान् श्रीकृष्णः “देवव्रताः देवान् यान्ति । पितृव्रताः पितॄन् यान्ति ।भूतेज्याः भूतानि यान्ति ।मद्याजिनः अपि माम् यान्ति ।“ एवम् अवदत् ।

व्याकरणम्

▶ सन्धिः

देवव्रताः + देवान - विसर्गलोपः

भूतेज्याः + यान्ति - विसर्गलोपः

मद्याजिनः + अपि - विसर्गउकारः पूर्वरूपसन्धिः

▶ समासः

देवेषु व्रतं यस्य सः - देवव्रतः - व्यधिकरणबहुव्रीहिसमासः

पितृषु व्रतं यस्य सः - पितृव्रतः - व्यधिकरणबहुव्रीहिसमासः

भूतेषु इन्या यस्य सः - भूतेज्यः - व्यधिकरणबहुव्रीहिसमासः

मां यजते इति मद्याजिनः - उपपदसमासः

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ ९.२६॥

पदच्छेदः

Downloaded from www.omkaravidya.com

पत्रं पुष्पं फलं तोयं यः मे भक्त्या प्रयच्छति तत् अहं भक्त्या उपहृतम् अश्नामि प्रयतात्मनः

पदपरिचयः
पत्रं - अकार नपु द्वि एक
पुष्पं - अकार नपु द्वि एक
फलं - अकार नपु द्वि एक
तोयं - अकार नपु द्वि एक
यः - दकार पु प्र एक
मे - दकार त्रि च एक
भक्त्या - इकार स्त्री तृ एक
प्रयच्छति - लट् प्रपु एक
तत् - दकार नपु द्वि एक
अहं - दकार त्रि प्र एक
भक्त्या - इकार स्त्री तृ एक
उपहृतम् - अकार नपु द्वि एक
अश्नामि - लट् उपु एक
प्रयतात्मनः - नकार पु ष एक

पदार्थः
पत्रं - पर्णम्
पुष्पं - कुसुमम्
फलं - फलम्
तोयं - जलम्
यः - यः
मे - मह्यम्
भक्त्या - भक्त्या
प्रयच्छति - ददाति

Downloaded from www.omkaravidya.com

तत् - तत्
अहं - अहम्
भक्त्या - भक्त्या
उपहृतम् - दत्तम्
अश्नामि - गृह्णामि
प्रयतात्मनः - शुद्धबुद्धेः

अन्वयः
यः मे भक्त्या पत्रं पुष्पं फलं तोयं प्रयच्छति प्रयतात्मनः भक्त्या उपहृतम् तद् अहम् अश्नामि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये षड्विंशतितमः श्लोकः । भगवान् श्रीकृष्णः "यः मे भक्त्या पत्रं पुष्पं फलं तोयं प्रयच्छति प्रयतात्मनः (तस्य) तत् भक्त्या उपहृतम् अहम् अश्नामि ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
यः + मे - विसर्गउकारः
तत् + अहम् - जश्त्वसन्धिः

▶ समासः
प्रयतः आत्मा यस्य सः - प्रयतात्मनः - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ ९.२७॥

पदच्छेदः
यत् करोषि यत् अश्नासि यत् जुहोषि ददासि यत् यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्

पदपरिचयः
यत् - दकार नपु द्वि एक
करोषि - लट् मपु एक
यत् - दकार नपु द्वि एक
अश्नासि - लट् मपु एक
यत् - दकार नपु द्वि एक
जुहोषि - लट् मपु एक
ददासि - लट् मपु एक
यत् - दकार नपु द्वि एक
यत् - दकार नपु द्वि एक
तपस्यसि - लट् मपु एक
कौन्तेय - अकार पु सं प्र
तत् - दकार नपु द्वि एक
कुरुष्व - लट् मपु एक
मदर्पणम् - अकार नपु द्वि एक

पदार्थः

Downloaded from www.omkaravidya.com

यत् - यत्
करोषि - करोषि
यत् - यत्
अश्नासि -खादसि
यत् - यत्
जुहोषि - हवनं निर्वर्तयसि
ददासि- प्रयच्छसि
यत् - यत्
यत् - यत्
तपस्यसि - तपः चरसि
कौन्तेय - अर्जुन
तत् - तत्
कुरुष्व - कुरुष्व
मदर्पणम् - मत्समर्पणम्

अन्वयः
हे कौन्तेय! यत् अश्नासि यत् जुहोषि यत् ददासि यत् तपस्यसि यत् करोषि तत् मदर्पणम् कुरुष्व ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये सप्तविंशतितमः श्लोकः । भगवान् श्रीकृष्णः "हे कौन्तेय! यत् अश्नासि यत् जुहोषि यत् ददासि यत् तपस्यसि यत् करोषि तत् मदर्पणम् कुरुष्व ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
यत् + अश्नामि - जश्त्वसन्धिः यत् + जुहोषि - जश्त्वसन्धिः श्चुत्वसन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ ९.२८॥

पदच्छेदः
शुभाशुभफलैः एवं मोक्ष्यसे कर्मबन्धनैः संन्यासयोगयुक्तात्मा विमुक्तः माम् उपैष्यसि

पदपरिचयः
शुभाशुभफलैः - अकार नपु तृ बहु
एवं - अव्ययम्
मोक्ष्यसे - कर्मणि लट् मपु एक
कर्मबन्धनैः अकार नपु तृ बहु
संन्यासयोगयुक्तात्मा - नकार पु प्र एक
विमुक्तः - अकार पु प्र एक
माम् - दकार त्रि द्वि एक
उपैष्यसि - लृट् मपु एक

पदार्थः
शुभाशुभफलैः - इष्टानिष्टफलैः
एवं - एवम्
मोक्ष्यसे - मोक्ष्यसे
कर्मबन्धनैः - कर्मबन्धनैः
संन्यासयोगयुक्तात्मा – संन्यासयोगयुक्तात्मा

Downloaded from www.omkaravidya.com

विमुक्तः - विमुक्तः
माम् - माम्
उपैष्यसि - आगमिष्यसि

अन्वयः
एवं शुभाशुभफलैः कर्मबन्धनैः मोक्ष्यसे संन्यासयोगयुक्तात्मा विमुक्तः (सन्) माम् उपैष्यसि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये अष्टाविंशतितमः श्लोकः । भगवान् श्रीकृष्णः "एवं शुभाशुभफलैः कर्मबन्धनैः मोक्ष्यसे संन्यासयोगयुक्तात्मा विमुक्तः (सन्) माम् उपैष्यसि ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
शुभाशुभफलैः + एवं - विसर्गरेफः
विमुक्तः + माम् - विसर्गउकारः

▶ समासः
शुभं च अशुभं च एतेषां समाहारः - शुभाशुभम् - समाहारद्वन्द्वसमासः - तैः
कर्माणि एव बन्धनानि - कर्मबन्धनानि - अवधारणपूर्वपदकर्मधारयसमासः - तैः
संन्यासयोगेन युक्तात्मा - संन्यासयोगयुक्तात्मा - तृतीयातत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ ९.२९॥

पदच्छेदः
समः अहं सर्वभूतेषु न मे द्वेष्यः अस्ति न प्रियः ये भजन्ति तु मां भक्त्या मयि ते तेषु च अपि अहम्

पदपरिचयः
समः - अकार पु प्र एक
अहं - दकार त्रि प्र एक
सर्वभूतेषु - अकार नपु स बहु
न - अव्ययम्
मे - दकार त्रि ष एक
द्वेष्यः - अकार पु प्र एक
अस्ति - लट् प्रपु एक
न - अव्ययम्
प्रियः अकार पु प्र एक
ये - दकार पु प्र बहु
भजन्ति - लट प्रपु बहु
तु - अव्ययम्
मां - दकार त्रि द्वि एक
भक्त्या - इकार स्त्री तृ एक
मयि - दकार त्रि स एक

Downloaded from www.omkaravidya.com

ते - दकार पु प्र बहु
तेषु - दकार पु स बहु
च - अव्ययम्
अपि - अव्ययम्
अहम् - दकार त्रि प्र एक

पदार्थः
समः - तुल्यः
अहं - अहम्
सर्वभूतेषु - सर्वप्राणिषु
न - न
मे - मम
द्वेष्यः - अनिष्टः
अस्ति - अस्ति
न - न
प्रियः - इष्टः
ये - ये
भजन्ति - पूजयन्ते
तु - तु
मां - माम्
भक्त्या - भक्त्या
मयि - मयि
ते - ते
तेषु - तेषु
च - च
अपि - अपि
अहम् - अहम्

Downloaded from www.omkaravidya.com

अन्वयः
अहं सर्वभूतेषु समः (अस्मि) । न मे द्वेष्यः अस्ति ।न (मे) प्रियः (अस्ति) । ये तु मां भक्त्या भजन्ति मयि ते तेषु च अपि अहम् (अस्मि) ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये नवविंशतितमः श्लोकः । भगवान् श्रीकृष्णः "अहं सर्वभूतेषु समः (अस्मि) । न मे द्वेष्यः अस्ति ।न (मे) प्रियः (अस्ति) । ये तु मां भक्त्या भजन्ति मयि ते तेषु च अपि अहम् (अस्मि) ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
समः + अहम् - विसर्गउकारः पूर्वरूपसन्धिः
द्वेष्यः + अस्ति - विसर्गउकारः
च + अपि - सवर्णदीर्घसन्धिः
अपि + अहम् - यण्सन्धिः

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ ९.३०॥

पदच्छेदः
अपि चेत् सुदुराचारः भजते माम् अनन्यभाक् साधुः एव सः मन्तव्यः सम्यक् व्यवसितः हि सः

Downloaded from www.omkaravidya.com

पदपरिचयः

अपि - अव्ययम्

चेत् - अव्ययम्

सुदुराचारः - अकार पु प्र एक

भजते - लट् प्रपु एक

माम् - दकार त्रि द्वि एक

अनन्यभाक् - जकार पु प्र एक

साधुः - उकार पु प्र एक

एव - अव्ययम्

सः - दकार पु प्र एक

मन्तव्यः - अकार पु प्र एक

सम्यक् - अव्ययम्

व्यवसितः - अकार पु प्र एक

हि - अव्ययम्

सः - दकार पु प्र एक

पदार्थः

अपि - अपि

चेत् - चेत्

सुदुराचारः - अतीवकुत्सिताचारः

भजते - सेवते

माम् - ईश्वरम्

अनन्यभाक् - अनन्यभक्तिः सन्

साधुः - सद्वृत्तः

एव - एव

सः - सः

मन्तव्यः - ज्ञातव्यः

Downloaded from www.omkaravidya.com

सम्यक् - सम्यक्
व्यवसित: -व्यवसित:
हि - हि
स: - स:

अन्वयः
सुदुराचार: अपि अनन्यभाक् मां भजते चेत् स: साधु: एव मन्तव्य: हि स: सम्यक् व्यवसित: ।

तात्पर्यम्
अयं श्लोक: श्रीमद्भगवद्गीतायां नवमे अध्याये त्रिंशत्तम: श्लोक: । भगवान् श्रीकृष्ण: "सुदुराचार: अपि अनन्यभाक् मां भजते चेत् स: साधु: एव मन्तव्य: हि स: सम्यक् व्यवसित: ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
सुदुराचार: + भजते - विसर्गउकार:
साधु: + एव - विसर्गरेफ:
स: + मन्तव्य: - विसर्गलोप:
सम्यक् + व्यवसित: - जश्त्वसन्धि:

▶ समासः
अन्यं भजति इति अन्यभाक् - उपपदसमास:
न अन्यभाक् – अनन्यभाक् नञ् तत्पुरुष:

Downloaded from www.omkaravidya.com

मूलश्लोकः

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ९.३१॥

पदच्छेदः
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति

पदपरिचयः
क्षिप्रं - अव्ययम्
भवति - लट् प्रपु एक
धर्मात्मा - नकार पु प्र एक
शश्वच्छान्तिं - इकार स्त्री द्वि एक
निगच्छति -लट् प्रपु एक
कौन्तेय - अकार पु सं प्र
प्रतिजानीहि - विधि प्रपु एक
न - अव्ययम्
मे - दकार त्रि ष एक
भक्तः - अकार पु प्र एक
प्रणश्यति- लट् प्रपु एक

पदार्थः
क्षिप्रं - शीघ्रम्
भवति - भवति

Downloaded from www.omkaravidya.com

धर्मात्मा - धर्मचित्तः
शश्वच्छान्तिं - नित्यम् उपवासम्
निगच्छति - प्राप्नोति
कौन्तेय - अर्जुन
प्रतिजानीहि - प्रतिज्ञां कुरु
न - न
मे - मम
भक्तः - भक्तः
प्रणश्यति - नश्यति

अन्वयः
(सः) क्षिप्रं धर्मात्मा भवति । शश्वच्छान्तिं निगच्छति । हे कौन्तेय ! मे भक्तः न
प्रणश्यति (इति) प्रतिजानीहि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये एकत्रिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "सः क्षिप्रं धर्मात्मा भवति । शश्वच्छान्तिं निगच्छति । हे कौन्तेय ! मे भक्तः न प्रणश्यति (इति) प्रतिजानीहि ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
क्षिप्रम् + भवति - अनुस्वारसन्धिः

Downloaded from www.omkaravidya.com

मूलश्लोकः

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियोवैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥ ९.३२॥

पदच्छेदः
मां हि पार्थ व्यपाश्रित्य ये अपि स्युः पापयोनयः स्त्रियः वैश्याः तथा शूद्राः ते अपि यान्ति परां गतिम्

पदपरिचयः
मां - दकार त्रि द्वि एक
हि - अव्ययम्
पार्थ - अकार पु सं प्र
व्यपाश्रित्य - ल्यबन्तम्
ये - दकार पु प्र बहु
अपि - अव्ययम्
स्युः - विधि प्रपु बहु
पापयोनयः इकार पु प्र बहु
स्त्रियः - ईकार स्त्री प्र बहु
वैश्याः - अकार पु प्र बहु
तथा - अव्ययम्
शूद्राः - अकार पु प्र बहु
ते - दकार पु प्र बहु
अपि - अव्ययम्
यान्ति - लट् प्रपु बहु

Downloaded from www.omkaravidya.com

परां - अाकार स्त्री द्वि एक
गतिम् - इकार स्त्री द्वि एक

पदार्थः
मां - माम्
हि - हि
पार्थ - अर्जुन
व्यपाश्रित्य - आश्रयत्वेन गृहीत्वा
ये - ये
अपि - अपि
स्युः - भवेयुः
पापयोनयः - पापजन्मानः
स्त्रियः - महिलाः
वैश्याः - वैश्यकुलजाः
तथा - तथा
शूद्राः - शुद्राः
ते - ते
अपि - अपि
यान्ति गच्छन्ति
परां -प्रकृष्टाम्
गतिम् - गतिम्

अन्वयः
हे पार्थ ! ये अपि पापयोनयः स्युः तथा स्त्रियः वैश्याः शूद्राः अपि मां व्यपाश्रित्य परां गतिम् यान्ति हि ।

तात्पर्यम्

Downloaded from www.omkaravidya.com

अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये  द्वात्रिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "हे  पार्थ ! ये अपि पापयोनयः स्युः तथा स्त्रियः वैश्याः  शूद्राः  अपि मां व्यपाश्रित्य परां गतिम् यान्ति हि ।" एवम् अवदत् ।

व्याकरणम्

▶ सन्धिः

ये + अपि - पूर्वरूपसन्धिः

स्त्रियः +  वैश्याः - विसर्गउकारः

वैश्याः + तथा - विसर्गसकारः

शूद्राः + ते - विसर्गसकारः

ते + अपि - पूर्वरूपसन्धिः

▶ समासः

पापं योनिः यस्य सः पापयोनिः - समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता  - नवमोऽध्यायः  - राजविद्याराजगुह्ययोगः

मूलश्लोकः

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ९.३३॥

पदच्छेदः

किं पुनः ब्राह्मणाः पुण्याः भक्ताः राजर्षयः तथा अनित्यम् असुखं लोकम् इमं प्राप्य भजस्व माम्

पदपरिचयः

किं - मकार नपु प्र एक

Downloaded from www.omkaravidya.com

पुनः - अव्ययम्
ब्राह्मणाः - अकार पु प्र बहु
पुण्याः - अकार पु प्र बहु
भक्ताः - अकार पु प्र बहु
राजर्षयः - इकार पु प्र बहु
तथा - अव्ययम्
अनित्यम् - अकार पु द्वि एक
असुखं- अकार पु द्वि एक
लोकम् -अकार पु द्वि एक
इमं - मकार पु द्वि एक
प्राप्य - ल्यबन्तम्
भजस्व - लोट् मपु एक
माम् - दकार त्रि द्वि एक

पदार्थः
किं - किम्
पुनः - भूयः
ब्राह्मणाः - विप्राः
पुण्याः पुण्ययोनयः
भक्ताः - भक्ताः
राजर्षयः -राजर्षयः
तथा - तथा
अनित्यम् - क्षणभङ्गुरम्
असुखं - सुखवर्जितम्
लोकम् - मनुष्यलोकम्
इमं - इमम्
प्राप्य - लब्ध्वा
भजस्व - सेवस्व

Downloaded from www.omkaravidya.com

माम् - ईश्वरम्

अन्वयः
किं पुनः ब्राह्मणाः पुण्याः भक्ताः  तथा राजर्षयः  इमं अनित्यम्
असुखं  लोकम्  प्राप्य  माम् भजस्व ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये  त्रयस्त्रिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "किं पुनः ब्राह्मणाः पुण्याः भक्ताः  तथा राजर्षयः  इमं अनित्यम् असुखं  लोकम्  प्राप्य  माम् भजस्व ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
पुनः + ब्राह्मणाः - विसर्गरेफः
पुण्याः + भक्ताः - विसर्गलोपः
भक्ताः + राजर्षयः - विसर्गलोपः
राजर्षयः + तथा - विसर्गसकारः

▶ समासः
राजानः च ते ऋषयः च - राजर्षयः - विशेषणपूर्वपदकर्मधारयसमासः

श्रीमद्भगवद्गीता  - नवमोऽध्यायः  - राजविद्याराजगुह्ययोगः

मूलश्लोकः

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ९.३४॥

Downloaded from www.omkaravidya.com

पदच्छेदः

मन्मनाः भव मद्भक्तः मद्याजी मां नमस्कुरु माम् एव एष्यसि युक्त्वा एवम् आत्मानं मत्परायणः

पदपरिचयः

मन्मनाः - सकार पु प्र एक
भव - लोट मपु एक
मद्भक्तः - अकार पु प्र एक
मद्याजी - नकार पु प्र एक
मां - दकार त्रि द्वि एक
नमस्कुरु - लोट् मपु एक
माम् - दकार त्रि द्वि एक
एव - अव्ययम्
एष्यसि - लृट् मपु एक
युक्त्वा - क्त्वान्तम्
एवम् - अव्ययम्
आत्मानं - नकार पु द्वि एक
मत्परायणः - अकार पु प्र एक

पदार्थः

मन्मनाः - मच्चित्तः
भव - वर्तस्व
मद्भक्तः- मयि भक्तः
मद्याजी - मद्यजनशीलः
मां - ईश्वरम्
नमस्कुरु - प्रणम

Downloaded from www.omkaravidya.com

माम् - ईश्वरम्
एव - एव
एष्यसि - आगमिष्यसि
युक्तवा - युक्त्वा
एवम् - एवम्
आत्मानं - आत्मानम्
मत्परायणः - मदासक्तः

अन्वयः
मन्मनाः मद्भक्तः मद्याजी भव । मां नमस्कुरु । एवम् मत्परायणः आत्मानं (मयि) युक्तवा माम् एव एष्यसि ।

तात्पर्यम्
अयं श्लोकः श्रीमद्भगवद्गीतायां नवमे अध्याये चतुर्त्रिंशत्तमः श्लोकः । भगवान् श्रीकृष्णः "मन्मनाः मद्भक्तः मद्याजी भव । मां नमस्कुरु । एवम् मत्परायणः आत्मानं (मयि) युक्तवा माम् एव एष्यसि ।" एवम् अवदत् ।

व्याकरणम्
▶ सन्धिः
मन्मनाः + भव - विसर्गलोपः
मद्भक्तः + मद्याजी - विसर्गउकारः
एव + एष्यसि - वृद्धिसन्धिः
युक्त्वा + एवम् - वृद्धिसन्धिः

▶ समासः
मयि मनः यस्य सः - मत्मनः - व्यधिकरणबहुव्रीहिसमासः
मम भक्तः - मत्भक्तः - षष्ठीतत्पुरुषः
मां यजते इति मद्याजी - उपपदसमासः
अहम् एव परायणं यस्य सः - मत्परायणः - समानाधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

▶ कृदन्ताः
युक्त्वा - युज् + क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ॥ ९ ॥

पदच्छेदः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगः नाम नवमः अध्यायः

पदपरिचयः
ॐ - अव् धातुः + मन् प्रत्ययः
तत् - दकार. नपु. पु एक
सत् - दकार. नपु. प्र एक
इति - अव्ययम्
श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु
उपनिषत्सु - दकार. स्त्री स बहु
ब्रह्मविद्यायां - आकार. स्त्री ष.बहु
योगशास्त्रे - अकार. नपु. स. एक
श्रीकृष्णार्जुनसंवादे - अकार. पु. स. एक
राजविद्याराजगुह्ययोगः अकार. पु. प्र. एक
नाम - नकार.नपु. प्र एक
नवमः - अकार. पु. प्र एक

Downloaded from www.omkaravidya.com

अध्याय: - अकार. पु. प्र एक

पदार्थः
ॐ - ओम्
तत् - तत्
सत् - सत्
इति - एवम्
श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु
उपनिषत्सु - उपनिषत्सु
ब्रह्मविद्यायां - ब्रह्म पाठे
योगशास्त्रे - योगशास्त्रे
श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयो: मध्ये संवादे
राजविद्याराजगुह्ययोग: - राजविद्याराजगुह्ययोग:
नाम - नाम
नवम: - नवम:
अध्याय: - अध्याय:

अन्वयः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोग: नाम नवम: अध्याय: (संपूर्णम् भवति)

तात्पर्यम्
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोग: नाम नवम: अध्याय: (संपूर्णम् भवति)

व्याकरणम्
▶सन्धिः
सदिति - सत् + इति - जश्त्वसन्धि:

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीतासूपनिषत्सु - श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः
योगो नाम - योगः + नामः - विसर्ग उकारः
नवमोऽध्यायः - नवमः + अध्यायः - विसर्ग उकारः पूर्वरूपसन्धिः

▶ समासः
ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारयः

▶ कृदन्तः
ॐ - अव् + मन् प्रत्ययः
उपनिषत् - उप + नि + षद्

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता
# दशमोऽध्यायः
# विभूतियोगः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

भूय एव महाबाहो श्रुणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १०.१ ॥

पदच्छेदः
भूयः एव महाबाहो श्रुणु मे परमं वचः यत् ते अहं प्रीयमाणाय वक्ष्यामि हितकाम्यया

पदपरिचयः
भूयः - अव्ययम्
एव - अव्ययम्
महाबाहो - उकार पु सं प्र
श्रुणु - लोट् मपु एक
मे - दकार त्रि ष एक
परमं - अकार नपु द्वि एक
वचः - सकार नपु द्वि एक
यत् - दकार नपु द्वि एक
ते - दकार त्रि च एक
अहं - दकार त्रि प्र एक
प्रीयमाणाय - अकार पु च एक
वक्ष्यामि - लृट उपु एक
हितकाम्यया - आकार स्त्री तृ एक

पदार्थः
भूयः - पुनः

Downloaded from www.omkaravidya.com

एव - एव
महाबाहो - अर्जुन
श्रुणु - आकर्णय
मे - मदीयम्
परमं - प्रकृष्टम्
वचः - वाक्यम्
यत् - यत्
ते - तुभ्यम्
अहं - अहम्
प्रीयमाणाय - प्रीयमाणाय
वक्ष्यामि - कथयिष्यामि
हितकाम्यया - हितेच्छया

अन्वयः
हे महाबाहो! भूयः एव मे परमं वचः श्रुणु यत् अहं प्रीयमाणाय हितकाम्यया ते वक्ष्यामि ।

व्याकरणम्
▶ सन्धिः
भूयः + एव - विसर्गलोपः
ते + अहम् - पूर्वरूपसन्धिः

▶ समासः
हितस्य काम्या - हितकाम्या - षष्ठीतत्पुरुषः - तया

Downloaded from www.omkaravidya.com

मूलश्लोकः

न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥१०.२॥

पदच्छेदः
न मे विदुः सुरगणाः प्रभवं न महर्षयः अहम् आदिः हि देवानां महर्षीणां च सर्वशः

पदपरिचयः
न - अव्ययम्
मे - दकार त्रि ष एक
विदुः - लट् प्रपु बहु
सुरगणाः - अकार पु प्र बहु
प्रभवं - अकार पु द्वि एक
न अव्ययम्
महर्षयः - इकार पु प्र बहु
अहम् - दकार पु प्र एक
आदिः - इकार पु प्र बहु
हि - अव्ययम्
देवानां - अकार पु ष बहु
महर्षीणां - इकार पु ष बहु
च अव्ययम्
सर्वशः - अव्ययम्

Downloaded from www.omkaravidya.com

पदार्थः
न - न
मे - मम
विदुः - जानन्ति
सुरगणाः - ब्रह्मादयः
प्रभवं - उत्पत्तिम्
न - न
महर्षयः - महामुनयः
अहम् - अहम्
आदिः - कारणम्
हि - हि
देवानां - देवानां
महर्षीणां - महर्षीणां
च - च
सर्वशः - सर्वप्रकारैः

अन्वयः
सुरगणाः मे प्रभवं न विदुः । महर्षयः न (विदुः) । अहम् हि सर्वशः देवानां महर्षीणां च आदिः।

व्याकरणम्
▶ सन्धिः
आदिः + हि - विसर्गरेफः

▶ समासः
सुराणाम् गणः - सुरगणः - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

योो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ १०.३॥

पदच्छेदः
यः माम् अजम् अनादिं च वेत्ति लोकमहेश्वरम् असम्मूढः सः मर्त्येषु सर्वपापैः प्रमुच्यते

पदपरिचयः
यः - दकार पु प्र एक
माम् - दकार त्रि द्वि एक
अजम् - अकार पु द्वि एक
अनादिं - इकार पु द्वि एक
च - अव्ययम्
वेत्ति - लट् प्रपु एक
लोकमहेश्वरम् - अकार पु द्वि एक
असम्मूढः - अकार पु प्र एक
सः - दकार पु प्र एक
मर्त्येषु - अकार पु स बहु
सर्वपापैः- अकार नपु तृ बहु
प्रमुच्यते - लट् कर्मणि प्रपु एक

पदार्थः
यः - यः

Downloaded from www.omkaravidya.com

माम् - ईश्वरम्
अजम् - जननरहितम्
अनादिं - आदिरहितम्
च - च
वेत्ति - जानाति
लोकमहेश्वरम् - लोकाधिपतिम्
असम्मूढः - मोहरहितः
सः - सः
मर्त्येषु - मनुष्येषु
सर्वपापैः - सकलकिल्बिषैः
प्रमुच्यते - प्रमुच्यते

अन्वयः
यः माम् अनादिं अजम् लोकमहेश्वरम् च वेत्ति सः मर्त्येषु असम्मूढः । (सः) सर्वपापैः प्रमुच्यते ।

व्याकरणम्
▶ सन्धिः
यः + माम् - विसर्गउकारः
सः + मर्त्येषु - विसर्गलोपः

▶ समासः
लोकानाम् महेश्वरः - लोकमहेश्वरः - षष्ठितत्पुरुषः तम्
न संमूढः - असंमूढः - नञ्तत्पुरुषः
सर्वाणि पापानि - सर्वपापानि - विशेषणपूर्वपदकर्मधारयसमासः

Downloaded from www.omkaravidya.com

मूलश्लोकः

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।
सुखं दुः खं भवोऽभावो भयं चाभयमेव च । १०.४॥

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥१०.०५॥

पदच्छेदः
बुद्धिः ज्ञानम् असंमोहः क्षमा सत्यं दमः शमः सुखं दुः खं भवः अभावः भयं च अभयम् एव च अहिंसा समता तुष्टिः तपः दानं यशः अयशः भवन्ति भावाः भूतानां मत्तः एव पृथग्विधाः

पदपरिचयः
बुद्धिः - इकार स्त्री प्र एक
ज्ञानम् - अकार नपु प्र एक
असंमोहः -अकार पु प्र एक
क्षमा - आकार स्त्री प्र एक
सत्यं - अकार नपु प्र एक
दमः - अकार पु प्र एक
शमः - अकार पु प्र एक
सुखं अकार नपु प्र एक
दुः खं -अकार नपु प्र एक
भवः - अकार पु प्र एक
अभावः अकार पु प्र एक

Downloaded from www.omkaravidya.com

भयं - अकार नपु प्र एक
च - अव्ययम्
अभयम् - अकार नपु प्र एक
एव - अव्ययम्
च - अव्ययम्
अहिंसा - आकार स्त्री प्र एक
समता आकार स्त्री प्र एक
तुष्टिः - इकार स्त्री प्र एक
तपः - सकार नपु प्र एक
दानं - अकार नपु प्र एक
यशः - सकार नपु प्र एक
अयशः सकार नपु प्र एक
भवन्ति - लट् प्रपु बहु
भावाः - अकार पु प्र बहु
भूतानां - अकार नपु ष बहु
मत्तः - अव्ययम्
एव- अव्ययम्
पृथग्विधाः - अकार पु प्र बहु

पदार्थः
बुद्धिः - बुद्धिः
ज्ञानम् - आत्मस्वरूपज्ञानम्
असंमोहः - असंमोहः
क्षमा - क्षमा
सत्यं - सत्यम्
दमः - बाह्येन्द्रियोपशमः
शमः - अन्तः करणस्य उपशमः
सुखं - आह्लादः

Downloaded from www.omkaravidya.com

दु: खं - सन्तापः
भवः - उद्भवः
अभावः - उद्भवरहितः
भयं - भयम्
च - च
अभयम् - अभयम्
एव - एव
च - च
अहिंसा - प्राणिनाम् अपीडा
समता - समचित्तता
तुष्टिः - लाभेषु पर्यायबुद्धिः
तपः - तपः
दानं - संविभागः
यशः कीर्तिः
अयशः - अकीर्तिः
भवन्ति - भवन्ति
भावाः - भावाः
भूतानां - प्राणिनाम्
मत्तः - ईश्वरतः
एव - एव
पृथग्विधाः - नानाविधाः

अन्वयः
बुद्धिः ज्ञानम् असंमोहः क्षमा सत्यं दमः शमः सुखं दु: खं भवः अभावः भयं अभयम् अहिंसा समता तुष्टिः तपः दानं यशः अयशः च पृथग्विधाः भावाः भूतानां एव च मत्तः एव भवन्ति ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

बुद्धिः + ज्ञानम् - विसर्गरेफः

भवः + अभावः - विसर्गउकारः

च + अभयम् - सवर्णदीर्घसन्धिः

तुष्टिः+ तपः - विसर्गसकारः

तपः + दानं - विसर्गउकारः

यशः + अयशः - विसर्गउकारः पूर्वरूपसन्धिः

मत्तः + एव - विसर्गलोपः

▶ समासः

असंमोहः न संमोहः - नञ्त त्पुरुषः

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥१०.६॥

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः ॥ १०.७॥

Downloaded from www.omkaravidya.com

पदच्छेदः
महर्षयः सप्त पूर्वे चत्वारः मनवः तथा मद्भावाः मानसाः जाताः येषां लोके इमाः प्रजाः एतां विभूतिं योगं च मम यः वेत्ति तत्त्वतः सः अविकम्पेन योगेन युज्यते न अत्र संशयः

पदपरिचयः
महर्षयः - इकार पु प्र बहु
सप्त - नकार त्रि प्र बहु
पूर्वे - अकार पु प्र बहु
चत्वारः - रेफान्त पु प्र बहु
मनवः - उकार पु प्र बहु
तथा - अव्ययम्
मद्भावाः - अकार पु प्र बहु
मानसाः - नकार पु प्र बहु
जाताः - अकार पु प्र बहु
येषां - दकार पु ष बहु
लोके - अकार पु स एक
इमाः - मकार स्त्री प्र बहु
प्रजाः - आकार स्त्री प्र बहु
एतां - दकार स्त्री द्वि एक
विभूतिं - इकार स्त्री द्वि एक
योगं - अकार पु द्वि एक
च अव्ययम्
मम - दकार पु ष एक
यः - दकार पु प्र एक
वेत्ति - लट् प्रपु एक
तत्त्वतः - अव्ययम्
सः - दकार पु प्र एक

Downloaded from www.omkaravidya.com

अविकम्पेन - अकार पु तृ एक
योगेन -अकार पु तृ एक
युज्यते - लट् प्रपु एक
न - अव्ययम्
अत्र - अव्ययम्
संशय: - अकार पु प्र एक

पदार्थः
महर्षय: - महामुनय:
सप्त - सप्त
पूर्वे - अतीतकालसमबन्धिन:
चत्वार: - चत्वार:
मनव: - मनव:
तथा - तथा
मद्भावा: - मच्चिन्तनपरा:
मानसा: - मानसा:
जाता: - उत्पन्ना:
येषां - येषां
लोके - भुवने
इमा: - इमा:
प्रजा: - जना:
एतां - एताम्
विभूतिं - विस्तारम्
योगं - योगं
च - च
मम - मम
य: - य:
वेत्ति - जानाति

Downloaded from www.omkaravidya.com

तत्त्वतः - तत्त्वतः
सः - सः
अविकम्पेन - अप्रचलितेन
योगेन - योगेन
युज्यते - सम्बध्यते
न - न
अत्र - अत्र
संशयः - सन्देहः

अन्वयः
पूर्वे सप्तमहर्षयः तथा चत्वारः मनवः मद्भावाः मानसाः जाताः येषां लोके इमाः प्रजाः मम एतां विभूतिं योगं च तत्त्वतः यः वेत्ति सः अविकम्पेन योगेन युज्यते । अत्र न संशयः ।

व्याकरणम्
▶ सन्धिः
चत्वारः + मनवः - विसर्गउकारः
मनवः + तथा - विसर्गसकारः
मद्भावाः + मानसाः - विसर्गलोपः
मानसाः + जाताः - विसर्गलोपः
जाताः + येषाम् - विसर्गलोपः
लोके + इमाः - यान्तवान्तदेशसन्धिः य लोपः
यः + वेत्ति - विसर्गउकारः
सः + अविकम्पेन - विसर्गउकारः पूर्वरूपसन्धिः
न + अत्र - सवर्णदीर्घसन्धिः

▶ समासः
मम भावः - मद्भावः - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ १०.०८॥

पदच्छेदः
अहं सर्वस्य प्रभवः मत्तः सर्वं प्रवर्तते इति मत्वा भजन्ते मां बुधाः भावसमन्विताः

पदपरिचयः
सर्वस्य - अकार पु ष एक
प्रभवः - अकार पु प्र एक
मत्तः - अस्मद् + तसिल् प्रत्ययः
सर्वं -अकार पु प्र एक
प्रवर्तते - लट् प्रपु एक
मत्वा - क्त्वान्तम्
भजन्ते - लट प्रपु बहु
बुधाः - अकार पु प्र बहु
भावसमन्विताः - अकार पु प्र बहु

पदार्थः
सर्वस्य - सकलस्य
प्रभवः - उत्पत्तिः
मत्तः - परब्रह्मणः

Downloaded from www.omkaravidya.com

सर्वं -सकलम्
प्रवर्तते - संभवति
मत्वा - ज्ञात्वा
भजन्ते - सेवन्ते
बुधाः - अवगततत्त्वार्थाः
भावसमन्विताः - भावसंयुक्ताः

अन्वयः
अहं सर्वस्य प्रभवः । मत्तः सर्वं प्रवर्तते । इति मत्वा बुधाः भावसमन्विताः मां भजन्ते ।

व्याकरणम्
▶ सन्धिः
प्रभवः + मत्तः - विसर्गउकारः
बुधाः + भावसमन्विताः - विसर्गलोपः

▶ समासः
भावेन समन्विताः - भावसमन्विताः - तृतीया तत्पुरुषः

▶ कृदन्ताः
मत्वा - मन् + क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ १०.९॥

Downloaded from www.omkaravidya.com

पदच्छेदः
मच्चित्ताः मद्गतप्राणाः बोधयन्तः परस्परम् कथयन्तः च मां नित्यं तुष्यन्ति च रमन्ति च

पदपरिचयः
मच्चित्ताः - अकार पु प्र बहु
मद्गतप्राणाः - अकार पु प्र बहु
बोधयन्तः - तकार पु प्र बहु
परस्परम् - अकार पु द्वि एक
कथयन्तः - तकार पु प्र बहु
नित्यं - अव्ययम्
तुष्यन्ति - लट् प्रपु बहु
रमन्ति - लट् प्रपु बहु

पदार्थः
मच्चित्ताः - मन्मनाः
मद्गतप्राणाः -मद्गतेन्द्रियाः
बोधयन्तः - अवगमयन्तः
परस्परम् - अन्योन्यम्
कथयन्तः - कीर्तयन्तः
नित्यं - सर्वदा
तुष्यन्ति - मोदन्ते
रमन्ति - विहरन्ति

अन्वयः
मच्चित्ताः मद्गतप्राणाः परसपरं मां बोधयन्तः कथयन्तः च नित्यं तुष्यन्ति च रमन्ति च ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

मच्चित्ता: + मद्गतप्राणा: - विसर्गलोप:
मद्गतप्राणा: + बोधयन्त: - विसर्गलोप:
कथयन्त: + च - विसर्गसकार:

▶ समासः

मयि चित्तं यस्य स: मच्चित्त: - व्यधिकरणबहुव्रीहिसमास: - ते
मां गत: प्राणा: यस्य स: - मद्गतप्राण: व्यधिकरणबहुव्रीहिसमास: - ते

श्रीमद्भगवद्गीता - दशमोऽध्याय: - विभूतियोग:

मूलश्लोकः

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥१०.१०॥

पदच्छेदः
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ददामि बुद्धियोगं तं येन माम् उपयान्ति ते

पदपरिचयः
सततयुक्तानां - अकार पु ष बहु
भजतां - तकार पु ष बहु
प्रीतिपूर्वकम् - अकार नपु द्वि एक
ददामि - लट् उपु एक
बुद्धियोगं - अकार पु द्वि एक

Downloaded from www.omkaravidya.com

येन - दकार पु तृ एक
उपयान्ति - लट् प्रपु बहु
ते - दकार पु प्र बहह्व

पदार्थः
सततयुक्तानां - नित्याभियुक्तानाम्
भजतां - सेवमानानाम्
प्रीतिपूर्वकम् - स्नेहपूर्वकम्
ददामि - प्रयच्छामि
बुद्धियोगं -बुद्धियोगं
येन - येन
उपयान्ति - प्रतिपद्यन्ते
ते - ते

अन्वयः
सततयुक्तानां प्रीतिपूर्वकम् भजतां तेषां तं बुद्धियोगं ददामि । येन ते माम् उपयान्ति ।

व्याकरणम्
▶ सन्धिः
तेषां +सततयुक्तानां - अनुस्वारसन्धिः
सततयुक्तानां +भजतां - अनुस्वारसन्धिः

Downloaded from www.omkaravidya.com

मूलश्लोकः

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥१०.११॥

पदच्छेदः
तेषाम् एव अनुकम्पार्थम् अहम् अज्ञानजं तमः नाशयामि आत्मभावस्थः ज्ञानदीपेन भास्वता

पदपरिचयः
अनुकम्पार्थम् - अव्ययम्
अज्ञानजं - अकार नपु द्वि एक
तमः - सकार नपु द्वि एक
नाशयामि - लट् धातु उपु एक
आत्मभावस्थः - अकार पु प्र एक
ज्ञानदीपेन - अकार पु तृ एक
भास्वता - तकार पु तृ एक

पदार्थः
अनुकम्पार्थम् - दयाहेतोः
अज्ञानजं - मिथ्याज्ञानोत्पन्नम्
तमः - अन्धकारम्
नाशयामि - विध्वंशयामि
आत्मभावस्थः - आत्मभावस्थः
ज्ञानदीपेन - ज्ञानदीपेन
भास्वता - प्रकाशमानेन

Downloaded from www.omkaravidya.com

अन्वयः
आत्मभावस्थ: अहम् अनुकम्पार्थम्   तेषाम् एव भास्वता ज्ञानदीपेन अज्ञानजं तम: नाशयामि   ।

व्याकरणम्
▶ सन्धिः
एव + अनुकम्पार्थम् - सवर्णदीर्घसन्दसि:
नाशयामि + आत्मभावस्थ: - यण्सन्धि:
आत्मभावस्थ: + ज्ञानदीपेन - विसर्गउकार:

▶ समासः
आत्मन: भाव: - आत्मभाव: - षष्ठीतत्पुरुष:
ज्ञानम् एव दीप: ज्ञानदीप: - अवधारणापूर्वपदकर्मधारयसमास:

श्रीमद्भगवद्गीता - दशमोऽध्याय: - विभूतियोग:

मूलश्लोकः

अर्जुन उवाच
परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १०.१२॥

आहुस्त्वामृषय: सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यास: स्वयं चैव ब्रवीषि मे ॥ १०.१३॥

Downloaded from www.omkaravidya.com

पदच्छेदः
परं ब्रह्म परं धाम पवित्रं परमं भवान् पुरुषं शाश्वतं दिव्यम् आदिदेवम् अजं विभुम् आहुः त्वाम् ऋषयः सर्वे देवर्षिः नारदः तथा असितः देवलः  व्यासः स्वयं च एव ब्रवीषि मे

पदपरिचयः
परं - अकार नपु प्र एक
ब्रह्म  नकार पु प्र एक
धाम -  नकार नपु प्र एक
पवित्रं  - अकार नपु प्र एक
परमं -  अकार नपु प्र एक
पुरुषं - अकार पु द्वि एक
शाश्वतं - अकार पु द्वि एक
दिव्यम् - अकार पु द्वि एक
आदिदेवम् - अकार पु द्वि एक
अजं - अकार पु द्वि एक
विभुम् - अकार पु द्वि एक
आहुः - लट् प्रपु बहु
ऋषयः - इकार पु प्र बहु
देवर्षिः - इकार पु प्र एक
नारदः - अकार पु प्र एक
असितः - अकार पु प्र एक
देवलः -  अकार पु प्र एक
व्यासः-  अकार पु प्र एक
ब्रवीषि  - लट् मपु एक
मे - दकार त्रि च एक

Downloaded from www.omkaravidya.com

पदार्थः

परं - परम्

ब्रह्म - परमात्मा

धाम - तैजः

पवित्रं - पावनम्

परमं - प्रकृष्टम्

पुरुषं - पुरुषं

शाश्वतं - नित्यम्

दिव्यम् - दिविभवम्

आदिदेवम् - सर्वदेवानाम् आदौ भवं देवम्

अजं - जन्मरहितम्

विभुम् - विभवनशीलम्

आहुः - कथयन्ति

ऋषयः - वसिष्ठादयः

देवर्षिः - सुर र्षिः

नारदः - नारदः

असितः - असितः

देवलः - देवलः

व्यासः - वेदव्यासः

ब्रवीषि - वदसि

मे - मह्यम्

अन्वयः

भवान् परं ब्रह्म परं धाम परमं पवित्रं । सर्वे ऋषयः तथा देवर्षिः नारदः असितः देवलः व्यासः त्वाम् पुरुषं शाश्वतं दिव्यम् आदिदेवम् अजं विभुम् (इति) आहुः । (तथा) स्वयं च एव मे ब्रवीषि ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

आहुः + त्वाम् - विसर्गसकारः
देवर्षिः + नारदः - विसर्गरेफः
नारदः + तथा - विसर्गसकारः
असितः + देवलः - विसर्गउकारः
देवलः + व्यासः - विसर्गउकारः
च + एव - वृद्धिसन्धिः

▶ समासः

आदिः च देवः च - आदिदेवः - कर्मधारयसमासः

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥१०.१४॥

पदच्छेदः

सर्वम् एतत् ऋतं मन्ये यत् मां वदसि केशव न हि ते भगवन् व्यक्तिं विदुः देवाः न दानवाः

पदपरिचयः

सर्वम् - अकार नपु द्वि एक
ऋतं - अकार नपु द्वि एक

Downloaded from www.omkaravidya.com

मन्ये - लट् उपु एक
वदसि - लट् मपु एक
ते - दकार त्रि ष एक
भगवन् - नकार नपु सं प्र
व्यक्तिं - ईकार स्त्री द्वि एक
विदुः - लट् प्रपु बहु
देवाः - अकार पु प्र बहु
दानवाः अकार पु प्र बहु

पदार्थः
सर्वम् - सकलम्
ऋतं - सत्यम्
मन्ये - चिन्तयामि
वदसि - कथयसि
ते - तव
भगवन् - स्वामिन्
व्यक्तिं - प्रभवम्
विदुः - जानन्ति
देवाः - सुराः
दानवाः - असुराः

अन्वयः
हे केशव । यत् मां वदसि एतत् सर्वम् ऋतं मन्ये । हे भगवन् न देवाः न दानवाः ते व्यक्तिं विदुः ।

व्याकरणम्
▶ सन्धिः
एतत् + ऋतम् - जश्त्वसन्धिः

Downloaded from www.omkaravidya.com

यत् + माम् - अनुनासिकासन्धिः
विदुः + देवाः - विसर्गरेफः
देवाः + न - विसर्गलोपः

▶ तद्धितान्ताः
दनोः अपत्यं पुमान् दानवः - ते

## श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥ १०.१५॥

पदच्छेदः
स्वयम् एव आत्मना आत्मानं वेत्थ त्वं पुरुषोत्तम भूतभावन भूतेश देवदेव जगत्पते

पदपरिचयः
आत्मना - नकार पु तृ एक
आत्मानं - नकार पु द्वि एक
वेत्थ - लट् मपु एक
पुरुषोत्तम - अकार पु सं प्र
भूतभावन अकार पु सं प्र
भूतेश - अकार पु सं प्र
देवदेव - अकार पु सं प्र
जगत्पते - इकार पु सं प्र

Downloaded from www.omkaravidya.com

पदार्थः
आत्मना - स्वेन
आत्मानं - स्वम्
वेत्थ - जानासि
पुरुषोत्तम - कृष्ण
भूतभावन - भूतभावन
भूतेश - भूतेश
देवदेव - देवदेव
जगत्पते - लोकाधिपते

अन्वयः
हे पुरुषोत्तम! भूतभावन! भूतेश ! देवदेव ! जगत्पते ! त्वं स्वयम् एव आत्मना आत्मानं वेत्थ ।

व्याकरणम्
▶ सन्धिः
आत्मानं + वेत्थ - अनुस्वारसन्धिः

▶ समासः
पुरुषेषु उत्तमः - पुरुषोत्तमः - सप्तमीतत्पुरुषः
भूतानि भावयति इति भूतभावनः - उपपदसमासः
भूतानाम् ईशः - भूतेशः - षष्ठीतत्पुरुषः
देवानां देवः - देवदेवः -षष्ठीतत्पुरुषः
जगतः पतिः - जगत्पतिः षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १०.१६॥

पदच्छेदः
वक्तुम् अर्हसि अशेषेण दिव्याः हि आत्मविभूतयः याभिः विभूतिभिः लोकान् इमान् त्वं व्याप्य तिष्ठसि

पदपरिचयः
वक्तुम् - क्त्वान्तम्
अर्हसि - लट् मपु एक
अशेषेण - अकार पु तृ एक
दिव्याः - अाकार स्त्री प्र बहु
आत्मविभूतयः - इकार स्त्री प्र बहु
याभिः - द स्त्री तृ बहु
विभूतिभिः - ई स्त्री तृ बहु
लोकान् - अकार पु द्वि बहु
व्याप्य - ल्यबन्तम्
तिष्ठसि - लट् मपु एक

पदार्थः
वक्तुम् - कथयितुम्
अर्हसि - अर्हसि
अशेषेण - पूर्णेन
दिव्याः - अद्भुताः

Downloaded from www.omkaravidya.com

आत्मविभूतयः - आत्मश्रेष्ठताः
याभिः - याभिः
विभूतिभिः - विभूतिभिः
लोकान् - भुवनानि
व्याप्य - व्याप्य
तिष्ठसि - वर्तसे

अन्वयः
(तव) आत्मविभूतयः दिव्याः हि। याभिः विभूतिभिः इमान् लोकान् व्याप्य तिष्ठसि । (ताः) अशेषेण वक्तुम् त्वं (एव) अर्हसि ।

व्याकरणम्
▶ सन्धिः
अर्हसि + अशेषेण - यण्सन्धिः
दिव्याः + हि - विसर्गलोपः
हि + आत्मविभूतयः - यण्सन्धिः
याभिः + विभूतिभिः - विसर्गरेफः
विभूतिभिः + लोकान् - विसर्गरेफः
इमान् + त्वं - सत्वसन्धिः

▶ समासः
आत्मनः विभूतिः - आत्मविभूतिः - षष्ठीतत्पुरुषः - ते

▶ कृदन्ताः
वक्तुम्- वच् + तुमुन् प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥१०.१७॥

पदच्छेदः
कथं विद्याम् अहं योगिं त्वाम् सदा परिचिन्तयन् केषु केषु च भावेषु चिन्त्यः असि भगवन् मया

पदपरिचयः
विद्याम् - विधि उपु एक
योगिन् - नकार पु स प्र
परिचिन्तयन् - शत्रन्तम्
भावेषु - अकार पु स बहु
चिन्त्यः - अकार पु प्र एक
असि - लट् मपु एक
भगवन् - तकार पु सं प्र
मया - दकार त्रि तृ एक

पदार्थः
विद्याम् - विजानियाम्
योगिन् - हे योगिन्
परिचिन्तयन् - ध्यायन्
भावेषु - वस्तुषु
चिन्त्यः - ध्येयः

Downloaded from www.omkaravidya.com

असि - असि
भगवन् - स्वामिन्

अन्वयः
हे योगिन् अहं त्वां सदा परिचिन्तयन् कथं विद्याम् ? हे भगवन् केषु केषु च भावेषु मया चिन्त्यः असि ।

व्याकरणम्
▶ सन्धिः
योगिन् + त्वाम् - सत्वसन्धिः
चिन्त्यः + असि - विसर्गउकारः पूर्वरूपसन्धिः

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि श्रृण्वतो नास्ति मेऽमृतम् ॥१०.१८॥

पदच्छेदः
विस्तरेण आत्मनः योगं विभूतिं च जनार्दन भूयः कथय तृप्तिः हि श्रृण्वतः न अस्ति मे अमृतम्

पदपरिचयः
विस्तरेण - अकार पु तृ एक
आत्मनः - नकार पु ष एक

Downloaded from www.omkaravidya.com

योगं - अकार पु द्वि एक
विभूतिं - इकार स्त्री द्वि एक
जनार्दन - अकार पु सं प्र
भूयः - अव्ययम्
कथय - लोट् मपु एक
तृप्तिः इकार स्त्री प्र एक
श्रृण्वतः- तकार पु ष एक
अस्ति - लट् प्रपु एक
मे - दकार त्रि ष एक
अमृतम् - अकार नपु द्वि एक

पदार्थः
विस्तरेण - विस्तरेण
आत्मनः - स्वस्य
योगं - योगम्
विभूतिं - ऐश्वर्यं
जनार्दन - कृष्ण
भूयः - पुनः
कथय - वद
तृप्तिः - तुष्टिः
श्रृण्वतः - आकर्ण्यतः
अस्ति - विद्यते
मे - मम
अमृतम् - अमृतम्

अन्वयः
हे जनार्दन! आत्मनः योगं विभूतिं च विस्तरेण भूयः कथय। हि अमृतम् श्रृण्वतः मे तृप्तिः न अस्ति ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

विस्तरेण + आत्मनः - सवर्णदीर्घसन्धिः

आत्मनः + योगं - विसर्गउकारः

तृप्तिः + हि - विसर्गरेफः

श्रृण्वतः + न - विसर्गउकारः

न + अस्ति -सवर्णदीर्घसन्धिः

मे + अमृतम् - पूर्वरूपसन्धिः

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

श्री भगवानुवाच

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।

प्रधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ १०.१९॥

पदच्छेदः

श्री भगवानुवाच

हन्त ते कथयिष्यामि दिव्याः हि आत्मविभूतयः प्रधान्यतः कुरुश्रेष्ठ न अस्ति अन्तः विस्तरस्य मे

पदपरिचयः

हन्त - अव्ययम्

कथयिष्यामि -लृट् उपु एक

Downloaded from www.omkaravidya.com

दिव्याः - आकार स्त्री प्र बहु
आत्मविभूतयः - इकार स्त्री प्र बहु
प्रधान्यतः  अव्ययम्
कुरुश्रेष्ठ - अकार पु सं प्र
अन्तः अकार पु प्र एक
विस्तरस्य - अकार पु ष एक
मे - दकार त्रि ष एक

पदार्थः
हन्त - अहो
कथयिष्यामि -वदिष्यामि
दिव्याः - अद्भुताः
आत्मविभूतयः - स्वस्य ऐश्वर्यविशेषाः
प्रधान्यतः  - मुख्यतः
कुरुश्रेष्ठ - अर्जुन
अन्तः अवधिः
विस्तरस्य - वैशाल्यस्य
मे - मम

अन्वयः
श्री भगवानुवाच
हे कुरुश्रेष्ठ !हन्त ते दिव्याः  आत्मविभूतयः प्रधान्यतः कथयिष्यामि  । हि  मे विस्तरस्य अन्तः नास्ति ।

व्याकरणम्
▶ सन्धिः
दिव्याः + हि - विसर्गलोपः

Downloaded from www.omkaravidya.com

हि + आत्मविभूतयः - यण् सन्धिः
न + अस्ति - सवर्णदीर्घसन्धिः
अस्ति + अन्तः - यण्सन्धिः
अन्तः + विस्तरस्य - विसर्गउकारः

▶ समासः
आत्मनः विभूतिः - षष्ठीतत्पुरुषः - ताः
कुरुषु श्रेष्ठः - कुरुश्रेष्ठः - सप्मीतत्पुरुषः

## श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥ १०.२०॥

पदच्छेदः
अहम् आत्मा गुडाकेश सर्वभूताशयस्थितः अहम् आदिः च मध्यं च भूतानाम् अन्तः एव च

पदपरिचयः
आत्मा - नकार पु प्र एक
गुडाकेश - अकार पु सं प्र
सर्वभूताशयस्थितः - अकार पु प्र एक
आदिः - इकार पु प्र एक

Downloaded from www.omkaravidya.com

मध्यं - अकार नपु प्र एक
भूतानाम् - अकार पु ष बहु
अन्तः - अकार पु प्र एक

पदार्थः
आत्मा - प्रत्यगात्मा
गुडाकेश - अर्जुन
सर्वभूताशयस्थितः -सर्वप्राणिहृदयस्थितः
आदिः - कारणम्
मध्यं - स्थितिः
भूतानाम् - प्राणिनाम्
अन्तः - प्रलयः
अन्वयः
हे गुडाकेश अहम् एव सर्वभूताशयस्थितः आत्मा । अहम् भूतानाम् आदिः च मध्यं च अन्तः च ।

व्याकरणम्
▶ सन्धिः
आदिः + च - विसर्गसकारः
अन्तः + एव - विसर्गलोपः

▶ समासः
सर्वेभूतानाम् आशयः सर्वभूताशयः -षष्ठीतत्पुरुषः
सर्वभूताशये स्थितः - सप्तमीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ १०.२१॥

पदच्छेदः
आदित्यानाम् अहं विष्णुः ज्योतिषां रविः अंशुमान् मरीचिः मरुताम् अस्मि नक्षत्राणाम् अहं शशी

पदपरिचयः
आदित्यानाम् - अकार पु ष बहु
विष्णुः - उकार पु प्र एक
ज्योतिषां सकार नपु ष बहु
रविः - इकार पु प्र एक
अंशुमान् - तकार पु प्र बहु
मरीचिः इकार पु प्र एक
मरुताम् तकार पु ष बहु
नक्षत्राणाम् अकार नपु ष बहु
शशी - नकार पु प्र एक

पदार्थः
आदित्यानाम् - द्वादशादित्यानाम्
विष्णुः - विष्णुः
ज्योतिषां प्रकाशयितॄणाम्
रविः - रविः
अंशुमान् - रश्मिमान्

Downloaded from www.omkaravidya.com

मरीचिः  मरीचिः
मरुताम् - मरुद्देवताभेदानाम्
नक्षत्राणाम् -  नक्षत्राणाम्
शशी  - चन्द्रमाः

अन्वयः
आदित्यानाम् अहं विष्णुः । ज्योतिषां (अहं) अंशुमान् रविः। मरुताम् मरीचिः  अस्मि । नक्षत्राणाम् अहं शशी (अस्मि) ।

व्याकरणम्
▶ सन्धिः
विष्णुः + ज्योतिषां - विसर्गरेफः
रविः + अंशुमान् - विसर्गरेफः
मरीचिः + मरुताम् - विसर्गरेफः

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ १०.२२॥

पदच्छेदः
वेदानां सामवेदः अस्मि देवानाम् अस्मि वासवः इन्द्रियाणां मनः च अस्मि भूतानाम् अस्मि चेतना

Downloaded from www.omkaravidya.com

पदपरिचयः
वेदानां - अकार पु ष बहु
सामवेदः - अकार पु प्र बहु
अस्मि - लट् उपु एक
देवानाम् -अकार पु ष बहु
वासवः - अकार पु प्र बहु
इन्द्रियाणां - अकार नपु ष बहु
मनः -सकार नपु प्र बहु
भूतानाम् -अकार नपु ष बहु
चेतना आकार स्त्री प्र एक

पदार्थः

वेदानां - चतुर्वेदानाम्
सामवेदः - सामवेदः
अस्मि - अस्मि
देवानाम् - सुराणाम्
वासवः - वासवः
इन्द्रियाणां - एकादशानाम् चक्षुरादीनाम्
मनः - अन्तः करणम्
भूतानाम् - प्राणिनाम्
चेतना - बुद्धिवृत्तिः

अन्वयः
वेदानां सामवेदः अस्मि । देवानाम् वासवः अस्मि । इन्द्रियाणां च मनः अस्मि । भूतानाम् चेतना अस्मि ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

सामवेदः + अस्मि - विसर्गउकारः पूर्वरूपसन्धिः

मनः + च - विसर्गसकारः

च + अस्मि - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - अथ दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥ १०.२३॥

पदच्छेदः

रुद्राणां शङ्करः च अस्मि वित्तेशःयक्षरक्षसाम् वसूनां पावकः च अस्मि मेरुः शिखरिणाम् अहम्

पदपरिचयः

रुद्राणां - अकार पु ष बहु

शङ्करः - अकार पु प्र एक

वित्तेशः अकार पु प्र एक

यक्षरक्षसाम् - सकार नपु ष एक

वसूनां - उकार पु ष बहु

पावकः अकार पु प्र एक

मेरुः - उकार पु प्र एक

Downloaded from www.omkaravidya.com

शिखरिणाम् - नकार पु ष बहु

पदार्थः
रुद्राणां - एकादशानाम्
शङ्करः - शङ्कर
वित्तेशः - कुबेरः
यक्षरक्षसाम् - यक्षरक्षसाम्
वसूनां - अष्टवसूनाम्
पावकः - अग्निः
मेरुः - मेरुः
शिखरिणाम् - शिखरवताम्

अन्वयः
रुद्राणां शङ्करः च अस्मि । यक्षरक्षसाम् वित्तेशः(अस्मि) । वसूनां पावकः च अस्मि । अहम् शिखरिणाम् मेरुः (अस्मि) ।

व्याकरणम्
▶ सन्धिः
शङ्करः + च - विसर्गसकारः
च + अस्मि - सवर्णदीर्घसन्धिः
वित्तेशः+ यक्षरक्षसाम् - विसर्गउकारः
पावकः + च - विसर्गसकारः

▶ समासः
यक्षाश्च रक्षाम्सि च यक्षरक्षांसि - तेषां द्वन्द्वसमासः
वित्तानाम् ईशः - वित्तेशः - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥१०.२४॥

पदच्छेदः
पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् सेनानीनाम् अहं स्कन्दः सरसाम् अस्मि सागरः

पदपरिचयः
पुरोधसां - सकार पु ष बहु
मुख्यं - अकार पु द्वि एक
विद्धि - लोट् मपु एक
पार्थ - अकार पु सं प्र
बृहस्पतिम् - इकार पु द्वि एक
सेनानीनाम् ईकार पु ष बहु
स्कन्दः - अकार पु प्र एक
सरसाम् सकार नपु ष एक
सागरः अकार पु प्र एक

पदार्थः
पुरोधसां - राजपुरोहितानाम्
मुख्यं - प्रधानम्
विद्धि - जानीहि
पार्थ - अर्जुन
बृहस्पतिम् - बृहस्पतिम्

Downloaded from www.omkaravidya.com

सेनानीनाम् - सेनापतीनाम्
स्कन्दः - देवसेनापतिः
सरसाम् -सरसाम्
सागरः - समुद्रः

अन्वयः
हे पार्थ! पुरोधसां च मुख्यं बृहस्पतिम् मां विद्धि । अहं सेनानीनाम् स्कन्दः (अस्मि) । सरसाम् सागरः अस्मि ।

व्याकरणम्
▶ सन्धिः
पुरोधसां + च - अनुस्वारसन्धिः
मां + विद्धि - अनुस्वारसन्धिः

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोस्मि स्थावराणां हिमालयः ॥१०.२५॥

पदच्छेदः
महर्षीणां भृगुः अहं गिराम् अस्मि एकम् अक्षरम् यज्ञानां जपयज्ञः अस्मि स्थावराणां हिमालयः

पदपरिचयः
महर्षीणां - इकार पु ष बहु
भृगुः - उकार पु प्र एक

Downloaded from www.omkaravidya.com

गिराम् - रेफान्त स्त्री ष बहु
एकम् - अकार नपु प्र एक
अक्षरम् - अकार नपु प्र एक
यज्ञानां - अकार पु ष बहु
जपयज्ञः- अकार पु प्र एक
स्थावराणां - अकार नपु ष बहु
हिमालयः - अकार पु प्र एक

पदार्थः
महर्षीणां - ऋषीणाम्
भृगुः - भृगुः
गिराम् - वाचाम्
एकम् - एकम्
अक्षरम् - अक्षरम्
यज्ञानां -यज्ञानां
जपयज्ञः - जपयज्ञः
स्थावराणां - स्थावराणां
हिमालयः - हिमालयः

अन्वयः
महर्षीणां अहं भृगुः (अस्मि) । गिराम् एकमक्षरम् अस्मि । यज्ञानां जपयज्ञः अस्मि । स्थावराणां हिमालयः (अस्मि) ।

व्याकरणम्
▶ सन्धिः
भृगुः + अहम् - विसर्गरेफः
अस्मि + एकम् - यण्सन्धिः
जपयज्ञः + अस्मि - विसर्गउकारः पूर्वरूपसन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥१०.२६॥

पदच्छेदः
अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः गन्धर्वाणां चित्ररथः सिद्धानां कपिलः मुनिः

पदपरिचयः
अश्वत्थः - अकार पु प्र एक
सर्ववृक्षाणां - अकार पु ष बहु
देवर्षीणां - इकार पु ष बहु
नारदः - अकार पु प्र एक
गन्धर्वाणां - अकार पु ष बहु
चित्ररथः - अकार पु प्र एक
सिद्धानां - अकार पु ष बहु
कपिलः - अकार पु प्र एक
मुनिः- इकार पु प्र एक

पदार्थः
अश्वत्थः - अश्वत्थः
सर्ववृक्षाणां - सर्वतरूणाम्
देवर्षीणां - देवर्षिणां
नारदः - नारदः

Downloaded from www.omkaravidya.com

गन्धर्वाणां - गन्धर्वाणां
चित्ररथः - चित्ररथः
सिद्धानां - सिद्धानां
कपिलः - कपिलः
मुनिः - मुनिः

अन्वयः
सर्ववृक्षाणां अश्वत्थः (अस्मि) । देवर्षीणां च नारदः (अस्मि) । गन्धर्वाणां चित्ररथः (अस्मि) सिद्धानां कपिलः मुनिः (अस्मि) ।

व्याकरणम्
▶ सन्धिः
कपिलः + मुनिः - विसर्गउकारः

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः
उच्चैः श्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥ १०.२७॥

पदच्छेदः
उच्चैः श्रवसम् अश्वानां विद्धि माम् अमृतोद्भवम् ऐरावतं गजेन्द्राणां नराणां च नराधिपम्

पदपरिचयः
उच्चैः श्रवसम् - सकार पु द्वि एक
अश्वानां - अकार पु ष बहु

Downloaded from www.omkaravidya.com

विद्धि - लोट् मपु एक
अमृतोद्भवम् - अकार पु द्वि एक
ऐरावतं - अकार पु द्वि एक
गजेन्द्राणां - अकार पु ष बहु
नराणां - अकार पु ष बहु
नराधिपम् - अकार पु द्वि एक

पदार्थः
उच्चैः श्रवसम् - उच्चैः श्रवसम्
अश्वानां - अश्वानां
विद्धि - जानीहि
अमृतोद्भवम् - अमृतनिमित्तमथनोद्भवम्
ऐरावतं - ऐरावतं
गजेन्द्राणां - गजेन्द्राणां
नराणां – नराणां
नराधिपम् - लोकपतिम्

अन्वयः
अश्वानां अमृतोद्भवम् उच्चैः श्रवसम् मां विद्धि । गजेन्द्राणां ऐरावतं नराणां नराधिपम् च (विद्धि) ।

व्याकरणम्
▶ सन्धिः
अश्वानाम् + विद्धि - अनुस्वारसन्धिः

▶ समासः
अमृतात् उद्भवम् - पञ्चमीतत्पुरुषः
गजानाम् इन्द्रः - गजेन्द्रः षष्ठीतत्पुरुषः
नराणां अधिपतिः - नराधिपतिः - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥१०.२८॥

पदच्छेदः
आयुधानाम् अहं वज्रं धेनूनाम् अस्मि कामधुक् प्रजन: अस्मि कन्दर्प: सर्पाणाम् अस्मि वासुकि:

पदपरिचयः
आयुधानाम् - अकार नपु ष बहु
वज्रं - अकार नपु प्र एक
धेनूनाम् - उकार स्त्री ष बहु
कामधुक् - हकार पु प्र एक
प्रजन: - अकार पु प्र एक
कन्दर्प: - अकार पु प्र एक
सर्पाणाम् - अकार पु ष बहु
वासुकि: - इकार पु प्र एक

पदार्थः
आयुधानाम् - आयुधानाम्
वज्रं - वज्रायुधम्
धेनूनाम् - दोग्धीणां
कामधुक् - कामधुक्
प्रजन: - प्रजनयिता
कन्दर्प: - कामदेव:

Downloaded from www.omkaravidya.com

सर्पाणाम् - सर्पाणाम्
वासुकिः - सर्पराजः

अन्वयः
आयुधानाम् अहं वज्रं (अस्मि) । धेनूनाम् कामधुक् अस्मि । प्रजनः  कन्दर्पः अस्मि । सर्पाणाम्  वासुकिः अस्मि ।

व्याकरणम्
▶ सन्धिः
प्रजनः + च - विसर्गसकारः
च + अस्मि - सवर्णदीर्घसन्धिः

▶ समासः
कामान् दोग्धि कामधुक - उपपदसमासः

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥१०.२९॥

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥ १०.३०॥

Downloaded from www.omkaravidya.com

पदच्छेदः

अनन्तः च अस्मि नागानां वरुणः यादसाम् अहम् पितॄणाम् अर्यमा च अस्मि
यमः संयमताम् अहम् प्रह्लादश्ः च अस्मि दैत्यानां कालः कलयताम्
अहम् मृगाणां च मृगेन्द्रः अहं वैनतेयः च  पक्षिणाम्

पदपरिचयः

अनन्तः - अकार पु प्र एक
नागानां - अकार पु  ष बहु
वरुणः  अकार पु प्र एक
यादसाम् - सकार नपु  ष बहु
पितॄणाम् - ऋकार पु  ष बहु
अर्यमा - नकार पु प्र बहु
यमः -  अकार पु प्र एक
संयमताम् - तकार पु  ष बहु
प्रह्लादः -   अकार पु प्र एक
दैत्यानां -अकार पु  ष बहु
कालः  अकार पु प्र एक
कलयताम् - तकार पु ष बहु
मृगाणां - अकार पु  ष बहु
मृगेन्द्रः -  अकार पु प्र एक
वैनतेयः -  अकार पु प्र एक
पक्षिणाम् - अकार पु  ष बहु

पदार्थः

अनन्तः - नागराजः
नागानां  - नागानाम्
वरुणः - वरुणः
यादसाम् - अब्देवतानाम्

Downloaded from www.omkaravidya.com

पितॄणाम् - पितॄणाम्
अर्यमा - पितृराजः
यमः - यमः
संयमताम् - संयमवताम्
प्रह्लादः - प्रह्लादः
दैत्यानां - राक्षसानाम्
कालः - कालः
कलयताम् - कलयताम्
मृगाणां - मृगाणां
मृगेन्द्रः - मृगेन्द्रः
वैनतेयः - गरुडः
पक्षिणाम् - पतत्रिणाम्

अन्वयः
नागानां अनन्तः च अस्मि । यादसाम् अहं वरुणः (अस्मि) । पितॄणाम् अर्यमा च अस्मि । संयमताम् अहम् यमः (अस्मि) । दैत्यानां प्रह्लादः च अस्मि । कलयताम् अहम् कालः (अस्मि) । मृगाणां च अहं मृगेन्द्रः (अस्मि) पक्षिणाम् वैनतेयः च (अस्मि) ।

व्याकरणम्
▶ सन्धिः
अनन्तः + च - विसर्गसकारः
च + अस्मि - सवर्णदीर्घसन्धिः
वरुणः + यादसाम् - विसर्गउकारः
प्रह्लादः + च - विसर्गसकारः
मृगेन्द्रः + अहं - विसर्गउकारः पूर्वरूपसन्धिः
वैनतेयः + च - विसर्गसकारः

Downloaded from www.omkaravidya.com

▶ समासः
मृगाणाम् इन्द्रः मृगेन्द्रः - षष्ठीतत्पुरुषः

▶ तद्धितान्ताः
विनतायाः अपत्यम् पुमान् वैनतेयः

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ १०.३१॥

पदच्छेदः
पवनः पवताम् अस्मि रामः शस्त्रभृताम् अहम् झषाणां मकरः च अस्मि
स्रोतसाम् अस्मि जाह्नवी

पदपरिचयः
पवनः - अकार पु प्र एक
पवताम् - तकार पु ष बहु
रामः - अकार पु प्र एक
शस्त्रभृताम् - तकार पु ष बहु
झषाणां - अकार पु ष बहु
मकरः - अकार पु प्र एक
स्रोतसाम् - सकार नपु ष बहु
जाह्नवी - ईकार स्त्री प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
पवनः - वायुः
पवताम् - पावयितॄणाम्
रामः - दाशरथिः
शस्त्रभृताम् - आयुधधारिणाम्
झषाणां - मत्स्यादीनाम्
मकरः - मकरः
स्त्रोतसाम् - स्त्रवन्तीनाम्
जाह्नवी - गङ्गा

अन्वयः
पवताम् पवनः अस्मि ।शस्त्रभृताम् अहं रामः (अस्मि) । झषाणां मकरः च अस्मि । स्त्रोतसाम् जाह्नवी अस्मि ।

व्याकरणम्
▶ सन्धिः
मकरः + च - विसर्गसकारः
च + अस्मि - सवर्णदीर्घसन्धिः

▶ समासः
शस्त्रं बिभ्रति इति शस्त्रभृत् - उपपदसमासः

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ १०.३२॥

Downloaded from www.omkaravidya.com

पदच्छेदः
सर्गाणाम् आदिः अन्तः च  मध्यं च एव अहम् अर्जुन अध्यात्मविद्या विद्यानां
वादः प्रवदताम् अहम्

पदपरिचयः
सर्गाणाम्  - अकार पु ष बहु
आदिः - इकार पु प्र एक
अन्तः - अकार पु प्र एक
मध्यं  अकार नपु प्र एक
अध्यात्मविद्या - आकार स्त्री प्र एक
विद्यानां - आकार स्त्री ष बहु
वादः - अकार पु प्र एक
प्रवदताम् - तकार पु ष बहु

पदार्थः
सर्गाणाम् - सृष्टीनाम्
आदिः - उत्पत्तिः
अन्तः - लयः
मध्यं -   स्थितिः
अध्यात्मविद्या - पराविद्या
विद्यानां -विद्यानां
वादः - वादः
प्रवदताम् - प्रवदताम्

अन्वयः
हे अर्जुन! सर्गाणाम् अहम् एव आदिः अन्तः च  मध्यं च । विद्यानां
अध्यात्मविद्या   प्रवदताम् अहम् वादः ।

Downloaded from www.omkaravidya.com

व्याकरणम्
▶ सन्धिः
आदिः + अन्तः - विसर्गरेफः
अन्तः + च - विसर्गसकारः
च + एव - वृद्धिसन्धिः
एव + अहम् - सवर्णदीर्घसन्धिः

## श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥१०.३३॥

पदच्छेदः
अक्षराणाम् अकारः अस्मि द्वन्द्वः सामासिकस्य च अहम् एव अक्षयः कालः धाता अहं विश्वतोमुखः

पदपरिचयः
अक्षराणाम् - अकार नपु ष बहु
अकारः - अकार पु प्र एक
द्वन्द्वः - अकार पु प्र एक
सामासिकस्य - अकार पु ष एक
अक्षयः - अकार पु प्र एक
कालः - अकार पु प्र एक
धाता - ऋकार पु प्र एक
विश्वतोमुखः - अकार पु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
अक्षराणाम् - वर्णानाम्
अकारः  - अकार
द्वन्द्वः - द्वन्द्वः
सामासिकस्य - समास समूहस्य
अक्षयः - अक्षीणः
कालः - समयः / परमेश्वरः
धाता - कर्मफलस्य विधाता
विश्वतोमुखः - सर्वतोमुखः

अन्वयः
अक्षराणाम् अकारः अस्मि । सामासिकस्य  द्वन्द्वः च (अस्मि) । अहम् एव अक्षयः कालः ।  अहं विश्वतोमुखः धाता (अस्मि) ।

व्याकरणम्
▶ सन्धिः
अकारः + अस्मि - विसर्गउकारः पूर्वरूपसन्धिः
एव + अक्षयः - सवर्णदीर्घसन्धिः
कालः + धाता - विसर्गउकारः
धाता + अहम् - सवर्णदीर्घसन्धिः

▶ समासः
विश्वतः मुखः यस्य सः - व्यधिकरणबहुव्रीहिसमासः
न क्षयः - अक्षयः - नञ् तत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ १०.३४॥

पदच्छेदः
मृत्युः सर्वहरः च अहम् उद्भवः च भविष्यताम् कीर्तिः श्रीः वाक् च नारीणां स्मृतिः मेधा धृतिः क्षमा

पदपरिचयः
मृत्युः - उकार पु प्र एक
सर्वहरः - अकार पु प्र एक
उद्भवः - अकार पु प्र एक
भविष्यताम् - तकार पु ष बहु
कीर्तिः - इकार स्त्री प्र एक
श्रीः - ईकार स्त्री प्र एक
वाक् - चकार स्त्री प्र एक
नारीणां - ईकार स्त्री ष बहु
स्मृतिः - इकार स्त्री प्र एक
मेधा - आकार स्त्री प्र एक
धृतिः इकार स्त्री प्र एक
क्षमा - आकार स्त्री प्र एक

पदार्थः
मृत्युः - मृत्युः
सर्वहरः - सर्वहरः

Downloaded from www.omkaravidya.com

उद्भवः- उत्कर्षः
भविष्यताम् - भाविकल्याणानाम्
कीर्तिः - यशः
श्रीः - लक्ष्मी
वाक्  - सरस्वती
नारीणां - महिलानाम्
स्मृतिः - स्मृतिः
मेधा - मेधा
धृतिः - धैर्यम्
क्षमा - सहनम्

अन्वयः
(अहं) सर्वहरः मृत्युः च । भविष्यताम् उद्भवः नारीणां कीर्तिः श्रीः च
वाक्  स्मृतिः मेधा धृतिः क्षमा च अहम् (एव) ।

व्याकरणम्
▶ सन्धिः
सर्वहरः + च - विसर्गसकारः
च + अहम् - सवर्णदीर्घसन्धिः
उद्भवः + च -विसर्गसकारः
श्रीः + वाक् - विसर्गरेफः
स्मृतिः + मेधा - विसर्गरेफः

▶ समासः
सर्वं हरति इति सर्वहरः - उपपदसमासः

Downloaded from www.omkaravidya.com

मूलश्लोकः

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ १०.३५॥

पदच्छेदः
बृहत्साम तथा साम्नां गायत्री छन्दसाम् अहम् मासानां मार्गशीर्षः अहम् ऋतूनां कुसुमाकरः

पदपरिचयः
बृहत्साम - नकार नपु प्र एक
साम्नां - नकार नपु ष बहु
गायत्री - ईकार स्त्री प्र एक
छन्दसाम् - सकार नपु ष बहु
मासानां - अकार पु ष बहु
मार्गशीर्षः - अकार पु प्र एक
ऋतूनां - उकार पु ष बहु
कुसुमाकरः - अकार पु प्र एक

पदार्थः
बृहत्साम - बृहत्साम
साम्नां -साम्नां
गायत्री - गायत्री
छन्दसाम् - छन्दसाम्
मासानां - मासानाम्
मार्गशीर्षः - मार्गशीर्षः

Downloaded from www.omkaravidya.com

ऋतूनां - ऋतूनां
कुसुमाकरः - वसन्तऋतुः

अन्वयः
साम्नां बृहत्साम (अस्मि) । छन्दसाम् अहम् गायत्री ( अस्मि) । तथा मासानां मार्गशीर्षः (अस्मि) । ऋतूनां अहम् कुसुमाकरः (अस्मि) ।

व्याकरणम्
▶ सन्धिः
मार्गशीर्षः + अहम् - विसर्गउकारः पूर्वरूपसन्धिः

▶ समासः
कुसुमानाम् आकरः - कुसुमाकरः - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ १०.३६॥

पदच्छेदः
द्यूतं छलयताम् अस्मि तेजः तेजस्विनाम् अहम् जयः अस्मि व्यवसायः अस्मि सत्त्वं सत्त्ववताम् अहम्

Downloaded from www.omkaravidya.com

पदपरिचयः
द्यूतं अकार नपु प्र एक
छलयताम् - तकार पु ष बहु
तेजः - सकार नपु प्र एक
तेजस्विनाम् - नकार पु ष बहु
जयः - अकार पु प्र एक
व्यवसायः -अकार पु प्र एक
सत्त्वं - अकार नपु प्र एक
सत्त्ववताम् - तकार पु ष बहु

पदार्थः
द्यूतं - द्यूतम्
छलयताम् - छलस्य कर्तॄणाम्
तेजः - तेजः
तेजस्विनाम् - तेजस्विनाम्
जयः - जयः
व्यवसायः - प्रयत्नः
सत्त्वं - सत्त्वं
सत्त्ववताम् - सात्त्विकानाम्

अन्वयः
छलयताम् द्यूतं अस्मि ।तेजस्विनाम् अहम् तेजः । (जेतॄणां ) जयः अस्मि । (व्यवसायिनां) व्यवसायः अस्मि । सत्त्ववताम् अहम् सत्त्वं (अस्मि) ।

व्याकरणम्
▶ सन्धिः
तेजः + तेजस्विनाम् - विसर्गसकारः
जयः + अस्मि - विसर्गउकारः व्यवसायः + अस्मि - विसर्गसकारः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ १०.३७॥

पदच्छेदः
वृष्णीनां वासुदेवः अस्मि पाण्डवानां धनञ्जयः मुनीनाम् अपि अहं व्यासः कवीनाम् उशना कविः

पदपरिचयः
वृष्णीनां - इकार पु ष बहु
वासुदेवः - अकार पु प्र एक
पाण्डवानां - अकार पु ष बहु
धनञ्जयः - अकार पु प्र एक
मुनीनाम् - इकार पु ष बहु
व्यासः अकार पु प्र एक
कवीनाम् - इकार पु ष बहु
उशना - सकार पु प्र एक
कविः - अकार पु प्र एक

पदार्थः
वृष्णीनां - यादवानाम्
वासुदेवः - कृष्णः
पाण्डवानां - पाण्डवानां
धनञ्जयः - अर्जुनः

Downloaded from www.omkaravidya.com

मुनीनाम् - मननशीलानाम्
व्यासः - वेदव्यासः
कवीनाम् - क्रान्तदर्शिनाम्
उशना - शुक्राचार्यः
कविः - कविः

अन्वयः
वृष्णीनां वासुदेवः अस्मि । पाण्डवानां धनञ्जयः(अस्मि) । मुनीनाम् अपि अहं व्यासः (अस्मि) । कवीनाम् उशना कविः (अस्मि) ।

व्याकरणम्
▶ सन्धिः
वासुदेवः + अस्मि - विसर्गउकारः
अपि + अहम् - यण्सन्धिः

▶ तद्धितान्ताः
वसुदेवस्य अपत्यं पुमान् वासुदेवः
पाण्डोः अपत्यं पुमान् - पाण्डवः - ते

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥१०.३८॥

Downloaded from www.omkaravidya.com

पदच्छेदः
दण्डः दमयताम् अस्मि नीतिः अस्मि जिगीषताम् मौनं च एव अस्मि गुह्यानां ज्ञानं ज्ञानवताम् अहम्

पदपरिचयः
दण्डः - अकार पु प्र एक
दमयताम् - तहार पु ष बहु
नीतिः - इ स्त्री प्र एक
जिगीषताम् - तकार पु ष बहु
मौनं - अकार नपु प्र एक
गुह्यानां - अकार नपु ष बहु
ज्ञानं - अकार नपु प्र एक
ज्ञानवताम् - तकार पु ष बहु

पदार्थः
दण्डः - दण्डः
दमयताम् - दमयितृणाम्
नीतिः - नीतिः
जिगीषताम् - जेतुम् इच्छताम्
मौनं - मौनम्
गुह्यानां - गोप्यानाम्
ज्ञानं - ज्ञानं
ज्ञानवताम् - ज्ञानवताम्

अन्वयः
दमयताम् दण्डः अस्मि । जिगीषताम् नीतिः अस्मि । गुह्यानां मौनं च एव अस्मि । ज्ञानवताम् अहम् ज्ञानं (अस्मि) ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

दण्डः + दमयताम् - विसर्गउकारः

नीतिः + अस्मि - विसर्गरेफः

च + एव - वृद्धिसन्धिः

## श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ १०.३९॥

पदच्छेदः

यत् च अपि सर्वभूतानां बीजं तत् अहम् अर्जुन न तत् अस्ति विना यत् स्यात् मया भूतं चराचरम्

पदपरिचयः

सर्वभूतानां - अकार नपु ष बहु

बीजं - अकार नपु प्र एक

अर्जुन - अकार पु सं प्र

स्यात् - विधि प्रपु एक

भूतं - अकार नपु प्र एक

चराचरम् - अकार नपु प्र एक

पदार्थः

सर्वभूतानां - सर्वभूतानां

Downloaded from www.omkaravidya.com

बीजं - कारणम्
अर्जुन - अर्जुन
स्यात् - भवेत्
भूतं - भूतम्
चराचरम् - स्थावरजङ्गमम्

अन्वयः
हे अर्जुन! सर्वभूतानां यत् बीजं तत् अपि अहम् । मया विना चराचरम् भूतं यत् स्यात् न तत् (अस्ति) ।

व्याकरणम्
▶ सन्धिः
यत् + च - श्चुत्वसन्धिः
च + अपि - सवर्णदीर्घसन्धिः
तत् + अहम् - जश्त्वसन्धिः
तत् + अस्मि - जश्त्वसन्धिः

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥१०.४०॥

पदच्छेदः
न अन्तः अस्ति मम दिव्यानां विभूतीनां परन्तप एषः तु उद्देशतः प्रोक्तः विभूतेः विस्तरः मया

Downloaded from www.omkaravidya.com

पदपरिचयः

अन्तः - अकार पु प्र एक

दिव्यानां - आकार स्त्री ष बहु

विभूतीनां - इकार स्त्री ष बहु

परन्तप - अकार पु सं प्र

उद्देशतः - अव्ययम्

प्रोक्तः - अकार पु प्र एक

विभूतेः - इकार स्त्री ष एक

विस्तरः अकार पु प्र एक

पदार्थः

अन्तः - अवधिः

दिव्यानां - अद्भुतानाम्

विभूतीनां - विभूतीनां

परन्तप - अर्जुन

उद्देशतः - उद्देशतः

प्रोक्तः - उक्तः

विभूतेः - ऐश्वर्यस्य

विस्तरः -विस्तरः

अन्वयः

हे परन्तप! मम दिव्यानां विभूतीनां अन्तः न अस्ति । एषः विभूतेः विस्तरः तु मया उद्देशतः प्रोक्तः ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

न + अन्त: - सवर्णदीर्घसन्धि:

अन्त: + अस्ति - विसर्गउकार: पूर्वरूपसन्धि:

प्रोक्त: + विभूते: - विसर्गउकार:

विभूते: + विस्तर: - विसर्गरेफ:

विस्तर: + मया - विसर्गउकार:

श्रीमद्भगवद्गीता - दशमोऽध्याय: - विभूतियोग:

मूलश्लोकः

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ॥ १०.४१॥

पदच्छेदः

यत् यत् विभूतिमत् सत्त्वं श्रीमत् ऊर्जितम् एव वा तत् तत् एव अवगच्छ त्वं मम तेजोंऽशसम्भवम्

पदपरिचयः

विभूतिमत् - तकार नपु प्र एक

सत्त्वं - अकार नपु प्र एक

श्रीमत् - तकार नपु प्र एक

ऊर्जितम् - अकार नपु प्र एक

अवगच्छ - लोट् मपु एक

Downloaded from www.omkaravidya.com

तेजोंऽशसम्भवम्  - अकार पु द्वि एक

पदार्थः
विभूतिमत्  - विभूतियुक्तम्
सत्त्वं - वस्तु
श्रीमत् - लक्ष्म्या सहितम्
ऊर्जितम् -    ऊर्जितम्
अवगच्छ  - जानीहि
तेजोंऽशसम्भवम् - एश्वर्यात् उत्पन्नम्

अन्वयः
यत् यत्  सत्त्वं विभूतिमत् श्रीमत् ऊर्जितम् एव वा तत् तत् एव मम तेजोंऽशसम्भवम् (इति) त्वम् अवगच्छ ।

व्याकरणम्
▶ सन्धिः
यत् + यत् - जश्त्वसन्धिः
एव + अवगच्छ - सवर्णदीर्घसन्धिः
तत् + एव - जश्त्वसन्धिः
▶ समासः
तेजसः अंशेन सम्भवः यस्य तत् - व्यधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - दशमोऽध्यायः - विभूतियोगः

मूलश्लोकः

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ १०.४२॥

पदच्छेदः
अथवा बहुना एतेन किं ज्ञातेन तव अर्जुन विष्टभ्य अहम् इदं कृत्स्नम् एकांशेन स्थित: जगत्

पदपरिचयः
बहुना - उकार नपु तृ एक
ज्ञातेन - अकार नपु तृ एक
अर्जुन - अकार पु सं प्र
विष्टभ्य - ल्यबन्तम्
कृत्स्नम् - अकार नपु द्वि एक
एकांशेन - अकार पु तृ एक
स्थित: - अकार पु प्र एक
जगत् - दकार नपु द्वि एक

पदार्थः
बहुना - बहुना
ज्ञातेन - ज्ञातेन
अर्जुन - अर्जुन
विष्टभ्य - विशेषत: स्तम्भनं दृढं कृत्वा
कृत्स्नम् -सकलम्
एकांशेन - एकांशेन

Downloaded from www.omkaravidya.com

स्थित: -स्थित:
जगत् - भुवनम्

अन्वयः
हे अर्जुन! अथवा एतेन बहुना ज्ञातेन तव किम् ? अहम् इदं कृत्स्नम् जगत् एकांशेन विष्टभ्य स्थित: ।

व्याकरणम्
▶ सन्धिः
बहुना + एतेन - वृद्धिसन्धि:
तव + अर्जुन - सवर्णदीर्घसन्धि:
विष्टभ्य + अहम् - सवर्णदीर्घसन्धि:
स्थित: + जगत् - विसर्गउकार:

▶ कृदन्ता:
विष्टभ्य - वि + ष्टभि + ल्यप् प्रत्यय:

श्रीमद्भगवद्गीता - दशमोऽध्याय: - विभूतियोग:

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्याय: ॥ १० ॥

पदच्छेदः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विभूतियोग: नाम दशम: अध्याय:

Downloaded from www.omkaravidya.com

पदपरिचयः
ॐ - अव् धातुः + मन् प्रत्ययः
तत् - दकार. नपु. पु एक
सत् - दकार. नपु. प्र एक
इति - अव्ययम्
श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु
उपनिषत्सु - दकार. स्त्री स बहु
ब्रह्मविद्यायां - आकार. स्त्री स एक
योगशास्त्रे - अकार. नपु. स. एक
श्रीकृष्णार्जुनसंवादे - अकार. पु. स. एक
विभूतियोगः- अकार. पु. प्र. एक
नाम - नकार.नपु. प्र एक
दशमः - अकार. पु. प्र एक
अध्यायः - अकार. पु. प्र एक

पदार्थः
ॐ - ओम्
तत् - तत्
सत् - सत्
इति - एवम्
श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु
उपनिषत्सु - उपनिषत्सु
ब्रह्मविद्यायां - ब्रह्म पाठे
योगशास्त्रे - योगशास्त्रे
श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयोः मध्ये संवादे
विभूतियोगः - विभूतियोगः
नाम - नाम

Downloaded from www.omkaravidya.com

दशमः - दशमः
अध्यायः - अध्यायः

अन्वयः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगः नाम दशमः अध्यायः (संपूर्णम् भवति) ।

व्याकरणम्
▶सन्धिः
श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः
योगः + नाम - विसर्ग उकारः
दशमः + अध्यायः - विसर्ग उकारः पूर्वरूपसन्धिः

▶ समासः
ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारयः

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता
# एकादशोऽध्यायः
# विश्वरूपदर्शनयोगः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

अर्जुन उवाच
मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥११.०१॥

पदच्छेदः
मदनुग्रहाय परमं गुह्यम् अध्यात्मसंज्ञितम् यत् त्वया उक्तं वचः तेन मोहः अयं विगतः मम

पदपरिचयः
मदनुग्रहाय - अकार पु च एक
परमं - अकार नपु प्र एक
गुह्यम् - अकार नपु प्र एक
अध्यात्मसंज्ञितम् - अकार नपु प्र एक
उक्तं - अकार नपु प्र एक
वचः - सकार पु प्र एक
मोहः - अकार पु प्र एक
विगतः - अकार पु प्र एक

पदार्थः
मदनुग्रहाय - मम अनुग्रहार्थम्
परमं - निरतिशयम्
गुह्यम् - गोप्यम्
अध्यात्मसंज्ञितम् - आतमानात्मविवेकविषयम्

Downloaded from www.omkaravidya.com

उक्तं - गदितम्
वचः - वाक्यम्
मोहः - अविवेकबुद्धिः
विगतः - अपगतः

अन्वयः
अर्जुन उवाच
मदनुग्रहाय परमं गुह्यम् अध्यात्मसंज्ञितम् यत् वचः त्वया उक्तं तेन मम अयं मोहः विगतः ।

व्याकरणम्
▶ सन्धिः
त्वया + उक्तं - गुणसन्धिः
वचः + तेन - विसर्गसकारः
मोहः + अयं - विसर्गउकारः पूर्वरूपसन्धिः
विगतः + मम- विसर्गउकारः

▶ समासः
मम अनुग्रहः - मदनुग्रहः - षष्ठीतत्पुरुषः

▶ कृदन्ताः
उक्तम् - वच् + क्त प्रत्ययः
विगतम् - वि + गम् + क्त प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥ ११.०२॥

पदच्छेदः
भवाप्ययौ हि भूतानां श्रुतौ विस्तरशः मया त्वत्तः कमलपत्राक्ष माहात्म्यम् अपि च अव्ययम्

पदपरिचयः
भवाप्ययौ - अकार पु प्र द्वि
भूतानां - अकार नपु ष बहु
श्रुतौ - अकार पु प्र द्वि
विस्तरशः - अकार पु प्र द्वि
त्वत्तः युष्मद् + तसिल् प्रत्ययः
कमलपत्राक्ष - अकार पु सं प्र
माहात्म्यम् - अकार नपु प्र एक
अव्ययम् - अकार नपु प्र एक

पदार्थः
भवाप्ययौ - उत्पत्तिप्रलयौ
भूतानां - प्राणिनाम्
श्रुतौ - श्रुतौ
विस्तरशः - विस्तरशः
त्वत्तः - त्वतंसकाशात्
कमलपत्राक्ष - पद्मपत्रनेत्र

Downloaded from www.omkaravidya.com

माहात्म्यम् - माहात्म्यम्
अव्ययम् - अक्षयम्

अन्वयः
हे कमलपत्राक्ष! त्वत्तः भूतानां भवाप्ययौ हि मया विस्तरशः श्रुतौ । अव्ययम् माहात्म्यम् अपि च (श्रुतम्)

व्याकरणम्
▶ सन्धिः
विस्तरशः + मया - विसर्गउकारः
च + अव्ययम् - सवर्णदीर्घसन्धिः

▶ समासः
भवः च अप्ययः च - इतरेतरद्वन्द्वसमासः
कमलस्य पत्रम् - षष्ठीतत्पुरुषः
कमलपत्रे इव अक्षिणी यस्य सः - कमलपत्राक्षः - व्यधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ११.३॥

Downloaded from www.omkaravidya.com

पदच्छेदः
एवम् एतत् यथा आत्थ त्वम आत्मानं परमेश्वर द्रष्टुम् इच्छामि ते रूपम् ऐश्वरं पुरुषोत्तम

पदपरिचयः
आत्थ - लट् मपु एक
आत्मानं - नकार पु द्वि एक
परमेश्वर - अकार पु सं प्र
द्रष्टुम् - तुमुनन्तम्
इच्छामि - लट् उपु एक
रूपम् - अकार नपु द्वि एक
ऐश्वरं - अकार नपु द्वि एक
पुरुषोत्तम - अकार पु सं प्र

पदार्थः
आत्थ - कथयसि
आत्मानं - आत्मानं
परमेश्वर - परमेश्वर
द्रष्टुम् - अवलोकयितुम्
इच्छामि - अभिलषामि
रूपम् - आकारम्
ऐश्वरं - ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सम्पन्नम् एश्वरम्
पुरुषोत्तम - कृष्ण

अन्वयः
हे परमेश्वर! हे पुरुषोत्तम! त्वं यथा आत्मानं आत्थ एवम् एतत् ते ऐश्वरं रूपम् द्रष्टुम् इच्छामि ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

एतत् + यथा - जश्त्वसन्धिः

यथा + आत्थ - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ११.०४॥

पदच्छेदः

मन्यसे यदि तत् शक्यं मया द्रष्टुम् इति प्रभो योगेश्वर ततः मे त्वं दर्शय आत्मानम् अव्ययम्

पदपरिचयः

मन्यसे - लट् मपु एक

शक्यं - अकार नपु द्वि एक

द्रष्टुम् - तुमुनन्तम्

प्रभो - उकार पु सं प्र

योगेश्वर - अकार पु सं प्र

दर्शय - लोट् मपु एक

आत्मानम् - नकार पु द्वि एक

अव्ययम् - अकार पु द्वि एक

Downloaded from www.omkaravidya.com

पदार्थः
मन्यसे - चिन्तयसि
शक्यं - साध्यम्
द्रष्टुम् - अवलोकयितुम्
प्रभो - स्वामिन्
योगेश्वर - कृष्ण
दर्शय - दर्शय
आत्मानम् - आत्मानम्
अव्ययम् - अक्षयम्

अन्वयः
हे प्रभो! तत् मया द्रष्टुम् शक्यं इति यदि मन्यसे हे योगेश्वर ! ततः त्वं अव्ययम् आत्मानम् मे दर्शय ।

व्याकरणम्
▶ सन्धिः
तत् + शक्यम् - श्चुत्वसन्धिः छत्वसन्धिः
ततः + मे - विसर्गउकारः
दर्शय + आत्मानम् - सवर्णदीर्घसन्धिः

▶ समासः
योगिनाम् ईश्वरः - योगेश्वरः - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

श्री भगवानुवाच
पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रश: ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ११.५॥

पश्यादित्यान्वसून् रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ११.६॥

पदच्छेदः
पश्य मे पार्थ रूपाणि शतश: अथ सहस्रश: नानाविधानि दिव्यानि नानावर्णाकृतीनि च पश्य आदित्यान् वसून् रुद्रान् अश्विनौ मरुत: तथा बहूनि अदृष्टपूर्वाणि पश्य आश्चर्याणि भारत

पदपरिचयः
पश्य - लोट् मपु एक
पार्थ - अकार पु सं प्र
रूपाणि - अकार नपु द्वि बहु
शतश: - अव्ययम्
सहस्रश: - अव्ययम्
नानाविधानि - अकार नपु द्वि बहु
दिव्यानि - अकार नपु द्वि बहु
नानावर्णाकृतीनि - अकार नपु द्वि बहु
आदित्यान् - अकार पु द्वि बहु
वसून् - उकार पु द्वि बहु

Downloaded from www.omkaravidya.com

रुद्रान् - अकार पु द्वि बहु
अश्विनौ - नकार पु द्वि द्वि
मरुतः - तकार पु प्र बहु
बहूनि - अकार नपु द्वि बहु
अदृष्टपूर्वाणि - अकार नपु द्वि बहु
आश्चर्याणि - अकार नपु द्वि बहु
भारत - अकार पु सं प्र

पदार्थः
पश्य - पश्य
पार्थ - अर्जुन
रूपाणि - स्वरूपाणि
शतशः - शतशः
सहस्रशः - अनेकशः
नानाविधानि - अनेकप्रकाराणि
दिव्यानि - अप्राकृतानि
नानावर्णाकृतीनि - नाना वर्णाकाराणि
आदित्यान् - द्वादशादित्यान्
वसून् - अष्टौ वसून्
रुद्रान् - एकादश रुद्रान्
अश्विनौ - द्वौ अश्विनौ
मरुतः - सप्तमरुतः
बहूनि - अनेकानि
अदृष्टपूर्वाणि - पूर्वं अनवलोकितानि
आश्चर्याणि - अद्भुतानि
भारत - अर्जुन

Downloaded from www.omkaravidya.com

अन्वयः
श्री भगवानुवाच
हे पार्थ! शतशः अथ सहस्रशः नानाविधानि दिव्यानि नानावर्णाकृतीनि च मे रूपाणि पश्य । हे भारत! आदित्यान् वसून् रुद्रान् अश्विनौ मरुतः पश्य । तथा बहूनि अदृष्टपूर्वाणि आश्चर्याणि पश्य ।

व्याकरणम्
▶ सन्धिः
शतशः + अथ - विसर्गउकारः पूर्वरूपसन्धिः
पश्य + आदित्यान् - सवर्णदीर्घसन्धिः
मरुतः + तथा - विसर्गसकारः
बहूनी+ अदृष्टपूर्वाणि - यण्सन्धिः
पश्य + आदित्यान् - सवर्णदीर्घसन्धिः



मूलश्लोकः

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ११.०७॥

पदच्छेदः
इह एकस्थं जगत् कृत्स्नं पश्य अद्य सचराचरम् मम देहे गुडाकेश यत् अन्यद् द्रष्टुम् इच्छसि

Downloaded from www.omkaravidya.com

पदपरिचयः

एकस्थं - अकार नपु द्वि एक

जगत् - तकार नपु द्वि एक

कृत्स्नं - अकार नपु द्वि एक

पश्य - लोट् मपु एक

सचराचरम् - अकार नपु द्वि एक

मम - दकार त्रि ष एक

देहे - अकार पु स एक

गुडाकेश - अकार पु सं प्र

अन्यद् - अकार नपु द्वि एक

द्रष्टुम् - तुमुनन्तम्

इच्छसि - लट् मपु एक

पदार्थः

एकस्थं - एकस्मिन् स्थितम्

जगत् - भुवनम्

कृत्स्नं - समस्तम्

पश्य - अवलोक्य

सचराचरम् - स्थावरजङ्गेन सह

मम – मम    देहे - शरीरे

गुडाकेश - अर्जुन

अन्यद् - अन्यद्

द्रष्टुम् - अवलोकयितुम्

इच्छसि - अभिलषसि

अन्वयः

हे गुडाकेश ! अद्य एकस्थं सचराचरम् कृत्स्नं जगत्  अन्यत् यत् द्रष्टुम् इच्छसि इह मम देहे पश्य ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

इह + एकस्थं - वृद्धिसन्धिः

पश्य + अद्य - सवर्णदीर्घसन्धिः

यत् + च - श्चुत्वसन्धिः

च + अन्यत् - सवर्णदीर्घसन्धिः

अन्यद् + द्रष्टुम् - जश्त्वसन्धिः

▶ समासः

चरम् च अचरम् - समाहारद्वन्द्वसमासः

चराचरैः सह वर्तते इति सचराचरम् - सहपूर्वपदकर्मधारयसमासः

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ११.८॥

पदच्छेदः

न तु मां शक्यसे द्रष्टुम् अनेन एव स्वचक्षुषा दिव्यं ददामि ते चक्षुः पश्य मे योगम् ऐश्वरम्

Downloaded from www.omkaravidya.com

पदपरिचयः
शक्यसे - लट् मपु एक
द्रष्टुम् - तुमुनन्तम्
अनेन - मकार नपु तृ एक
स्वचक्षुषा - षकार नपु तृ एक
दिव्यं - अकार नपु द्वि एक
ददामि - लट् उपु एक
चक्षुः - षकार नपु द्वि एक
पश्य - लोट् मपु एक
योगम् - अकार पु द्वि एक
ऐश्वरम् - अकार पु द्वि एक

पदार्थः
शक्यसे - समर्थः भवसि
द्रष्टुम् - अवलोकयितुम्
अनेन - एतेन
स्वचक्षुषा - स्वनेत्रेन
दिव्यं -अद्भुतम्
ददामि - यच्छामि
चक्षुः - नेत्रम्
पश्य - ईक्षस्व
योगम् - योगशक्त्यतिशयम्
ऐश्वरम् - ईश्वरसम्बन्धि

अन्वयः
अनेन स्वचक्षुषा मां द्रष्टुम् न शक्यसे । ते दिव्यं चक्षुः ददामि । मे ऐश्वरम् योगं पश्य ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

अनेन + एव - वृद्धिसन्धिः

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

संजय उवाच

एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ।

दर्शयामास पार्थाय परमं रुपमैश्वरम् ॥ ११.०९॥

पदच्छेदः

एवम् उक्त्वा ततः राजन् महायोगेश्वरः हरिः दर्शयामास पार्थाय परमं रुपम् ऐश्वरम्

पदपरिचयः

उक्त्वा - क्त्वान्तम्

राजन् - नकार पु सं प्र

महायोगेश्वरः - अकार पु प्र एक

हरिः - इकार पु प्र एक

दर्शयामास - लिटं प्रपु एक

पार्थाय - अकार पु च एक

परमं - अकार नपु द्वि एक

रुपम् - अकार नपु द्वि एक

ऐश्वरम् - अकार नपु द्वि एक

Downloaded from www.omkaravidya.com

पदार्थः
उक्त्वा - कथयित्वा
राजन् - धृतराष्ट्र
महायोगेश्वरः - ईश्वरः
हरिः - नारायणः
दर्शयामास - दर्शितवान्
पार्थाय - अर्जुनाय
परमं - श्रेष्ठम्
रुपम् - विश्वरूपम्
ऐश्वरम् - ईश्वरसम्बन्धिनम्

अन्वयः
संजय उवाच
हे राजन् ! महायोगेश्वरः हरिः एवम् उक्त्वा ततः पार्थाय परमं ऐश्वरम् रुपम् दर्शयामास ।

व्याकरणम्
▶ सन्धिः
ततः + राजन् - विसर्गउकारः
महायोगेश्वरः + हरिः - विसर्गउकारः

▶ समासः
योगस्य ईश्वरः - योगेश्वरः - षष्ठीतत्पुरुषः
महान् च असौ योगेश्वरः - विशेषणपूर्वपदकर्मधारयसमासः

▶ कृदन्ताः
उक्त्वा - वच् + क्त्वा प्रत्ययः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिवयाभरणं दिव्यानेकोद्यतायुधम् ॥ ११.१०॥

पदच्छेदः
अनेकवक्त्रनयनम् अनेकाद्भुतदर्शनम् अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्

पदपरिचयः
अनेकवक्त्रनयनम् - अकार नपु द्वि एक
अनेकाद्भुतदर्शनम् - अकार नपु द्वि एक
अनेकदिव्याभरणं - अकार नपु द्वि एक
दिव्यानेकोद्यतायुधम् - अकार नपु द्वि एक

पदार्थः
अनेकवक्त्रनयनम् - अनेकमुखनेत्रम्
अनेकाद्भुतदर्शनम् - विविधाश्चर्यदर्शनम्
अनेकदिव्याभरणं - विविधदिव्यालङ्कारवस्तूनि
दिव्यानेकोद्यतायुधम् - बहुदिव्यशस्त्रास्त्रम्

अन्वयः
(भगवान् कृष्णः पार्थाय) अनेकवक्त्रनयनम् अनेकाद्भुतदर्शनम् अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् (रूपं दर्शयामास । )

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ समासः

अनेकानि वक्त्राणि च नयनानि च यस्मिन् रूपे तत् -
अनेकवक्त्रनयनम् -समानादसिकरणबहुव्रीहिसमासः

अनेकानि अद्भुदानि दर्शनानि यस्मिन् रूपे तत् -
अनेकाद्भुतदर्शनम् - समानादसिकरणबहुव्रीहिसमासः

अनेकानि दिव्यानि आभरणानि यस्मिन तत् -
अनेकदिव्याभरणं - समानादसिकरणबहुव्रीहिसमासः

दिव्यानि अनेकानि उद्यतानि आयुधानि - यस्मिन् तत् -
दिव्यानेकोद्यतायुधम् - समानादसिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥ ११.११॥

पदच्छेदः

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् सर्वाश्चर्यमयं देवम् अनन्तं विश्वतोमुखम्

पदपरिचयः

दिव्यमाल्याम्बरधरं - अकार पु द्वि एक
दिव्यगन्धानुलेपनम् - अकार पु द्वि एक

Downloaded from www.omkaravidya.com

सर्वाश्चर्यमयं - अकार नपु द्वि एक
देवम् - अकार पु द्वि एक
अनन्तं - अकार पु द्वि एक
विश्वतोमुखम् - अकार पु द्वि एक

पदार्थः
दिव्यमाल्याम्बरधरं - दिव्यमालावस्त्रकारकम्
दिव्यगन्धानुलेपनम् - दिव्यचन्दानानुलेपनम्
सर्वाश्चर्यमयं - सकलाद्भुतमयम्
देवम् - प्रकाशम्
अनन्तं - अन्तरहितम्
विश्वतोमुखम् - सर्वतोमुखम्

अन्वयः
(भगवान् कृष्णः अर्जुनाय ) दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्
सर्वाश्चर्यमयं देवम् अनन्तं विश्वतोमुखम् (दर्शयामास ।)

व्याकरणम्
▶ समासः
दिव्यगन्धम् अनुलेपनम् यस्य सः
दिव्यगन्धानुलेपनम् - तम् समानाधिकरणबहुव्रीहिसमासः
विश्वतः मुखम् यस्य सः - विश्वतोमुखः - व्यधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

मूलश्लोकः

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ ११.१२॥

पदच्छेदः
दिवि सूर्यसहस्रस्य भवेत् युगपद् उत्थिता यदि भाः सदृशी सा स्यात् भासः तस्य महात्मनः

पदपरिचयः
दिवि - वकार स्त्री स एक
सूर्यसहस्रस्य - अकार नपु ष एक
भवेत् - विधि प्रपु एक
युगपद् - अव्ययम्
उत्थिता - आकार स्त्री प्र एक
भाः - सकार स्त्री प्र एक
सदृशी - ईकार स्त्री प्र एक
स्यात् विधि प्रपु एक
भासः - सकार स्त्री ष एक
महात्मनः - नकार पु ष एक

पदार्थः
दिवि - आकाशे
सूर्यसहस्रस्य - सूर्यसहस्रस्य
भवेत् - भवेत्

Downloaded from www.omkaravidya.com

युगपत् - समकालम्
उत्थिता - उत्गता
भा: - प्रकाशस्य
सदृशी - तुल्या
स्यात् - स्यात्
भासः - प्रकाशम्
महात्मनः - महानुभावस्य

अन्वयः
दिवि सूर्यसहस्रस्य भाः यदि युगपत् उत्थिता भवेत् सा (भाः) तस्य महात्मनः भासः सदृशी स्यात् ।

व्याकरणम्

▶ सन्धिः

भवेत् + युगपत् - जश्त्वसन्धिः
स्यात् + भासः - जश्त्वसन्धिः
भासः + तस्य - विसर्गसकारः

▶ समासः

सूर्याणाम् सहस्रः - सूर्यसहस्रः - षष्ठीतत्पुरुषः
महान् आत्मा यस्य सः - महात्मा - समानाधिकरणबहुव्रीहिसमासः

▶ कृदन्ताः

उत्थिता - उत् + स्था + क्त प्रत्ययः (स्त्री)

Downloaded from www.omkaravidya.com

मूलश्लोकः

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ ११.१३॥

पदच्छेदः
तत्र एकस्थं जगत् कृत्स्नं प्रविभक्तम् अनेकधा अपश्यत् देवदेवस्य शरीरे पाण्डवः तदा

पदपरिचयः
एकस्थं - अकार नपु द्वि एक
जगत् - तकार नपु द्वि एक
कृत्स्नं - अकार नपु द्वि एक
प्रविभक्तम् - अकार नपु द्वि एक
अनेकधा - अव्ययम्
अपश्यत् - लङ् प्रपु एक
देवदेवस्य - अकार पु ष एक
शरीरे - अकार नपु स एक
पाण्डवः - अकार पु प्र एक

पदार्थः
एकस्थं - एकस्मिन् स्थितम्
जगत् - भुवनम्
कृत्स्नं - सकलम्
प्रविभक्तम् - पृथक् भूतम्
अनेकधा -बहुधा

Downloaded from www.omkaravidya.com

अपश्यत् - दृष्टवान्
देवदेवस्य - हरेः
शरीरे - देहे
पाण्डवः - अर्जुनः

अन्वयः
तदा पाण्डवः अनेकधा प्रविभक्तम् कृत्स्नं जगत् तत्र देवदेवस्य शरीरे एकस्थं अपश्यत् ।

व्याकरणम्
▶ सन्धिः
तत्र + एकस्थं - वृद्धिसन्धिः
अपश्यत् + देवदेवस्य - जश्त्सन्धिः
पाण्डवः + तदा - विसर्गसकारः

▶ समासः
देवानाम् देवः - देवदेवः - षष्ठीततपुरुषः

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥११.१४॥

Downloaded from www.omkaravidya.com

पदच्छेदः
ततः सः विस्मयाविष्टः हृष्टरोमा धनञ्जयः प्रणम्य शिरसा देवं कृताञ्जलिः अभाषत

पदपरिचयः
विस्मयाविष्टः - अकार पु प्र एक
हृष्टरोमा - नकार पु प्र एक
धनञ्जयः - अकार पु प्र एक
प्रणम्य - ल्यबन्तम्
शिरसा - सकार नपु तृ एक
देवं - अकार पु द्वि एक
कृताञ्जलिः - इकार पु प्र एक
अभाषत - लङ् प्रपु एक

पदार्थः
विस्मयाविष्टः - आश्चर्योपेतः
हृष्टरोमा - सरोमञ्चः
धनञ्जयः - अर्जुनः
प्रणम्य - नत्वा
शिरसा - शीर्षेण
देवं - विश्वरूपधरम्
कृताञ्जलिः - सम्पुटीकृतहस्तः
अभाषत - अवदत्

अन्वयः
ततः विस्मयाविष्टः हृष्टरोमा सः धनञ्जयः देवं शिरसा प्रणम्य कृताञ्जलिः अभाषत ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

सः + विस्मयाविष्टः - विसर्गलोपः

विस्मयाविष्टः + हृष्टरोमा - विसर्गउकारः

कृताञ्जलिः + अभाषत - विसर्गरेफः

▶ समासः

विस्मयेन आविष्टः - विस्मयाविष्टः - तृतीयातत्पुरुषः

हृष्टानि रोमाणि यस्य सः - हृष्टरोमा - समानाधिकरणबहुव्रीहिसमासः

कृतः अञ्जलिः येन सः समानाधिकरणबहुव्रीहिसमासः

▶ कृदन्ताः

प्रणम्य - प्र + नम् + ल्यप् प्रत्ययः

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

अर्जुन उवाच

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान् ।

ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ॥११.१५॥

पदच्छेदः

अर्जुन उवाच

पश्यामि देवान् तव देव देहे सर्वान् तथा भूतविशेषसङ्घान्

Downloaded from www.omkaravidya.com

ब्रह्माणमीशं कमलासनस्थम् ऋषीन् च सर्वान् उरगान् च दिव्यान्

पदपरिचयः
पश्यामि - लट् उपु एक
देवान् - अकार पु द्वि बहु
देव - अकार पु सं प्र
देहे - अकार पु स एक
सर्वान्  - अकार पु द्वि बहु
भूतविशेषसङ्घान् - अकार पु द्वि बहु
ब्रह्माणम् - नकार पु द्वि एक
ईशं -  अकार पु द्वि एक
कमलासनस्थम्  अकार पु द्वि एक
ऋषीन् - अकार पु द्वि बहु
सर्वान् - अकार पु द्वि बहु
उरगान् - अकार पु द्वि बहु
दिव्यान् - अकार पु द्वि बहु

पदार्थः
पश्यामि - अवलोकयामि
देवान् - सुरान्
देव -देव
देहे - शरीरे
सर्वान्  - सकलान्
भूतविशेषसङ्घान् - भूतविशेषसङ्घान्
ब्रह्माणम् - चतुर्मुखब्रह्माणम्
ईशं -  ईशं
कमलासनस्थम् -  कमलासनस्थम्
ऋषीन्  - वसिष्ठादीन्

Downloaded from www.omkaravidya.com

सर्वान् - सकलान्
उरगान् - सर्पान्
दिव्यान् - दिव्यान्

अन्वयः
अर्जुन उवाच
हे देव ! तव देहे सर्वान् देवान् तथा भूतविशेषसङ्घान् कमलासनस्थम् ब्रह्माणम् ईशं सर्वान् ऋषीन् च दिव्यान् उरगान् च पश्यामि ।

व्याकरणम्
▶ सन्धिः
देवान् + तव - सत्वसन्धि:
सर्वान् + तथा - सत्वसन्धि:
ऋषीन् + च - सत्वसन्धि:
उरगान् + च - सत्वसन्धि:

▶ समासः
कमलम् एव आसनम् - कमलासनम् - अवधारणापूर्वपदकर्मधारयसमास:
कमलासने स्थितं येन स: - कमलासनस्थ: - व्यधिकरणबहुव्रीहिसमास:
उरसा गच्छति इति उरग: - उपपदसमास:

श्रीमद्भगवद्गीता - एकादशोऽध्याय: - विश्वरूपदर्शनयोग:

मूलश्लोकः

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप ॥ ११.१६॥

Downloaded from www.omkaravidya.com

पदच्छेदः
अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतः अनन्तरूपम् न अन्तं न मध्यं न पुनः तव आदिं  पश्यामि विश्वेश्वर विश्वरूप

पदपरिचयः
अनेकबाहूदरवक्त्रनेत्रं - अकार पु द्वि एक
पश्यामि  - लट् उपु एक
सर्वतः - अव्ययम्
अनन्तरूपम् - अकार पु द्वि एक
अन्तं - अकार पु द्वि एक
मध्यं - अकार नपु द्वि एक
आदिं  - इकार पु द्वि एक
पश्यामि  लट् उपु एक
विश्वेश्वर - अकार पु सं प्र
विश्वरूप - अकार पु सं प्र

पदार्थः
अनेकबाहूदरवक्त्रनेत्रं - अनेकहस्तोदरमुखनेत्रम्
पश्यामि -  वीक्षे
सर्वतः - सर्वत्र
अनन्तरूपम् - अनवधिकस्वरूपम्
अन्तं - अवसानम्
मध्यं - मध्यं
आदिं  - मूलम्
पश्यामि - पश्यामि
विश्वेश्वर - विश्वेश्वर
विश्वरूप -  विश्वरूप

Downloaded from www.omkaravidya.com

अन्वयः

हे विश्वेश्वर! हे विश्वरूप ! अनेकबाहूदरवक्त्रनेत्रं अनन्तरूपम् त्वां सर्वतः पश्यामि । तव अन्तं न पश्यामि । मध्यं न (पश्यामि) । पुनः आदिं न (पश्यिम) ।

व्याकरणम्

▶ सन्धिः

सर्वतः + अनन्तरूपम् - विसर्गउकारः

न + अन्तं - सवर्णदीर्घसन्धिः

पुनः + तव - विसर्गसकारः

तव + आदिं - सवर्णदीर्घसन्धिः

▶ समासः

बाहुः च उदरं च वक्त्रं च नेत्रं च एतेषां समाहारः -बाहूदरक्त्रनेत्रम्

समाहारद्वन्द्वसमासः

अनेकं बाहूदरवक्त्रनेत्रम् यस्मिन् सः

अनेकबाहूदरवक्त्रनेत्रं - समानाधिकरणबहुव्रीहिसमासः

अनन्तं रूपम् यस्य सः - अनन्तरूपः - तम्

समानाधिकरणबहुव्रीहिसमासः

विश्वं रूपं यस्य सः विश्वेश्वरः -

समानाधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

मूलश्लोकः

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥ ११.१७॥

पदच्छेदः

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतः दीप्तिमन्तम् पश्यामि त्वां दुर्निरीक्ष्यं समन्तात् दीप्तानलार्कद्युतिम् अप्रमेयम्

पदपरिचयः
किरीटिनं - नकार पु द्वि एक
गदिनं - नकार पु द्वि एक
चक्रिणं - - नकार पु द्वि एक
तेजोराशिं - इकार पु द्वि एक
दीप्तिमन्तम् - नकार पु द्वि एक
दुर्निरीक्ष्यं - अकार पु द्वि एक
समन्तात् - अव्ययम्
दीप्तानलार्कद्युतिम् - अकार पु द्वि एक
अप्रमेयम् - अकार पु द्वि एक

पदार्थः
किरीटिनं - मुकुटवन्तम्
गदिनं - गदाधरम्
चक्रिणं - चक्रपाणिम्
तेजोराशिं - तेजः पुञ्जं

Downloaded from www.omkaravidya.com

दीप्तिमन्तम् -  तेजस्विनम्
दुर्निरीक्ष्यं - दुखेन निरीक्ष्यम्
समन्तात् - सर्वतः
दीप्तानलार्कद्युतिम् - दीप्ताग्निसूर्यतुल्यतेजसम्
अप्रमेयम् - अशक्यपरिच्छेदम्
अन्वयः
किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतः दीप्तिमन्तम् दुर्निरीक्ष्यं समन्तात् दीप्तानलार्कद्युतिम् अप्रमेयम् त्वां पश्यामि ।

व्याकरणम्
▶ सन्धिः
सर्वतः + दीप्तिमन्तम् - विसर्गउकारः
समन्तात् + दीप्तानलार्कद्युतिम् - जशंत्वसन्धिः

▶ समासः
तेजसः राशिः - षष्ठीतत्पुरुषः
दीप्तयोः अनलार्कयोः इव द्युतिः यस्य सः - दीप्तानलार्कद्युतिः - समानाधिकरणबहुव्रीहिसमासः
दु:खेन निरीक्ष्यः - तृतीया तत्पुरुषः - तम्
न प्रमेयः - अप्रमेयः - नञ् बहुव्रीहिः - तम्

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ ११.१८॥

Downloaded from www.omkaravidya.com

पदच्छेदः

त्वम् अक्षरं परमं वेदितव्यं त्वम् अस्य विश्वस्य परं निधानम् त्वम् अव्ययः शाश्वतधर्मगोप्ता सनातनः त्वम्  पुरुषः मतः मे

पदपरिचयः
अक्षरं - अकार नपु प्र एक
परमं - अकार नपु प्र एक
वेदितव्यं  - अकार नपु प्र एक
विश्वस्य - अकार नपु ष एक
परं - अकार नपु प्र एक
निधानम् - अकार नपु प्र एक
अव्ययः - अकार पु प्र एक
शाश्वतधर्मगोप्ता - ऋकार पु प्र एक
सनातनः - अकार पु प्र एक
पुरुषः - अकार पु प्र एक
मतः - अकार पु प्र एक
मे - दकार त्रि ष एक

पदार्थः
अक्षरं - क्षयरहितम्
परमं - ब्रह्म
वेदितव्यं  - ज्ञातव्यम्
विश्वस्य - समस्तस्य जगतः
परं - प्रकृष्टम्
निधानम् -  आश्रयः
अव्ययः - नाशरहितः

Downloaded from www.omkaravidya.com

शाश्वतधर्मगोप्ता - सनातनधर्मरक्षक:
सनातन: - चिरंतन:
पुरुष: - परमपुरुष:
मत: - अभिप्रेत:

अन्वयः
त्वम् वेदितव्यं परमं अक्षरं । त्वम् अस्य विश्वस्य परं निधानम् । त्वम् अव्यय: शाश्वतधर्मगोप्ता । त्वम् सनातन: पुरुष: मे मत: ।

व्याकरणम्
▶ सन्धिः
सनातन: + त्वम् - विसर्गसकार:
पुरुष: + मत: - विसर्गउकार:
मत: + मे - विसर्गउकार:

▶ समासः
अव्यय: - न विद्यते व्यय: यस्य स: - नञ् बहुव्रीहि:
शाश्वतधर्मगोप्ता - शाश्वतस्य धर्मस्य गोप्ता - षष्ठीतत्पुरुष:

▶ कृदन्ता:
वेदितव्यम् - विद् + तव्यत् प्रत्यय:

श्रीमद्भगवद्गीता - एकादशोऽध्याय: - विश्वरूपदर्शनयोग:

मूलश्लोकः

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम् ॥ ११.१९॥

Downloaded from www.omkaravidya.com

पदच्छेदः
अनादिमध्यान्तम् अनन्तवीर्यम् अनन्तबाहुं शशिसूर्यनेत्रम् पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वम् इदं तपन्तम्

पदपरिचयः
अनादिमध्यान्तम् - अकार पु द्वि एक
अनन्तवीर्यम् - अकार पु द्वि एक
अनन्तबाहुं - उकार पु द्वि एक
शशिसूर्यनेत्रम् - अकार पु द्वि एक
पश्यामि - लट् उपु एक
दीप्तहुताशवक्त्रं - अकार पु द्वि एक
स्वतेजसा - सकार नपु तृ एक
विश्वम् - अकार नपु द्वि एक
तपन्तम् - तकार पु द्वि एक

पदार्थः
अनादिमध्यान्तम् - उत्पत्तिस्थितिनाशरहितम्
अनन्तवीर्यम् - अनन्तशक्तिमन्तम्
अनन्तबाहुं - असङ्ख्याकहस्तम्
शशिसूर्यनेत्रम् - चन्द्रार्कनयनम्
पश्यामि - ईक्षे
दीप्तहुताशवक्त्रं - प्रदीप्ताग्निमुखम्
स्वतेजसा - आत्मतेजसा
विश्वम् - भुवनम्
तपन्तम् - तापयन्तम्

Downloaded from www.omkaravidya.com

अन्वयः

अनादिमध्यान्तम् अनन्तवीर्यम् अनन्तबाहुं शशिसूर्यनेत्रम् दीप्तहुताशवक्त्रं
स्वतेजसा इदं विश्वम् तपन्तम् त्वाम् पश्यामि ।

व्याकरणम्

▶ समासः

आदिश्च मध्यश्च अन्तश्च - आदिमध्यान्ताः - इतरेतरद्वन्द्वसमासः
न विद्यते आदिमध्यान्ताः यस्य सः - अनादिमध्यान्तः नञ् बहुव्रीहिः
अनन्तं वीर्यं यस्य सः अनन्त वीर्यः - समानाधिकरणबहुव्रीहिसमासः - तम्
अनन्ताः बाहवः यस्य सः - अनन्तबाहुः - समानाधिकरणबहुव्रीहिसमासः - तम्
शशी च सूर्यः च - शशिसूर्यौ - इतरेतरद्वन्द्वसमासः
शशिसूर्यौ नेत्रे यस्य सः - शशिसूर्यनेत्रः - व्यधिकरणबहुव्रीहिसमासः
दीप्तः हुतशः वक्त्रेषु यस्य सः - दीप्तहुताशवक्त्रः - व्यधिकरणबहुव्रीहिसमासः
- तम्

## श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥ ११.२०॥

Downloaded from www.omkaravidya.com

पदच्छेदः

द्यावापृथिव्योः इदम् अन्तरं हि व्याप्तम् त्वया एकेन दिशः च  सर्वाः दृष्ट्वा अद्भुतं रूपम् उग्रं तव इदं लोकत्रयं प्रव्यथितं महात्मन्

पदपरिचयः

द्यावापृथिव्योः - ईकार स्त्री स एक

अन्तरं - अकार नपु प्र एक

व्याप्तम् - अकार नपु प्र एक

एकेन - दकार पु तृ एक

दिशः - शकार स्त्री प्र बहु

सर्वाः - अकार स्त्री प्र बहु

दृष्ट्वा - क्त्वान्तम्

अद्भुतं - अकार नपु द्वि एक

रूपम् - अकार नपु द्वि एक

उग्रं - अकार नपु द्वि एक

लोकत्रयं - अकार नपु प्र एक

प्रव्यथितं - अकार नपु प्र एक

महात्मन् - नकार पु सं प्र

पदार्थः

द्यावापृथिव्योः - आकाशपृथिव्योः

अन्तरं - अन्तरिक्षम्

व्याप्तम् - व्याप्तम्

एकेन - एकेन

दिशः - दिशः

सर्वाः - सकलाः

दृष्ट्वा - अवलोक्य

अद्भुतं - आश्चर्यम्

Downloaded from www.omkaravidya.com

रूपम्  - विश्वरूपम्
उग्रं - क्रूरम्
लोकत्रयं - भुवनत्रयम्
प्रव्यथितं - भीतं प्रचलितम्
महात्मन् - अक्षुद्रस्वभाव !

अन्वयः
हे महात्मन्! द्यावापृथिव्योः इदम् अन्तरं त्वया एकेन व्याप्तम् हि सर्वाः दिशः च  तव इदं अद्भुतं  उग्रं रूपम् दृष्ट्वा लोकत्रयं प्रव्यथितम् ।

व्याकरणम्
▶ सन्धिः
द्यावापृथिव्योः + इदम् - विसर्गरेफः
त्वया + एकेन - वृद्धिसन्धिः
दिशः + च  - विसर्गसकारः
दृष्ट्वा + अद्भुतं - सवर्णदीर्घसन्धिः
तव + इदं - गुणसन्धिः

▶ समासः
लोकानाम त्रयं लोकत्रयं - षष्ठीतत्पुरुषसमासः
द्यौश्च पृथिवी च - द्यावापृथिव्यो; - इतरेतरद्वन्द्वसमासः

▶ कृदन्ताः
दृष्ट्वा - दृश् + क्त्वा प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

अमी हि त्वां सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥११.२१॥

पदच्छेदः
अमी हि त्वां सुरसङ्घाः विशन्ति केचित् भीताः प्राञ्जलयः गृणन्ति
स्वस्ति इति उक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः

पदपरिचयः
अमी - सकार पु प्र बहु
सुरसङ्घाः - अकार पु प्र बहु
विशन्ति - लट् प्रपु बहु
भीताः - अकार पु प्र बहु
प्राञ्जलयः - इकार पु प्र बहु
गृणन्ति - लट प्रपु बहु
स्वस्ति - अव्ययम्
उक्त्वा - क्त्वान्तम्
महर्षिसिद्धसङ्घाः - अकार पु प्र बहु
स्तुवन्ति - लट् प्रपु बहु
स्तुतिभिः - इकार स्त्री तृ बहु
पुष्कलाभिः - आकार स्त्री तृ बहु

पदार्थः
अमी - इमे
सुरसङ्घाः देवसङ्घाः

Downloaded from www.omkaravidya.com

विशन्ति - विशन्ति
भीताः - भयसहिताः
प्राञ्जलयः - मुकुलितहस्ताः
गृणन्ति - स्तुवन्ति
स्वस्ति - मङ्गलम्
उक्त्वा - उक्त्वा
महर्षिसिद्धसङ्घाः - महर्षिसिद्धसङ्घाः
स्तुवन्ति - स्तुवन्ति
स्तुतिभिः - स्तुतिभिः
पुष्कलाभिः - सम्पूर्णाभिः

अन्वयः
अमी सुरसङ्घाः हि त्वां विशन्ति । केचित् भीताः प्राञ्जलयः गृणन्ति ।
महर्षिसिद्धसङ्घाः स्वस्ति इति उक्त्वा पुष्कलाभिः स्तुतिभिः त्वां स्तुवन्ति ।

व्याकरणम्
▶ सन्धिः
सुरसङ्घाः + विशन्ति - विसर्गलोपः
केचित् + भीताः - जश्त्वसन्धिः
प्राञ्जलयः + गृणन्ति - विसर्गउकारः
स्वस्ति + इति - सवर्णदीर्घसन्धिः
इति + उक्त्वा - यण्सन्धिः

▶ समासः
महर्षीणाम् च सिद्धानाम् च सङ्घः - महर्षिसिद्धसङ्घाः - षष्ठीतत्पुरुषः

▶ कृदन्ताः
उक्त्वा - वच् + क्त्वा प्रत्ययः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥ ११.२२॥

पदच्छेदः
रुद्रादित्याः वसवः ये च साध्याः विश्वे अश्विनौ मरुतः च ऊष्मपाः च
गन्धर्वयक्षासुरसिद्धसङ्घाः वीक्षन्ते त्वां विस्मिताः च एव सर्वे

पदपरिचयः
रुद्रादित्याः - अकार पु प्र बहु
वसवः - उकार पु प्र बहु
साध्याः - अकार पु प्र बहु
विश्वे - अकार पु प्र बहु
अश्विनौ - इकार पु प्र द्वि
मरुतः - तकार पु प्र बहु
ऊष्मपाः -अकार पु प्र बहु
गन्धर्वयक्षासुरसिद्धसङ्घाः - अकार पु प्र बहु
वीक्षन्ते - लट् प्रपु बहु
विस्मिताः - अकार पु प्र बहु
सर्वे - अकार पु प्र बहु

पदार्थः
रुद्रादित्याः - एकादशरुद्राः द्वादशादित्याः
वसवः - अष्टवसवः

Downloaded from www.omkaravidya.com

साध्याः - साध्याः
विश्वे - विश्वेदेवाः
अश्विनौ - अश्विनौ
मरुतः - मरुतः
ऊष्मपाः - पितरः
गन्धर्वयक्षासुरसिद्धसङ्घाः- गन्धर्वयक्षासुरसिद्धसङ्घाः
वीक्षन्ते - पश्यन्ति
विस्मिताः - आश्चर्याः
सर्वे - सकलाः

अन्वयः
रुद्रादित्याः वसवः ये च साध्याः विश्वे अश्विनौ मरुतः च ऊष्मपाः च गन्धर्वयक्षासुरसिद्धसङ्घाः च सर्वे एव विस्मिताः त्वां वीक्षन्ते ।

व्याकरणम्
▶ सन्धिः
रुद्रादित्याः + वसवः - विसर्गलोपः
वसवः + ये - विसर्गउकारः
साध्याः + विश्वे - विसर्गलोपः
विश्वे + अश्विनौ - पूर्वरूपसन्धिः
मरुतः+ च - विसर्गसकारः
च + ऊष्मपाः - गुणसन्धिः
ऊष्मपाः + च - विसर्गसकारः
गन्धर्वयक्षासुरसिद्धसङ्घाः+ वीक्षन्ते - विसर्गलोपः
तविस्मिताः + च - विसर्गसकारः
च + एव - वृद्धिसन्धिः

▶ समासः
गन्धर्वाः च यक्षाः च असुरः च सिद्धाः च - गन्धर्वयक्षासुरसिद्धाः - इतरेतरद्वन्द्वसमासः
तेषां सङ्घाः - गन्धर्वयक्षासुरसिद्धसङ्घाः - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥११.२३॥

नभः स्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥ ११.२४॥

पदच्छेदः
रूपं महत् ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथिताः तथा अहम् नभः स्पृशं दीप्तम् अनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम्
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो

पदपरिचयः
रूपं - अकार नपु द्वि एक
महत् - तकार नपु द्वि एक
बहुवक्त्रनेत्रं - अकार नपु द्वि एक
महाबाहो - उकार पु सं प्र
बहुबाहूरुपादम् - अकार नपु द्वि एक
बहूदरं - अकार नपु द्वि एक
बहुदंष्ट्राकरालं - अकार नपु द्वि एक
दृष्ट्वा - क्त्वान्तम्
लोकाः - अकार पु प्र बहु
प्रव्यथिताः - अकार पु प्र बहु

Downloaded from www.omkaravidya.com

नभः स्पृशं - अकार पु द्वि एक
दीप्तम् - अकार पु द्वि एक
अनेकवर्णं - अकार पु द्वि एक
व्यात्ताननं - अकार पु द्वि एक
दीप्तविशालनेत्रम् - अकार पु द्वि एक
दृष्ट्वा - क्त्वान्तम्
प्रव्यथितान्तरात्मा - नकार पु प्र एक
धृतिं - इकार स्त्री द्वि एक
विन्दामि लट् उपु एक
शमं - अकार पु द्वि एक
विष्णो - उकार पु सं प्र

पदार्थः
रूपं - स्वरूपम्
महत् - अतिप्रमाणम्
बहुवक्त्रनेत्रं - बहुमुखनेत्रम्
महाबाहो - अर्जुन !
बहुबाहूरुपादम् - बहुबाहूरुपादम्
बहूदरं - अनेककुक्षिम्
बहुदंष्ट्राकरालं - अनेकदन्तभयानकम्
दृष्ट्वा - अवलोक्य
लोकाः - जनाः
प्रव्यथिताः भयेन प्रचलिताः
नभः स्पृशं - द्युस्पर्शम्
दीप्तम् - प्रज्वलितम्
अनेकवर्णं - नानावर्णं
व्यात्ताननं - विवृतमुखम्
दीप्तविशालनेत्रम् - ज्वलितविस्तृतलोचनम्

Downloaded from www.omkaravidya.com

दृष्ट्वा अवलोक्य
प्रव्यथितान्तरात्मा - प्रभीतः अन्तरात्मा
धृतिं - धैर्यम्
विन्दामि - लभे
शमं - शान्तिम्
विष्णो - कृष्ण!

अन्वयः

हे महाबाहो! ते महत् रूपं बहुवक्त्रनेत्रं बहुबाहूरुपादम् बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथिताः तथा अहम् (अपि) । हे विष्णो! नभः स्पृशं दीप्तम् अनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् त्वां दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि ।

व्याकरणम्

▶ सन्धिः
प्रव्यथिताः + तथा - विसर्गसकारः
तथा + अहम् - सवर्णदीर्घसन्धिः

▶ समासः
बहूनि वक्त्राणि च नेत्राणि च यस्मिन् तत् बहुवक्त्रनेत्रं - समानाधिकरणबहुव्रीहिसमासः

बहवः बाहवः ऊरवः पादाः च यस्मिन् तत् - बहुबाहूरुपादम् - समानाधिकरणबहुव्रीहिसमासः

बहूनि उदराणि यस्मिन् तत् - बहूदरम् - समानाधिकरणबहुव्रीहिसमासः

बह्वीभिः दंष्ट्राभिः करालम् यस्मिन् तत् - बहुदंष्ट्राकरालम् - व्यधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

नभः स्पृशति - नभः स्पृक् - उपपदसमासः - तम्

अनेके वर्णाः यस्य सः - अनेकवर्णः - समानाधिकरणबहुव्रीहिसमासः

व्यात्तानि आननानि यस्य सः - व्यात्ताननः समानाधिकरणबहुव्रीहिसमासः

दीप्तानि विशालानि नेत्राणि यस्य सः -
दीप्तविशालनेत्रः समानाधिकरणबहुव्रीहिसमासः

प्रव्यथितः अन्तरात्मा यस्य सः - प्रव्यथितान्तरात्मा

▶ कृदन्ताः
दृष्ट्वा - दृश् + क्त्वा प्रत्ययः

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥११.२५॥

पदच्छेदः
दंष्ट्राकरालानि च ते मुखानि दृष्ट्वा एव कालानलसन्निभानि दिशः न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास

Downloaded from www.omkaravidya.com

पदपरिचयः
दंष्ट्राकरालानि - अकार नपु द्वि बहु
मुखानि - अकार नपु द्वि बहु
दृष्ट्वा - क्त्वान्तम्
कालानलसन्निभानि - अकार नपु द्वि बहु
दिशः - शकार स्त्री द्वि बहु
जाने - लट् उपु एक
लभे - लट् उपु एक
शर्म अकार नपु द्वि बहु
प्रसीद - विधि मपु एक
देवेश - अकार पु सं प्र
जगन्निवास - अकार पु सं प्र

पदार्थः
दंष्ट्राकरालानि - क्रूरदन्तानि
मुखानि - वदनानि
दृष्ट्वा - अवलोक्य
कालानलसन्निभानि - प्रलयाग्निसदृशानि समानम्
दिशः - दिशः
जाने - जानामि
लभे - प्राप्नोमि
शर्म - सुखम्
प्रसीद - प्रसन्नः भव
देवेश - कृष्ण
जगन्निवास - जगन्निवास

अन्वयः

Downloaded from www.omkaravidya.com

हे देवेश हे जगन्निवास ! दंष्ट्राकरालानि कालानलसन्निभानि च ते मुखानि  दृष्ट्वा एव  दिशः  न जाने शर्म च  न लभे । प्रसीद ।

व्याकरणम्

▶ सन्धिः

दृष्ट्वा + एव - वृद्धिसन्धिः
दिशः + न - विसर्गउकारः

▶ समासः

दंष्ट्राभिः करालम् - दंष्ट्राकरालम् - तृतीयातत्पुरुषः
कालानलस्य सन्निभम् - कालानलसन्निभम् - षष्ठीतत्पुरुषः
देवानाम् ईशः - देवेशः -षष्ठीतत्पुरुषः
जगतः निवासः - जगन्निवासः - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः॥ ११.२६॥

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ ११.२७॥

Downloaded from www.omkaravidya.com

पदच्छेदः
अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सह एव अवनिपालसंघैः भीष्मः द्रोणः सूतपुत्रः तथा असौ सह अस्मदीयैः अपि योधमुख्यैः वक्त्राणि ते त्वरमाणाः विशन्ति दंष्ट्राकरालानि भयानकानि केचित् विलग्नाः दशनान्तरेषु संदृश्यन्ते चूर्णितैः उत्तमाङ्गैः

पदपरिचयः
अमी - सकार पु प्र बहु
धृतराष्ट्रस्य - अकार पु ष एक
पुत्राः - अकार पु प्र बहु
सर्वे - अकार पु प्र बहु
अवनिपालसंघैः - अकार पु तृ बहु
भीष्मः - अकार पु प्र एक
द्रोणः - अकार पु प्र एक
सूतपुत्रः - अकार पु प्र एक
असौ - सकार पु प्र एक
अस्मदीयैः - अकार पु तृ बहु
योधमुख्यैः - अकार पु तृ बहु
वक्त्राणि - अकार नपु द्वि बहु
त्वरमाणाः - अकार पु प्र बहु
विशन्ति - लट् प्रपु बहु
दंष्ट्राकरालानि - अकार नपु द्वि बहु
भयानकानि -अकार नपु द्वि बहु
विलग्नाः- अकार पु प्र बहु
दशनान्तरेषु - अकार पु स बहु
संदृश्यन्ते - लट् प्रपु बहु
चूर्णितैः - अकार नपु तृ बहु
उत्तमाङ्गैः - अकार नपु तृ बहु

Downloaded from www.omkaravidya.com

पदार्थः

अमी - इदम्

धृतराष्ट्रस्य - धृतराष्ट्रस्य

पुत्राः - पुत्राः

सर्वे - सकलाः

अवनिपालसंघैः - पृथ्वीपालसंघैः

भीष्मः - भीष्मः

द्रोणः - द्रोणः

सूतपुत्रः - कर्णः

असौ - असौ

अस्मदीयैः - अस्मदीयैः

योधमुख्यैः -योधमुख्यैः

वक्त्राणि - मुखानि

त्वरमाणाः - त्वरायुक्ताः

विशन्ति - विशन्ति

दंष्ट्राकरालानि - क्रूरदन्तानि

भयानकानि - भयंकराणि

विलग्नाः - विलग्नाः

दशनान्तरेषु - दन्तान्तरेषु

संदृश्यन्ते - उपलभ्यन्ते

चूर्णितैः - चूर्णीकृतैः

उत्तमाङ्गैः - शिरोभिः

अन्वयः

अमी च सर्वे धृतराष्ट्रस्य पुत्राः अवनिपालसंघैः सह एव भीष्मः द्रोणः तथा असौ सूतपुत्रः सह अस्मदीयैः योधमुख्यैः सह त्वां त्वरमाणाः ते दंष्ट्राकरालानि भयानकानि

Downloaded from www.omkaravidya.com

वक्त्राणि  विशन्ति चूर्णितैः उत्तमाङ्गैः दशनान्तरेषु विलग्नाः केचित् संदृश्यन्ते ।

व्याकरणम्

▶ सन्धिः

सह + एव - वृद्धिसन्धिः

एव + अवनिपालसंघैः - सवर्णदीर्घसन्धिः

भीष्मः + द्रोणः- विसर्गउकारः

सूतपुत्रः + तथा - विसर्गसकारः

तथा + असौ -सवर्णदीर्घसन्धिः

सह + अस्मदीयैः - सवर्णदीर्घसन्धिः

अस्मदीयैः + अपि - विसर्गरेफः

केचित् + विलग्नाः - जश्त्वसन्धिः

विलग्नाः +दशनान्तरेषु  - विसर्गलोपः

चूर्णितैः + उत्तमाङ्गैः - विसर्गरेफः

▶ समासः

अवनिं पालयति - अवनिपालः - उपपदसमासः

तेषां सङ्घैः - अवनिपालसङ्घैः षष्ठीतत्पुरुषः

दंष्ट्राभि करालम् - तृतीयातत्पुरुषः

दशनानां अन्तरः -दशनान्तरः  षष्ठीतत्पुरुषः

सूतस्य पुत्रः - सूतपुत्रः - षष्ठीतत्पुरुषः

योधानाम् मुख्यः - योधमुख्यः - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीराः विशन्ति वक्त्राण्यभिविज्वलन्ति ॥११.२८॥

पदच्छेदः
यथा नदीनां बहवः अम्बुवेगाः समुद्रम् एव अभिमुखाः द्रवन्ति
तथा तव अमी नरलोकवीराः विशन्ति वक्त्राणि अभिविज्वलन्ति

पदपरिचयः
नदीनां - ईकार स्त्री ष बहु
बहवः - उकार पु प्र बहु
अम्बुवेगाः - अकार पु प्र बहु
समुद्रम् - अकार पु द्वि एक
अभिमुखाः - अकार पु प्र बहु
द्रवन्ति - लट् प्रपु बहु
अमी - सकार पु प्र वहु
नरलोकवीराः अकार पु प्र बहु
विशन्ति - लट् प्रपु बहु
वक्त्राणि - अकार नपु द्वि बहु
अभिविज्वलन्ति - लट् प्रपु बहु

पदार्थः
नदीनां - स्रवन्तीनाम्
बहवः - अनेकाः

Downloaded from www.omkaravidya.com

अम्बुवेगा: - जलप्रवागा:

समुद्रम् -समुद्रम्

अभिमुखा: - प्रतिमुखा: द्रवन्ति - प्रविशन्ति

अमी - इमे

नरलोकवीरा: - मनुष्यलोकशूरा:

विशन्ति -विशन्ति

वक्त्राणि - मुखानि अभिविज्वलन्ति - प्रकाशमानानि

अन्वयः

यथा नदीनां बहव: अम्बुवेगा: समुद्रम् एव अभिमुखा: द्रवन्ति

तथा अमी नरलोकवीरा: अभिविज्वलन्ति तव वक्त्राणि विशन्ति ।

व्याकरणम्

▶ सन्धिः

बहव: + अम्बुवेगा: - विसर्गउकार: पूर्वरूपसन्धि:

एव + अभिमुखा: - सवर्णदीर्घसन्धि:

अभिमुखा: + द्रवन्ति - विसर्गलोप:

तव + अमी -सवर्णदीर्घसन्धि:

नरलोकवीरा: +विशन्ति - विसर्गलोप:

वक्त्राणि + अभिविज्वलन्ति - यण्सन्धि:

▶ समासः

अम्बूनाम् वेगा: - अम्बुवेगा: - षष्ठीतत्पुरुष:

नराणां लोक: - नरलोक: - षष्ठीतत्पुरुष:

नरलोकस्य वीरा: - नरलोकवीरा: षष्ठीतत्पुरुष:

Downloaded from www.omkaravidya.com

मूलश्लोकः

यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥ ११.२९॥

पदच्छेदः
यथा प्रदीप्तं ज्वलनं पतङ्गाः विशन्ति नाशाय समृद्धवेगाः तथा एव नाशाय विशन्ति लोकाः तव अपि वक्त्राणि समृद्धवेगाः

पदपरिचयः
प्रदीप्तं - अकार नपु द्वि एक
ज्वलनं - अकार नपु द्वि एक
पतङ्गाः - अकार पु प्र बहु विशन्ति - लट् प्रपु बहु
नाशाय - अकार पु च एक
समृद्धवेगाः - अकार पु प्र बहु
नाशाय - अकार पु च एक
विशन्ति लट् प्रपु बहु
लोकाः - अकार पु प्र बहु
वक्त्राणि - अकार नपु द्वि बहु
समृद्धवेगाः -अकार पु प्र बहु

पदार्थः
प्रदीप्तं - ज्वलितम्
ज्वलनं - अग्निम्
पतङ्गाः - पक्षिणः
विशन्ति - प्रविशन्ति

Downloaded from www.omkaravidya.com

नाशाय - विनाशाय
समृद्धवेगाः - समृद्धवेगाः
नाशाय - विनाशाय
विशन्ति - प्रविशन्ति
लोकाः - जनाः
वक्त्राणि - मुखानि
समृद्धवेगाः -समृद्धवेगाः

अन्वयः
यथा पतङ्गाः नाशाय समृद्धवेगाः प्रदीप्तं ज्वलनं विशन्ति तथा एव लोकाः अपि तव वक्त्राणि समृद्धवेगाः नाशाय विशन्ति ।

व्याकरणम्
▶ सन्धिः
पतङ्गाः + विशन्ति - विसर्गलोपः
तथा + एव - वृद्धिसन्धिः
लोकाः + तव - विसर्गसकारः
तव + अपि - सवर्णदीर्घसन्धिः

▶ समासः
समृद्धः वेगः यस्य सः - समृद्धवेगः - समानाधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत् समग्रं भासस्तवेग्राः प्रतपन्ति विष्णो ॥ ११.३०॥

पदच्छेदः
लेलिह्यसे ग्रसमानः समन्तात् लोकान् समग्रान् वदनैः ज्वलद्भिः तेजोभिः आपूर्य जगत् समग्रं भासः तव उग्राः प्रतपन्ति विष्णो

पदपरिचयः
लेलिह्यसे - लट् करमणि मपु एक
ग्रसमानः - अकार पु प्र एक
समन्तात् - अव्ययम्
लोकान् - अकार पु द्वि बहु
समग्रान् - अकार पु द्वि बहु
वदनैः - अकार नपु तृ बहु
ज्वलद्भिः - अकार नपु तृ बहु
तेजोभिः - सकार नपु तृ बहु
आपूर्य - ल्यबन्तम्
जगत् - तकार नपु द्वि एक
समग्रं - अकार नपु द्वि एक
भासः सकार स्त्री प्र बहु
उग्राः - आकार स्त्री प्र बहु
प्रतपन्ति - लट् प्रपु बहु
विष्णो - उकार पु सं प्र

Downloaded from www.omkaravidya.com

पदार्थः

लेलिह्यसे - आस्वादयसि

ग्रसमानः -अन्तः प्रवेशयन्

समन्तात् - सर्वतः

लोकान् - जनान्

समग्रान् - समस्तान्

वदनैः - वक्त्रैः

ज्वलद्भिः - दीप्यमानैः

तेजोभिः - तेजोभिः

आपूर्य - संव्याप्य

जगत् - जगत्

समग्रं - समस्तम्

भासः - दीप्तयः

उग्राः - तीक्ष्णाः

प्रतपन्ति - प्रतापं कुर्वन्ति

विष्णो - कृष्ण !

अन्वयः

हे विष्णो ! (त्वं) ज्वलद्भिः वदनैः समग्रान् लोकान् समन्तात् ग्रासमानः लेलिह्यसे । तव उग्राः भासः तेजोभिः आपूर्य समग्रं जगत् प्रतपन्ति ।

व्याकरणम्

▶ सन्धिः

समन्तात् + लोकान् - परसवर्णसन्धिः

वदनैः + ज्वलद्भिः - विसर्गरेफः

तेजोभिः + आपूर्य - विसर्गरेफः

भासः + तव - विसर्गसकारः

तव + उग्राः - गुणसन्धिः

▶ कृदन्ताः

आपूर्य - आ + पृ + ल्यप्

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम् ॥ ११.३१॥

पदच्छेदः
आख्याहि मे कः भवान् उग्ररूपः नमः अस्तु ते देववर प्रसीद विज्ञातुम् इच्छामि भवन्तम् आद्यं न हि प्रजानामि तव प्रवृत्तिम्

पदपरिचयः
आख्याहि - लोट् मपु एक
उग्ररूपः - अकार पु प्र एक
नमः - अव्ययम्
अस्तु - लोट् प्रपु एक
देववर - अकार पु सं प्र
प्रसीद - लोट् मपु एक
विज्ञातुम् - तुमुनान्तम्
इच्छामि - लट् उपु एक
भवन्तम् - तकार पु द्वि एक
आद्यं - अकार पु द्वि एक
प्रजानामि - लट् ऊपु एक
प्रवृत्तिम् - इकार स्त्री द्वि एक
पदार्थः
आख्याहि - कथय
उग्ररूपः - क्रूररूपः

Downloaded from www.omkaravidya.com

नमः - नमः
अस्तु - भवतु
देववर - कृष्ण
प्रसीद - प्रसन्नं कुरु
विज्ञातुम् - विशेषेण ज्ञातुम्
इच्छामि - अभिलषामि
भवन्तम् - भवन्तम्
आद्यं - प्रथमम्
प्रजानामि - वेद्मि
प्रवृत्तिम् - चेष्टाम्

अन्वयः
हे देववर! उग्ररूपः भवान् कः मे आख्याहि । ते नमः अस्तु । प्रसीद । आद्यं भवन्तम् विज्ञातुम् इच्छामि तव प्रवृत्तिम् न हि प्रजानानि ।

व्याकरणम्
▶ सन्धिः
कः+ भवान् - विसर्गउकारः
उग्ररूपः + नमः - विसर्गउकारः
नमः + अस्तु- विसर्गउकारः पूर्वरूपसन्धिः

▶ समासः
उग्रं रूपम् यस्य सः - उग्ररूपः - समानाधिकरबहुव्रीहिसमसः
देवानाम् वरः - देववरः - षष्ठीतत्पुरुषः

▶ कृदन्ताः
विज्ञातुम् - वि + ज्ञा + तुमुन् प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

श्री भगवानुवाच
कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्त: ।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिता: प्रत्यनीकेषु योधा: ॥११.३२॥

पदच्छेदः
काल: अस्मि लोकक्षयकृत् प्रवृद्धः लोकान् समाहर्तुम् इह प्रवृत्त: ऋते अपि त्वां न भविष्यन्ति सर्वे ये अवस्थिता: प्रत्यनीकेषु योधा:

पदपरिचयः
काल: - अकार पु प्र एक
लोकक्षयकृत् - तकार पु प्र एक
प्रवृद्धः - अकार पु प्र एक
लोकान् - अकार पु द्वि बहु
समाहर्तुम् - तुमुनन्तम्
प्रवृत्त: - अकार पु प्र एक
ऋते - अव्ययम्
भविष्यन्ति - लृट् प्रपु बहु
सर्वे - अकार पु प्र बहु
अवस्थिता: - अकार पु प्र बहु
प्रत्यनीकेषु - अकार नपु स बहु
योधा: - अकार पु प्र बहु

पदार्थः
काल: - समय:

Downloaded from www.omkaravidya.com

लोकक्षयकृत् - भुवनक्षयकृत्
प्रवृद्धः - प्रवृद्धः
लोकान् - जनान्
समाहर्तुम्  - संहारं कर्तुम्
प्रवृत्तः - प्रवृत्तः
ऋते  - ऋते
भविष्यन्ति - भविष्यन्ति
सर्वे - सकलाः
प्रत्यनीकेषु - प्रतिपक्षभूतेषु
अवस्थिताः - अवस्थिताः
योधाः योद्धारः

अन्वयः
श्री भगवानुवाच
लोकक्षयकृत् प्रवृद्धः कालः अस्मि । लोकान् समाहर्तुम् इह प्रवृत्तः (अस्मि) ।
ये योधाः प्रत्यनीकेषु अवस्थिताः त्वां  ऋते अपि सर्वे न भविष्यन्ति ।

व्याकरणम्
▶ सन्धिः
कालः + अस्मि - विसर्गउकार:पूर्वरूपसन्धिः
प्रवृद्धः + लोकान् - विसर्गउकारः
ऋते + अपि - पूर्वरूपसन्धिः
ये + अवस्थिताः - पूर्वरूपसन्धिः

▶ समासः
लोकानाम् क्षयम् - लोकक्षयम् - षष्ठीतत्पुरुषः
लोकक्षयं करोति इति लोकक्षयकृत् - उपपदसमासः

▶ कृदन्ताः
समाहर्तुम्  - सम् + आ + हृ + तुमुन् प्रत्ययः
अवस्थिताः अव + स्था + क्त प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ११.३३॥

पदच्छेदः
तस्मात् त्वम् उत्तिष्ठ यशः लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम्
मया एव एते निहताः पूर्वम् एव निमित्तमात्रं भव सव्यसाचिन्

पदपरिचयः
उत्तिष्ठ - लोट् मपु एक
यशः - सकार नपु द्वि एक
लभस्व -लोट् मपु एक
जित्वा - क्त्वान्तम्
शत्रून् - उकार पु द्वि बह
भुङ्क्ष्व - लोट् मपु एक
राज्यं - अकार नपु द्वि एक
समृद्धम् - अकार नपु द्वि एक
निहताः - अकार पु प्र बहु
पूर्वम् - अव्ययम् निमित्तमात्रं - अकार नपु प्र एक
भव - लोट् मपु एक
सव्यसाचिन् - नकार पु सं प्र

पदार्थः
उत्तिष्ठ - उत्तिष्ठ
यशः - कीर्तिम्
लभस्व - प्राप्नुहि

Downloaded from www.omkaravidya.com

जित्वा - विजित्य
शत्रून् - अरीन्
भुङ्क्ष्व - अनुभव
राज्यं - आधिपत्यम्
समृद्धम् - समृद्धम्
निहता: - विनाशिता:
पूर्वम् - पूर्वम्
निमित्तमात्रं -हेतुमात्रं
भव - भव
सव्यसाचिन् - अर्जुन

अन्वयः
हे सव्यसाचिन् ! तस्मात् त्वम् उत्तिष्ठ । यश: लभस्व । शत्रून् जित्वा समृद्धम् राज्यं भुङ्क्ष्व । मया एव एते पूर्वम् एव निहता: । निमित्तमात्रं भव ।

व्याकरणम्
▶ सन्धिः
यश: + लभस्व - विसर्गउकार:
मया + एव - वृद्धिसन्धि:
एव + एते - वृद्धिसन्धि:

▶ समासः
सव्येन साचितुम् शीलं यस्य स: - सव्यसाची - व्यधिकरणबहुव्रीहिसमास:

Downloaded from www.omkaravidya.com

मूलश्लोकः

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान् ॥ ११.३४॥

पदच्छेदः
द्रोणं च भीष्मं च जयद्रथं च कर्णं तथा अन्यान् अपि योधवीरान् मया हतान् त्वं जहि मा व्यथिष्ठाः युध्यस्व जेतासि रणे सपत्नान्

पदपरिचयः
द्रोणं - अकार पु द्वि एक
भीष्मं - अकार पु द्वि एक
जयद्रथं - अकार पु द्वि एक
कर्णं - अकार पु द्वि एक
अन्यान्- अकार पु द्वि बहु
योधवीरान् - अकार पु द्वि बहु
हतान् - अकार पु द्वि बहु
जहि - लोट् मपु एक
व्यथिष्ठाः - अ पु प्र बहु
युध्यस्व - लोट् मपु एक
जेतासि - लृट मपु एक
रणे - अकार नपु स एक
सपत्नान् - अकार पु द्वि बहु

पदार्थः
द्रोणं - द्रोणं

Downloaded from www.omkaravidya.com

भीष्मं - भीष्मं
जयद्रथं -जयद्रथं
कर्णं - सूतपुत्रम्
अन्यान् - अन्यान्
योधवीरान् -शत्रून्
हतान् - हतान्
जहि - नाशय
व्यथिष्ठाः - व्यथिष्ठाः
युध्यस्व -युद्धं कुरु
जेतासि - जेष्यसि
रणे – युद्धे सपत्नान् - शत्रून्

अन्वयः
द्रोणं च भीष्मं च जयद्रथं च कर्णं तथा अन्यान्  योधवीरान् अपि मया हतान् त्वं जहि । मा व्यथिष्ठाः । युध्यस्व ।  रणे सपत्नान् जेतासि ।

व्याकरणम्
▶ सन्धिः
तथा + अन्यान् - सवर्णदीर्घसन्धिः
हतान् + तव - सत्वसन्धिः
व्यथिष्ठाः + युध्यस्व -विसर्गलोपः
▶ समासः
योधाः च ते वीराः च  योधवीराः - विशेषणपूर्वपदकर्मधारयसमासः

Downloaded from www.omkaravidya.com

मूलश्लोकः

सञ्जय उवाच
एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥११.३५॥

पदच्छेदः
सञ्जय उवाच
एतत् श्रुत्वा वचनं केशवस्य कृताञ्जलिः वेपमानः किरीटी नमस्कृत्वा भूय एव आह कृष्णं सगद्गदं भीतभीतः प्रणम्य

पदपरिचयः
श्रुत्वा - क्त्वान्तम्
वचनं - अकार नपु द्वि एक
केशवस्य - अकार पु ष एक
कृताञ्जलिः - इकार पु प्र एक
वेपमानः - अकार पु प्र एक
किरीटी - नकार पु प्र एक
नमस्कृत्वा - क्त्वान्तम्
आह - लट् प्रपु एक
कृष्णं - अकार पु द्वि एक
सगद्गदं - अव्ययम्
भीतभीतः - अकार पु प्र एक
प्रणम्य - ल्यबन्तम्

पदार्थः

Downloaded from www.omkaravidya.com

श्रुत्वा - आकर्ण्य
वचनं - वाक्यम्
केशवस्य - कृष्णस्य
कृताञ्जलिः मुकुलितकरः
वेपमानः -कम्पमानः
किरीटी -मकुरी
नमस्कृत्वा - नमस्कृत्य
आह - अवदत्
कृष्णं -कृष्णं
सगद्गदं - निरुद्धकण्ठम्
भीतभीतः - भयाविष्टचेताः
प्रणम्य - नमस्कृत्य

अन्वयः
सञ्जय उवाच
किरीटी केशवस्य एतत् वचनं श्रुत्वा कृताञ्जलिः वेपमानः भीतभीतः कृष्णं नमस्कृत्वा सगद्गदं भूयः एव प्रणम्य आह ।

व्याकरणम्
▶ सन्धिः
एतत् + श्रुत्वा - श्चुत्वसन्धिः छत्वसन्धिः
कृताञ्जलिः + वेपमानः- विसर्गरेफः
भूयः + एव - विसर्गलोपः
एव + आह - सवर्णदीर्घसन्धिः

▶ समासः
कृतः अञ्जलिः येन सः - कृताञ्जलिः - समानधिकरणबहुव्रीहिसमासः
गद्गदेन सह वर्तते इति सगद्गदम् - सहपूर्वपदकर्मधारयसमासः

Downloaded from www.omkaravidya.com

▶ कृदन्ता:
श्रुत्वा - श्रु + क्त्वा प्रत्यय:
नमस्कृत्वा - नम: + कृ + क्त्वा प्रत्यय:
प्रणम्य - प्र + नम् + ल्यप् प्रत्यय:

श्रीमद्भगवद्गीता - एकादशोऽध्याय: - विश्वरूपदर्शनयोग:

मूलश्लोकः

अर्जुन उवाच
स्थाने हृषीकेश तव प्रकीर्त्या जगत् प्रहृष्यत्यनुरज्यते ।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घा: ॥११.३६॥

पदच्छेदः
स्थाने हृषीकेश तव प्रकीर्त्या जगत् प्रहृष्यति अनुरज्यते रक्षांसि भीतानि दिश:
द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घा:

पदपरिचयः
स्थाने - अकार नपु स एक
हृषीकेश - अकार पु सं प्र
प्रकीर्त्या - ईकार स्त्री तृ एक
जगत् - तकार नपु प्र एक
प्रहृष्यति - लट् प्रपु एक
अनुरज्यते - लट् कर्मणि प्रपु एक
रक्षांसिच- सकार नपु प्र बहु

Downloaded from www.omkaravidya.com

भीतानि -अकार नपु प्र बहु
दिशः - शकार स्त्री ष एक
द्रवन्ति - लट् प्रपु बहु
नमस्यन्ति  लट् प्रपु बहु
सिद्धसङ्घाः - अकार पु प्र बहु

पदार्थः
स्थाने - युक्तम्
हृषीकेश - कृष्ण
प्रकीर्त्या - माहात्म्यकीर्तनेन
जगत् - भुवनम्
प्रहृष्यति - प्रहर्षम् उपैति अनुरज्यते - अनुरागमुपैति
रक्षांसि - राक्षसाः
भीतानि - भयाविष्टानि दिशः - दिशः
द्रवन्ति - गच्छन्ति नमस्यन्ति -नमस्कुर्वन्ति सिद्धसङ्घाः - सिद्धसङ्घाः

अन्वयः
हे हृषीकेश तव प्रकीर्त्या जगत् प्रहृष्यति अनुरज्यते । रक्षांसि भीतानि दिशः द्रवन्ति । सर्वे सिद्धसङ्घाः  नमस्यन्ति च । (एतानि) स्थाने ।

व्याकरणम्
▶ सन्धिः
प्रहृष्यति + अनुरज्यते - यण्सन्धिः
दिशः + द्रवन्ति - विसर्गउकारः

▶ समासः
सिद्धानाम् सङ्घः - सिद्धसङ्घः - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

कस्माच्च ते न नमेरन्महात्मन् गरीयसे. ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥११.३७॥

पदच्छेदः
कस्मात् च ते न नमेरन् महात्मन् गरीयसे ब्रह्मणः अपि आदिकर्त्रे अनन्त देवेश जगन्निवास त्वम् अक्षरं सत् असत् तत् परं यत्

पदपरिचयः
नमेरन् - विधि प्र बहु
महात्मन् - नकार पु सं प्र
गरीयसे - सकार नपु च एक
ब्रह्मणः - नकार पु ष एक
आदिकर्त्रे - ऋकार पु च एक
अनन्त - अकार पु सं प्र
देवेश - अकार पु सं प्र
जगन्निवास- अकार पु सं प्र
अक्षरं - अकार नपु प्र एक
सत् - तकार नपु प्र एक
असत् - तकार नपु प्र एक
परं - अकार नपु प्र एक

पदार्थः
नमेरन् - नमस्कुर्युः

Downloaded from www.omkaravidya.com

महात्मन् - महात्मन्
गरीयसे - गुरुतराय
ब्रह्मणः - हिरण्यगर्भस्य
आदिकर्त्रे - आदिकारणाय
अनन्त - अवधिरहित
देवेश - सुराधिप
जगन्निवास - जगन्निवास
अक्षरं - परब्रह्म
सत् - व्यक्तम्
असत् - अव्यक्तम्
परं - श्रेष्ठम्

अन्वयः
हे महात्मन् हे अनन्त हे देवेश हे जगन्निवास ! यत् सत् असत् तत् परं अक्षरं त्वम् (एव) । गरीयसे ब्रह्मणः अपि आदिकर्त्रे ते कस्मात् च न नमेरन्? ।

व्याकरणम्
▶ सन्धिः
कस्मात् + च - श्चुत्वसन्धिः
ब्रह्मणः + अपि - विसर्गउकारः पूर्वरूपसन्धिः
अपि + आदिकर्त्रे - यण्सन्धिः
सत् + असत् - जश्त्वसन्धिः

▶ समासः
न अन्तः विद्यते यस्य सः - अनन्तः - नञ्बहुव्रीहिः
देवानाम् ईशः - देवेशः - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप ॥ ११.३८॥

पदच्छेदः
त्वम् आदिदेवः पुरुषः पुराणः त्वम् अस्य विश्वस्य परं निधानम् वेत्ता असि वेद्यं च परं च धाम त्वया ततं विश्वम् अनन्तरूप

पदपरिचयः
आदिदेवः - अकार पु प्र एक
पुरुषः - अकार पु प्र एक
पुराणः - अकार पु प्र एक
विश्वस्य - अकार नपु ष एक
परं - अकार नपु प्र एक
निधानम् - अकार नपु प्र एक
वेत्ता - ऋकार पु प्र एक
वेद्यं - अकार नपु प्र एक
धाम - नकार नपु प्र एक
ततं - अकार नपु प्र एक
विश्वम् - अकार नपु प्र एक
अनन्तरूप - अकार पु सं प्र

पदार्थः
आदिदेवः - प्रथमदेवः
पुरुषः - पुरुषः

Downloaded from www.omkaravidya.com

पुराणः - चिरन्तनः
विश्वस्य - भुवनस्य
परं - प्रकृष्टम्
निधानम् - अधिकरणम्
वेत्ता - वेदिता
वेद्यं - वेदनार्हम्
धाम - पदं
ततं - व्याप्तम्
अनन्तरूप - अगण्यरूप

अन्वयः
हे अनन्तरूप! त्वम् आदिदेवः पुराणः पुरुषः । त्वम् अस्य विश्वस्य परं निधानम् वेत्ता असि वेद्यं च परं धाम च (असि) । त्वया विश्वम् ततम् ।

व्याकरणम्
▶ सन्धिः
पुराणः + त्वम् - विसर्गसकारः
वेत्ता + असि - सवर्णदीर्घसन्धिः

▶ समासः
देवानाम् आदि - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥११.३९॥

पदच्छेदः
वायुः यमः अग्निः वरुणः शशाङ्कः प्रजापतिः त्वम् प्रपितामहः च नमः नमः
अस्तु सहस्रकृत्वः पुनः च भूयः अपि नमः  नमः ते अस्तु

पदपरिचयः
वायुः - उकार पु प्र एक
यमः - अकार पु प्र एक
अग्निः - इकार पु प्र एक
वरुणः - अकार पु प्र एक
शशाङ्कः-अकार पु प्र एक
प्रजापतिः - इकार पु प्र एक
प्रपितामहः -अकार पु प्र एक
नमः  - अव्ययम्
अस्तु - लोट् प्रपु एक
सहस्रकृत्वः -- अव्ययम्
भूयः - अव्ययम्
नमः - अव्ययम्

पदार्थः
वायुः - अनिलः
यमः - अन्तकः

Downloaded from www.omkaravidya.com

अग्निः - हुताशनः
वरुणः -प्रचेताः
शशाङ्कः - चन्द्रः
प्रजापतिः - ब्रह्मा
प्रपितामहः -ब्रह्मणः पिता
नमः  - नमस्कारः
अस्तु - अस्तु
सहस्रकृत्वः -सहस्रवारम्
भूयः - पुनः
नमः - नमस्कारः

अन्वयः
त्वम् वायुः यमः अग्निः वरुणः शशाङ्कः प्रजापतिः प्रपितामहः च ।
ते  सहस्रकृत्वः नमः नमः अस्तु ते । पुनः च भूयः अपि ते नमः  नमः ।

व्याकरणम्
▶ सन्धिः
वायुः +  यमः - विसर्गरेफः
यमः + अग्निः- विसर्गउकारः
अग्निः + वरुणः - विसर्गरेफः
प्रजापतिः + त्वम् - विसर्गसकारः
प्रपितामहः + च - विसर्गसकारः
नमः + नमः - विसर्गउकारः
नमः + ते - विसर्गसकारः
ते + अस्तु - पूर्वरूपसन्धिः
पुनः + च - विसर्गसकारः
नमः +  नमः:- विसर्गउकारः
नमः + ते - विसर्गसकारः

Downloaded from www.omkaravidya.com

मूलश्लोकः

नम: पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्व: ॥११.४०॥

पदच्छेदः
नम: पुरस्तात् अथ पृष्ठत: ते नम: अस्तु ते सर्वत: एव सर्व
अनन्तवीर्यामितविक्रम: त्वम् सर्वं समाप्नोषि तत: असि सर्व:

पदपरिचयः
नम: - अव्ययम्
पुरस्तात् - - अव्ययम्
पृष्ठत: - अव्ययम्
नम: - अव्ययम्
अस्तु - लोट् प्रपु एक
सर्वत: - अव्ययम्
सर्व - अकार पु सं प्र
अनन्तवीर्यामितविक्रम: - अकार पु प्र एक
सर्वं - अकार पु द्वि एक
समाप्नोषि - लट् मपु एक
असि - लोट् मपु एक
सर्व: - अकार पु प्र एक

पदार्थः
नम: - नमस्कार:
पुरस्तात् - पूर्वस्यां दिशि

Downloaded from www.omkaravidya.com

पृष्ठतः - पश्चात्
नमः - नमस्कारः
अस्तु - भवतु
सर्वतः - सर्वत्र
सर्व - हे सर्व!
अनन्तवीर्यामितविक्रमः - अपरिमितागणितपराक्रमः
सर्वं - सकलम्
समाप्नोषि - व्याप्नोषि
असि - असि
सर्वः - सर्वस्वरूपः

अन्वयः
पुरस्तात् नमः अथ पृष्ठतः ते नमः अस्तु । ते सर्वतः एव (नमः) । हे सर्व ! अनन्तवीर्यामितविक्रमः त्वम् सर्वं समाप्नोषि । ततः सर्वः असि ।

व्याकरणम्
▶ सन्धिः
पुरस्तात् + अथ - जश्त्वसन्धिः
पृष्ठतः + ते - विसर्गसकारः
नमः + अस्तु - विसर्गउकारः
सर्वतः + एव - विसर्गलोपः
अनन्तवीर्यामितविक्रमः +त्वम् - विसर्गसकारः
ततः + असि - विसर्गउकारः

▶ समासः
अमितः विक्रमः यस्य सः - अमितविक्रमः - समानाधिकरणबहुव्रीहिसमासः
अनन्तं वीर्यं यस्य सः - अनन्तवीर्यः समानाधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

मूलश्लोकः

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥ ११.४१॥

यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ।
एकोऽथवाप्यच्युत तत्समक्षं तत् क्षामये त्वामहमप्रमेयम् ॥ ११.४२॥

पदच्छेदः
सखा इति मत्वा प्रसभं यत् उक्तं हे कृष्ण हे यादव हे सखे इति अजानता महिमानं तव इदं मया प्रमादात् प्रणयेन वा अपि यत् च अवहासार्थम् असत्कृत: असि विहारशय्यासनभोजनेषु एक: अथवा अपि अच्युत तत् समक्षं तत् क्षामये त्वाम् अहम् अप्रमेयम्

पदपरिचयः
सखा - इकार पु प्र एक
मत्वा - क्त्वान्तम्
प्रसभं - अव्ययम्
उक्तं - अकार नपु प्र एक
कृष्ण - अकार पु सं प्र
यादव - अकार पु सं प्र
सखे - आकार पु सं प्र
अजानता - तकार पु तृ एक
महिमानं - नकार पु द्वि एक
प्रमादात् -अकार पु प एक
प्रणयेन - अकार पु तृ एक

Downloaded from www.omkaravidya.com

अवहासार्थम्  - अव्ययम्
असत्कृतः - अकार पु प्र एक
विहारशय्यासनभोजनेषु - अकार नपु स बहु
एकः - अकार पु प्र एक
अच्युत  - अकार पु सं प्
समक्षं   - अव्ययम्
क्षामये - क्षम + णिच् उपु एक
अप्रमेयम् - अकार नपु द्वि एक

पदार्थः
सखा  - स्नेहितः
मत्वा - ज्ञात्वा
प्रसभं अभिभूय
उक्तं -उक्तम्
कृष्ण - हे कृष्ण
यादव - हे यादव
सखे - हे स्नेहित
अजानता - अज्ञानिना
महिमानं - माहात्म्यम्
प्रमादात् - विक्षिप्तचित्ततया
प्रणयेन - स्वस्नेहनिमित्तेन
अवहासार्थम् - परिहासप्रयोजनाय
असत्कृतः - परिभूतः
विहारशय्यासनभोजनेषु - विहारशय्यासनभोजनेषु
एकः - व्यस्तः
अच्युत  - कृष्ण
समक्षं  - प्रत्यक्षम्
क्षामये  - क्षमां कारये

Downloaded from www.omkaravidya.com

अप्रमेयम् - प्रमाणातीतम्

अन्वयः

मया यत् प्रसभं उक्तं हे कृष्ण हे यादव हे सखे इति यत् च विहारशय्यासनभोजनेषु
एक: अथवा तत् समक्षं अपि अवहासार्थम् असत्कृत: असि । तत् अप्रमेयम् त्वाम् अहम् क्षामये ।

व्याकरणम्

▶ सन्धिः

सखा + इति - गुणसन्धि:

यत् + उक्तं - जश्त्वसन्धि:

सखे + इति - आर्षम्

तव + इदं - गुणसन्धि:

वा + अपि - सवर्णदीर्घसन्धि:

यत् + च - श्चुत्वसन्धि:

च + अवहासार्थम् - सवर्णदीर्घसन्धि:

असत्कृत: + असि - विसर्गउकार: पूर्वरूपसन्धि:

एक: + अथवा विसर्गउकार:

वा +अपि - सवर्णदीर्घसन्धि:

अपि + अच्युत - यण्सन्धि:

▶ समासः

विहार: च शय्या च आसनम् च भोजनं च - विहारशय्यासनभोजनेषु- इतरेतरद्वन्द्वसमास:

▶ कृदन्ता:

मत्वा - मन + क्त्वा प्रत्यय:

उक्तम् - वच् + क्त प्रत्यय:

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्योलोकत्रयेऽप्यप्रतिमप्रभाव ॥११.४३॥

पदच्छेदः
पिता असि लोकस्य चराचरस्य त्वम् अस्य पूज्यः च गुरुः गरीयान्
न त्वत् समः अस्ति अभ्यधिकः कुतः अन्यः लोकत्रये अपि अप्रतिमप्रभाव

पदपरिचयः
पिता - ऋकार पु प्र एक
लोकस्य - अकार पु ष एक
चराचरस्य - अकार पु ष एक
पूज्यः - अकार पु प्र एक
गुरुः - उकार पु प्र एक
गरीयान् - सकार पु प्र एक
समः - अकार पु प्र एक
अभ्यधिकः - अकार पु प्र एक
अन्यः - अकार पु प्र एक
लोकत्रये - अकार नपु स एक
अप्रतिमप्रभाव - अकार पु सं प्र

पदार्थः
पिता - जनकः
लोकस्य - भुवनस्य

Downloaded from www.omkaravidya.com

चराचरस्य - चराचरस्य
पूज्यः - पूजार्हः
गुरुः - गुरुः
गरीयान्  - गुरुतरः
समः - तुल्यः
अभ्यधिकः - अभ्यधिकः
अन्यः - इतरः
लोकत्रये  -भुवनत्रये
अप्रतिमप्रभाव - निरतिशयप्रभाव

अन्वयः
हे अप्रतिमप्रभाव ! त्वं चराचरस्य अस्य लोकस्य पिता  पूज्यः गुरुः गरीयान् च असि । लोकत्रये अपि त्वत् समः न अस्ति ।  अभ्यधिकः  अन्यः कुतः ।
व्याकरणम्
▶ सन्धिः
पिता + असि - सवर्णदीर्घसन्धिः
गुरुः + गरीयान्  - विसर्गरेफः
समः + अस्ति - विसर्गउकारः
कुतः + अन्यः - विसर्गउकारः पूर्वरूपसन्धिः
अन्यः + लोकत्रये विसर्गउकारः
लोकत्रये + अपि - पूर्वरूपसन्धिः
अपि + अप्रतिमप्रभाव - यण्सन्धिः

Downloaded from www.omkaravidya.com

मूलश्लोकः

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥ ११.४४॥

पदच्छेदः
तस्मात् प्रणम्य प्रणिधाय कायं प्रसादये त्वाम् अहम् ईशम् ईड्यम् पिता इव पुत्रस्य सखा इव सख्युः प्रियः प्रियायाः अर्हसि देव सोढुम्

पदपरिचयः
प्रणम्य - ल्यबन्तम्
प्रणिधाय ल्यबन्तम्
कायं - अकार पु प्र एक
प्रसादये - लट् उपु एक
ईशम् - अकार पु द्वि एक
ईड्यम् - अकार पु द्वि एक
पुत्रस्य - अकार पु ष एक
सखा - इकार पु प्र एक
सख्युः - इकार पु ष एक
प्रियः - अकार पु प्र एक
प्रियायाः आकार स्त् ष एक
अर्हसि - लट् मपु एक
देव - अकार पु सं प्र
सोढुम् - तुमुनन्तम्

पदार्थः

Downloaded from www.omkaravidya.com

प्रणम्य - नत्वा
प्रणिधाय - निपात्य
कायं - शरीरम्
प्रसादये - प्रसादं कारये
ईशम् - स्वामिनम्
ईड्यम् - स्तुत्यम्
पुत्रस्य -पुत्रस्य
सखा - स्नेहित:
सख्यु: - स्नेहितस्य
प्रिय: - प्रिय: प्रियाया: - प्रियाया:
अर्हसि – शक्नोषि देव - कृष्ण
सोढुम् - प्रसहितुम्

अन्वयः
तस्मात् ईशम् ईड्यम् त्वां अहं कायं प्रणिधाय प्रणम्य प्रसादये । हे देव! (यथा) पुत्रस्य (अपराधम्) पिता (सहते) इव सख्यु: (अपराधम्) सखा (सहते) इव प्रियाया: (अपराधम्) प्रिय: ( सहते इव) (तथा) सोढुम् अर्हसि ।

व्याकरणम्
▶ सन्धिः
पिता + इव - गुणसन्धि:
सखा + इव - गुणसन्धि:
प्रियाया: + अर्हसि - आर्षप्रयोग:

▶ कृदन्ता:
प्रणम्य - प्र + नम् + ल्यप् प्रत्यय:
प्रणिधाय - प्र + नि + धा + ल्यप् प्रत्यय:

Downloaded from www.omkaravidya.com

मूलश्लोकः

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥ ११.४५॥

पदच्छेदः

अदृष्टपूर्वं हृषितः अस्मि दृष्ट्वा भयेन च प्रव्यथितं मनः मे तत् एव मे दर्शय देवरूपं प्रसीद देवेश जगन्निवास

पदपरिचयः
अदृष्टपूर्वं - अकार नपु द्वि एक
हृषितः - अकार पु प्र एक
दृष्ट्वा - क्त्वान्तम्
भयेन - अकार नपु तृ एक
प्रव्यथितं - अकार नपु प्र एक
मनः - सकार नपु प्र एक
दर्शय - लोट् मपु एक
देव - अकार पु सं प्र
रूपं - अकार नपु द्वि एक
प्रसीद - लोट् मपु एक
देवेश - अकार पु सं प्र
जगन्निवास - अकार पु सं प्र

पदार्थः
अदृष्टपूर्वं - न कदाचित् दृष्टपूर्वम्
हृषितः -सन्तुष्टः

Downloaded from www.omkaravidya.com

दृष्ट्वा - अवलोक्य
भयेन - भीत्या
प्रव्यथितं - व्याकुलम्
मनः -मनः
दर्शय - दर्शय
देव - हे देव
रूपं - पूर्वं दृष्टरूपम्
प्रसीद - प्रसन्नं कुरु
देवेश - सुराधिप
जगन्निवास - लोकनिकेतन

अन्वयः
अदृष्टपूर्वं दृष्ट्वा हृषितः अस्मि । भयेन च मे मनः प्रव्यथितं । हे देव! हे देवेश! हे जगन्निवास ! तत् रूपं एव मे दर्शय । प्रसीद ।

व्याकरणम्
▶ सन्धिः
हृषितः + अस्मि - विसर्गउकारः पूर्वरूपसन्धिः
मनः + मे - विसर्गउकारः
तत् + एव - जश्त्वसन्धिः

▶ समासः
देवानाम् ईशः - देवेशः
दृष्टं पूर्वं यस्य तत् - दृष्टपूर्वम् - समानाधिकरणबहुव्रीहिसमासः
न दृष्टपूर्वम् - अदृष्टपूर्वम् - नञ्तत्पुरुषः

▶ कृदन्ताः
हृषितः - हृष् + क्तप्रत्ययः
प्रव्यथितम् - प्र + व्यथ् + क्तप्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ११.४६॥

पदच्छेदः
किरीटिनं गदिनं चक्रहस्तम् इच्छामि त्वां द्रष्टुम् अहं तथा एव तेन एव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते

पदपरिचयः
किरीटिनं - नकार पु द्वि एक
गदिनं- नकार पु द्वि एक
चक्रहस्तम् - अकार पु द्वि एक
इच्छामि - लट् उपु एक
द्रष्टुम् - तुमुनन्तम्
रूपेण - अकार नपु तृ एक
चतुर्भुजेन -अकार पु तृ एक
सहस्रबाहो - उकार पु सं प्र
भव - लोट् मपु एक
विश्वमूर्ते - इकार पु सं प्र

पदार्थः
किरीटिनं - किरीटवन्तम्
गदिनं - गदावन्तम्
चक्रहस्तम् - चक्रपाणिम्

Downloaded from www.omkaravidya.com

द्रष्टुम् - अवलोकितुम्
इच्छामि - अभिलषामि
रूपेण - वसयदेवपुत्ररूपेण
चतुर्भुजेन - चतुर्भुजेन
सहस्रबाहो - हे सहस्रबाहो
भव - वर्तस्व
विश्वमूर्ते - विश्वाकार

अन्वयः
हे विश्वमूर्ते अहं किरीटिनं गदिनं चक्रहस्तम् त्वां तथा एव द्रष्टुम् इच्छामि । हे सहस्रबाहो ! चतुर्भुजेन तेन रूपेण एव भव ।

व्याकरणम्
▶ सन्धिः
तथा + एव - वृद्धिसन्धिः
तेन + एव - वृद्धिसन्धिः

▶ समासः
चक्रं हस्ते यस्य सः - चक्रहस्तः - व्यधिकरणबहुव्रीहिसमासः - तम्
सहस्रः बाहवः यस्य सः -समानाधिकरणबहुव्रीहिसासः
विश्वं मूर्तिः यस्य सः - विश्वमूर्तिः - समानाधिकरणबहुव्रीहिसासः

▶ कृदन्ताः
द्रष्टुम् - दृश् + तुमुनन्तम्

Downloaded from www.omkaravidya.com

मूलश्लोकः

श्री भगवानुवाच
मया प्रसन्नेन तवार्जुनेदंरूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ ११.४७॥

पदच्छेदः
श्री भगवानुवाच
मया प्रसन्नेन तव अर्जुन इदं रूपं परं दर्शितम् आत्मयोगात् तेजोमयं विश्वम् अनन्तम् आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम्

पदपरिचयः
प्रसन्नेन - अकार पु तृ एक
अर्जुन - अकार पु सं प्र
रूपं - अकार नपु प्र एक
परं - अकार नपु प्र एक
दर्शितम् - अकार नपु प्र एक
आत्मयोगात् - अकार पु प एक
तेजोमयं - अकार नपु प्र एक
विश्वम् - अकार नपु प्र एक
अनन्तम् - अकार नपु प्र एक
आद्यं - अकार नपु प्र एक
त्वदन्येन - अकार पु तृ एक
दृष्टपूर्वम् - अकार नपु प्र एक

पदार्थः

Downloaded from www.omkaravidya.com

प्रसन्नेन - प्रशान्तेन
अर्जुन - हे अर्जुन
रूपं - विश्वरूपम्	परं - उत्तमम्
दर्शितम् - प्रदर्शितम्
आत्मयोगात् - स्वैस्वर्यसमार्च्यात्
तेजोमयं – कान्तिमयं	विश्वम् - समस्तम्
अनन्तम् - अन्तरहितम्
आद्यं - प्रथमम्
त्वदन्येन - केनचित् त्वत्तः अन्येन
दृष्टपूर्वम् - पूर्वम् अवलोकितम्

अन्वयः
श्री भगवानुवाच
हे अर्जुन! इदं मे परं तेजोमयं विश्वम् अनन्तम् आद्यं रूपं यत् त्वदन्येन न दृष्टपूर्वम् प्रसन्नेन मया आत्मयोगात् तव दर्शितम् ।

व्याकरणम्
▶ सन्धिः
तव + अर्जुन - सवर्णदीर्घसन्धिः
अर्जुन + इदम् - गुणसन्धिः
यत् + मे - अनुनासिकासन्धिः

▶ समासः
आत्मनः योगः - आत्मयोगः - षष्ठीतत्पिरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥११.४८॥

पदच्छेदः
न वेदयज्ञाध्ययनैः न दानैः न च क्रियाभिः न तपोभिः उग्रैः एवंरूपः शक्यः अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर

पदपरिचयः
वेदयज्ञाध्ययनैः - अकार पु तृ बहु
दानैः - अकार नपु तृ बहु
क्रियाभिः- अकार स्त्री तृ बहु
तपोभिः सकार नपु तृ बहु
उग्रैः - अकार पु तृ बहु
एवंरूपः - अकार पु प्र एक
शक्यः - अकार पु प्र एक
नृलोके - अकार पु स एक
द्रष्टुं - तुमुनन्तम्
त्वदन्येन - अकार पु तृ एक
कुरुप्रवीर - अकार पु सं प्र

पदार्थः
वेदयज्ञाध्ययनैः - वेदयज्ञशास्त्राभ्यासैः
दानैः - वितरणैः
क्रियाभिः - कर्माचरणैः

Downloaded from www.omkaravidya.com

तपोभिः - चान्द्रायणादिभिः
उग्रैः - घोरैः
एवंरूपः - ईदृशरूपविशिष्टः
शक्यः - शक्यः
नृलोके - मनुष्यलोके
द्रष्टुं - अवलोकितुम्
त्वदन्येन -त्वदन्येन
कुरुप्रवीर - कुरुश्रेष्ठ

अन्वयः
हे कुरुप्रवीर ! नृलोके त्वदन्येन एवंरूपः अहं वेदयज्ञाध्ययनैः द्रष्टुं न शक्यः दानैः न क्रियाभिः न उग्रैः तपोभिः न (शक्यः) ।

व्याकरणम्
▶ सन्धिः
वेदयज्ञाध्ययनैः+ न - विसर्गरेफः
दानैः + न विसर्गरेफः
क्रियाभिः+ न - विसर्गरेफः
तपोभिः+ उग्रैः - विसर्गरेफः
शक्यः + अहं - आर्षसन्धिः

▶ समासः
वेदाः च यज्ञाः च वेदयज्ञाः - द्वन्द्वसमासः
वेदयज्ञानाम् अध्ययनानि -तैः - वेदयज्ञाध्ययनैः - षष्ठीतत्पुरुषः
एवं रूपं यस्य सः - एवंरूपः - समानाधिकरणबहुव्रीहिसमासः
कुरूणाम् प्रवीरः - कुरुप्रवीरः - षष्ठीतत्पुरुषः

▶ कृदन्ताः द्रष्टुम् - दृश् + तुमुन् प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥ ११.४९॥

पदच्छेदः
मा ते व्यथा मा च विमूढभावः दृष्ट्वा रूपं घोरम् ईदृक् मम इदम्
व्यपेतभीः प्रीतमनाः पुनः त्वम् तत् एव मे रूपम् इदं प्रपश्य

पदपरिचयः
व्यथा - आकार स्त्री प्र एक
विमूढभावः - अकार पु प्र एक
दृष्ट्वा - क्त्वान्तम्
रूपं - अकार नपु द्वि एक
घोरम् - अकार नपु द्वि एक
ईदृक्- शकार नपु द्वि एक
व्यपेतभीः - ईकार पु प्र एक
प्रीतमनाः - सकार पु प्र एक
रूपम् - अकार नपु द्वि एक
प्रपश्य - लोट् मपु एक

पदार्थः
व्यथा - भयं
विमूढभावः - विमूढचित्तता
दृष्ट्वा - उपलभ्य

Downloaded from www.omkaravidya.com

रूपं - विश्वरूपम्
घोरम् - भयङ्करम्
ईदृक् - ईदृशम्
व्यपेतभीः - विगतभयः
प्रीतमनाः - सन्तुष्टचित्तः
रूपम् - रूपम्
प्रपश्य - पश्य

अन्वयः
ईदृक् घोरम्  मम इदम् रूपं दृष्ट्वा ते व्यथा मा च विमूढभावः  मा च । त्वम् व्यपेतभीः प्रीतमनाः मे तत् इदं रूपमेव  पुनः प्रपश्य ।

व्याकरणम्
▶ सन्धिः
विमूढभावः + दृष्ट्वा - विसर्गउकारः
ईदृक् + मम - अनुनासिकासन्धिः
पुनः + त्वम् - विसर्गसकारः
तत् + एव - जश्त्वसन्धिः
▶ समासः
प्रीतं मनः यस्य सः - प्रीतमनाः - समानाधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

मूलश्लोकः

सञ्जय उवाच
इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूय: ।
आश्वासयामास च भीतमेनं भूत्वा पुन: सौम्यवपुर्महात्मा ॥११.५०॥

पदच्छेदः
सञ्जय उवाच
इति अर्जुनं वासुदेव: तथा उक्त्वा स्वकं रूपं दर्शयामास भूय: आश्वासयामास च भीतम् एनं भूत्वा पुन: सौम्यवपु: महात्मा

पदपरिचयः
अर्जुनं - अकार पु द्वि एक
वासुदेव: - अकार पु प्र एक
उक्त्वा - क्त्वान्तम्
स्वकं- अकार नपु द्वि एक
रूपं - अकार नपु द्वि एक
दर्शयामास - दृश् + लिट् प्रपु एक
आश्वासयामास - आ + श्वस् + लिट् प्रपु एक
भीतम् - अकार पु द्वि एक
भूत्वा - क्त्वान्तम्
सौम्यवपु: - सकार नपु प्र एक
महात्मा - नकार पु प्र एक

पदार्थः
अर्जुनं - अर्जुनम्

Downloaded from www.omkaravidya.com

वासुदेवः - कृष्णः
उक्त्वा - कथयित्वा
स्वकं – स्वीयम्  रूपं - आकारम्
दर्शयामास - दर्शितवान्
आश्वासयामास - आश्वासितवान्
भीतम् - भयग्रस्तम्
भूत्वा - भूत्वा
सौम्यवपुः - प्रसन्नदेहः
महात्मा -महात्मा

अन्वयः
सञ्जय उवाच
वासुदेवः अर्जुनं इति उक्त्वा तथा स्वकं रूपं भूयः दर्शयामास । महात्मा सौम्यवपुः भूत्वा भीतम् एनं पुनः आश्वासयामास च ।

व्याकरणम्
▶ सन्धिः
इति + अर्जुनम् - यण्सन्धिः
वासुदेवः + तथा - विसर्गसकारः
तथा + उक्त्वा - गुणसन्धिः
सौम्यवपुः + महात्मा - विसर्गरेफः

▶ समासः
सौम्यं च तत् वपुः च - सौम्यवपुः - विशेषणपूर्वपदकर्मधारयसमासः

▶ कृदन्ताः
उक्त्वा - वच् + क्त्वा प्रत्ययः
भूत्वा - भू + क्त्वा प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

अर्जुन उवाच
दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥११.५१॥

पदच्छेदः
अर्जुन उवाच
दृष्ट्वा इदं मानुषं रूपं तव सौम्यं जनार्दन इदानीम् अस्मि संवृत्तः सचेताः प्रकृतिं गतः

पदपरिचयः
दृष्ट्वा - क्त्वान्तम्
इदं - अकार नपु द्वि एक
मानुषं - अकार नपु द्वि एक
रूपं - अकार नपु द्वि एक
सौम्यं - अकार नपु द्वि एक
जनार्दन - अकार पु सं प्र
संवृत्तः - अकार पु प्र एक
सचेताः -सकार पु प्र एक
प्रकृतिं - इकार स्त्री द्वि एक
गतः - अकार पु प्र एक

पदार्थः
दृष्ट्वा - अवलोक्य
मानुषं - पौरुषम्

Downloaded from www.omkaravidya.com

रूपं - सामान्यरूपम्
सौम्यं -प्रसन्नम्
जनार्दन - कृष्ण
संवृत्तः - सञ्जातः
सचेताः - प्रसन्नचित्तः
प्रकृतिं - स्वभावम्                    गतः - प्राप्तः
अन्वयः
अर्जुन उवाच
हे जनार्दन! इदं तव सौम्यं मानुषं रूपं दृष्ट्वा इदानीम् सचेताः संवृत्तः अस्मि । प्रकृतिं गतः ।

व्याकरणम्
▶ सन्धिः
दृष्ट्वा + इदम् - गुणसन्धिः

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः
श्रीभगवानुवाच
सुदर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥११.५२॥

पदच्छेदः
सुदर्शम् इदं रूपं दृष्टवान् असि यत मम देवाः अपि अस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः

Downloaded from www.omkaravidya.com

पदपरिचयः
सुदर्शम् - अकार नपु द्वि एक
रूपं - - अकार नपु द्वि एक
दृष्टवान् - तकार पु प्र एक
देवाः  - अकार पु प्र बहु
अस्य - मकार नपु ष एक
रूपस्य - अकार नपु ष एक
नित्यं - अव्ययम्
दर्शनकाङ्क्षिणः - नकार पु प्र बहु

पदार्थः

सुदर्शम् - सुष्ठु दुःखेन दर्शनम्
रूपं - विश्वरूपम्
दृष्टवान् - अवलोकितवान्
देवाः  - सुराः
अस्य - अस्य
रूपस्य - विश्वरूपस्य
नित्यं - सर्वदा
दर्शनकाङ्क्षिणः - ईक्षणासक्ताः

अन्वयः
श्रीभगवानुवाच
सुदर्शम् यत् इदं मम रूपं दृष्टवान् असि  अस्य रूपस्य देवाः  अपि नित्यं दर्शनकाङ्क्षिणः ।

व्याकरणम्
▶ सन्धिः

Downloaded from www.omkaravidya.com

यत् + मम - अनुनासिकासन्धिः
देवाः + अपि - विसर्गलोपः
अपि + अस्य - यण्सन्धिः

श्रीमद्भगवद्गीता - एकादशोऽध्यायः - विश्वरूपदर्शनयोगः

मूलश्लोकः

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ११.५३॥

पदच्छेदः
न अहं वेदैः न तपसा न दानेन न च इज्यया शक्यः एवंविधः द्रष्टुं दृष्टवान् असि मां यथा

पदपरिचयः
वेदैः - अकार पु तृ बहु
तपसा - सकार नपु तृ एक
दानेन - अकार नपु तृ एक
इज्यया - आकार स्त्री तृ एक
शक्यः - अकार पु प्र एक
एवंविधः - अकार पु प्र एक
द्रष्टुं - तुमुनन्तम्
दृष्टवान् - क्तवतन्तम्

पदार्थः

Downloaded from www.omkaravidya.com

वेदैः - ऋग्यजुःसामाथर्ववेदैः
तपसा - उग्रेण चान्द्रायणादिना
दानेन - गोभूहिरण्यादिना
इज्यया - यज्ञेन पूजया
शक्यः - शक्यः
एवंविधः -एवंप्रकारः
द्रष्टुं - अवलोकितुम्
दृष्टवान् - अवलोकितवान्

अन्वयः
न वेदैः न तपसा न दानेन न च इज्यया अहं एवंविधः द्रष्टुं शक्यः यथा मां दृष्टवान् असि ।

व्याकरणम्
▶ सन्धिः
न + अहं - सवर्णदीर्घसन्धिः
वेदैः + न - विसर्गरेफः
शक्यः + एवंविधः - विसर्गलोपः
एवंविधः + द्रष्टुम् - विसर्गउकारः

Downloaded from www.omkaravidya.com

मूलश्लोकः

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ ११.५४॥

पदच्छेदः
भक्त्या तु अनन्यया शक्यः अहम् एवंविधः अर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप

पदपरिचयः
भक्त्या - इकार स्त्री तृ एक
अनन्यया - आकार स्त्री तृ एक
शक्यः - अकार पु प्र एक
एवंविधः - अकार पु प्र एक
अर्जुन - अकार पु सं प्र
ज्ञातुं - तुमुनन्तम्
द्रष्टुं - तुमुनान्तम्
तत्त्वेन - अकार नपु तृ एक
प्रवेष्टुं तुमुनान्तम्
परंतप - अकार पु सं प्र

पदार्थः
भक्त्या - प्रेम्णा
अनन्यया - अपृथग्भूतया
शक्यः - अर्हः

Downloaded from www.omkaravidya.com

एवंविधः - एवंप्रकारः
अर्जुन - हे अर्जुन
ज्ञातुं -वेदितुं
द्रष्टुं - अवलोकितुम्
तत्त्वेन - तत्त्वतः
प्रवेष्टुं - मोक्षं गन्तुम्
परंतप - - हे अर्जुन

अन्वयः
हे परंतप ! हे अर्जुन! अनन्यया भक्त्या तु अहम् एवंविधः तत्त्वेन ज्ञातुं द्रष्टुं च प्रवेष्टुं च शक्यः ।

व्याकरणम्
▶ सन्धिः
तु + अनन्या - यण्सन्धिः
शक्यः + अहं - आर्षम्
एवंविधः + अर्जुन - विसर्गउकारः पूर्वरूपसन्धिः

▶ समासः
अनन्यया - न अन्यया - नञ्तत्पुरुषः

▶ कृदन्ताः
ज्ञातुम् - ज्ञा + तुमुनन्तम्
प्रवेष्टुम् - प्र + विश् + तुमुनन्तम्

Downloaded from www.omkaravidya.com

मूलश्लोकः

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥ ११.५५॥

पदच्छेदः
मत्कर्मकृत् मत्परमः मद्भक्तः सङ्गवर्जितः निर्वैरः सर्वभूतेषु यः सः माम् एति पाण्डव

पदपरिचयः
मत्कर्मकृत् - तकार पु प्र एक
मत्परमः - अकार पु प्र एक
मद्भक्तः -अकार पु प्र एक
सङ्गवर्जितः - अकार पु प्र एक
निर्वैरः-अकार पु प्र एक
सर्वभूतेषु - अकार नपु स बहु
एति - लट् प्रपु एक
पाण्डव - अकार पु सं प्र

पदार्थः
मत्कर्मकृत् - मदर्थकर्मकारी
मत्परमः - मन्निष्ठः
मद्भक्तः -मत्सेवकः
सङ्गवर्जितः - सकलविषयाभिमानवर्जितः
निर्वैरः - द्वेषरहितः

Downloaded from www.omkaravidya.com

सर्वभूतेषु -सर्वप्राणिषु

एति - प्राप्नोति

पाण्डव - अर्जुन

अन्वयः

हे पाण्डव! मत्कर्मकृत् मत्परमः मद्भक्तः सङ्गवर्जितः सर्वभूतेषु निर्वैरः  यः सः माम् एति  ।

व्याकरणम्

▶ सन्धिः

मत्कर्मकृत् + मत्परमः - अनुनासिकासन्धिः

मत्परमः + मद्भक्तः - विसर्गउकारः

सः + माम् - विसर्गलोपः

▶ समासः

मदर्थं कर्म मत्कर्म - मत्करम करोति इति मत्कर्मकृत् - उपपदसमासः

अहं परमः यस्य सः - मत्परमः - समानाधिकरणबहुव्रीहिसमासः

सङ्गेन वर्जितः - सङ्गवर्जितः - तृतीयातत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगो नामैकादशोध्यायः ॥ ११ ॥

पदच्छेदः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगः नाम एकादशः अध्यायः

पदपरिचयः
ॐ - अव् धातुः + मन् प्रत्ययः
तत् - दकार. नपु. पु एक
सत् - दकार. नपु. प्र एक
इति - अव्ययम्
श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु
उपनिषत्सु - दकार. स्त्री स बहु
ब्रह्मविद्यायां - आकार. स्त्री स एक
योगशास्त्रे - अकार. नपु. स. एक
श्रीकृष्णार्जुनसंवादे - अकार. पु. स. एक
विश्वरूपदर्शनयोगः- अकार. पु. प्र. एक
नाम - नकार.नपु. प्र एक
एकादशः - अकार. पु. प्र एक
अध्यायः - अकार. पु. प्र एक

पदार्थः
ॐ - ओम्

Downloaded from www.omkaravidya.com

तत् - तत्
सत् - सत्
इति - एवम्
श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु
उपनिषत्सु - उपनिषत्सु
ब्रह्मविद्यायां - ब्रह्म पाठे
योगशास्त्रे - योगशास्त्रे
श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयोः मध्ये संवादे
विश्वरूपदर्शनयोगः - विश्वरूपदर्शनयोगः
नाम - नाम
एकादशः - एकादशः
अध्यायः - अध्यायः

अन्वयः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगः नाम एकादशः अध्यायः (संपूर्णम् भवति) ।

व्याकरणम्
▶सन्धिः
श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः
योगः + नाम - विसर्ग उकारः
एकादशः + अध्यायः - विसर्ग उकारः पूर्वरूपसन्धिः

▶ समासः
ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारयः

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता
# द्वादशोऽध्याय:
# भक्तियोग:

Downloaded from www.omkaravidya.com

मूलश्लोकः

अर्जुन उवाच
एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १२.१॥

पदच्छेदः
अर्जुन उवाच
एवं सततयुक्ताः ये भक्ताः त्वां पर्युपासते ये च अपि अक्षरम् अव्यक्तं तेषां के योगवित्तमाः

पदपरिचयः
सततयुक्ताः - अकार पु प्र बहु
भक्ताः - अकार पु प्र बहु
पर्युपासते - लट् प्रपु एक
अक्षरम् - अकार नपु द्वि एक
अव्यक्तं - अकार नपु द्वि एक
तेषां - दकार पु ष बहु
योगवित्तमाः - अकार पु प्र बहु

पदार्थः
सततयुक्ताः -नित्यसमाहिताः
भक्ताः - आराधकाः
पर्युपासते - ध्यायन्ति
अक्षरम् - निरस्तसर्वोपाथित्वात्
अव्यक्तं - अकरणगोचरम् तेषां - तेषां

Downloaded from www.omkaravidya.com

योगवित्तमाः - अतिशयने योगविदः

अन्वयः
अर्जुन उवाच
ये भक्ताः एवं सततयुक्ताः त्वां पर्युपासते ये च अपि अव्यक्तं अक्षरं (पर्युपासते) तेषां के योगवित्तमाः ?

व्याकरणम्
▶ सन्धिः
सततयुक्ताः + ये - विसर्गलोपः
भक्ताः + त्वाम् - विसर्गसकारः
च + अपि - सवर्णदीर्घसन्धिः
अपि + अक्षरम् - यण्सन्धिः

श्रीमद्भगवद्गीता - द्वादशोऽध्यायः - भक्तियोगः

मूलश्लोकः

श्रीभगवानुवाच_
मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ १२.०२॥

पदच्छेदः
श्री भगवान् उवाच
मयि आवेश्य मनः ये मां नित्ययुक्ताः उपासते श्रद्धया परया उपेताः ते मे युक्ततमाः मताः

Downloaded from www.omkaravidya.com

पदपरिचयः
मयि - दकार त्रि स एक
आवेश्य - ल्यबन्तम्
मनः - सकार नपु द्वि एक
नित्ययुक्ताः - अकार पु प्र बहु
उपासते - लट् प्रपु बहु
श्रद्धया - आकार स्त्री तृ एक
परया - आकार स्त्री तृ एक
उपेताः - अकार पु प्र बहु
युक्ततमाः -अकार पु प्र बहु
मताः - अकार पु प्र बहु

पदार्थः
मयि - परमेश्वरे
आवेश्य - समाधाय
मनः -अन्तःकरणम्
नित्ययुक्ताः -सततसमाहिताः
उपासते - आराधयन्ति
श्रद्धया - आसक्तया
परया - प्रकृष्टया
उपेताः - समन्विताः
युक्ततमाः - योगश्रेष्ठाः
मताः - अभिमताः

अन्वयः
श्री भगवान् उवाच
परया श्रद्धया उपेताः नित्ययुक्ताः ये मनः मयि आवेश्य मां उपासते ते मे युक्ततमाः मताः ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

मयि + आवेश्य - यण्सन्धिः

मनः + ये - विसर्गउकारः

नित्ययुक्ताः + उपासते - विसर्गलोपः

उपेताः + ते - विसर्गसकारः

युक्ततमाः + मताः - विसर्गलोपः

▶ कृदन्ताः

आवेश्य - आ + विश् + ल्यप्

श्रीमद्भगवद्गीता - द्वादशोऽध्यायः - भक्तियोगः

मूलश्लोकः

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ १२.०३॥

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ १२.०४॥

पदच्छेदः

ये तु अक्षरम् अनिर्देश्यम् अव्यक्तं पर्युपासते सर्वत्रगम् अचिन्त्यं च कूटस्थम् अचलं ध्रुवम् सन्नियम्य इन्द्रियग्रामं सर्वत्र समबुद्धयः ते प्राप्नुवन्ति माम् एव सर्वभूतहिते रताः

Downloaded from www.omkaravidya.com

पदपरिचयः

अक्षरम् - अकार नपु द्व एक

अनिर्देश्यम् - अकार नपु द्वि एक

अव्यक्तं - अकार नपु द्वि एक

पर्युपासते - लट् प्रपु बहु

सर्वत्रगम् - अकार नपु द्वि एक

अचिन्त्यं - अकार नपु द्वि एक

कूटस्थम् - अकार नपु द्वि एक

अचलं - अकार नपु द्वि एक

ध्रुवम् - अकार नपु द्वि एक

सन्नियम्य - ल्यबन्तम्

इन्द्रियग्रामं - अकार पु द्वि एक

सर्वत्र - अव्ययम्

समबुद्धयः - इकार पु प्र बहु

प्राप्नुवन्ति लट् प्रपु बहु

सर्वभूतहिते - अकार नपु स एक

रताः - अकार पु प्र बहु

पदार्थः

अक्षरम् -नाशरहितम्

अनिर्देश्यम् - अवर्णनीयम्

अव्यक्तं - इन्द्रियगोचरम्

पर्युपासते - ध्यायन्ति

सर्वत्रगम् - सर्वव्यापिनम् अचिन्त्यं -अप्रमेयम्

कूटस्थम् - निर्विकारम् अधिष्टानत्वेन स्थितम्

अचलं - चलनरहितम्

Downloaded from www.omkaravidya.com

ध्रुवम् - नित्यम्
सन्नियम्य - निग्रहं कृत्वा
इन्द्रियग्रामं - इन्द्रियसमूहम्
सर्वत्र - सर्वस्मिन्
समबुद्धयः - समानचित्ताः
प्राप्नुवन्ति -लभन्ते
सर्वभूतहिते -सकलप्राणिहिते
रताः - आसक्ताः

अन्वयः
इन्द्रियग्रामं सन्नियम्य सर्वत्र समबुद्धयः सर्वभूतहिते रताः ये तु अनिर्देश्यम् अव्यक्तं
अचिन्त्यं कूटस्थम् अचलं ध्रुवम् सर्वत्रगम् अक्षरम् पर्युपासते ते माम् एव प्राप्नुवन्ति ।

व्याकरणम्
▶ सन्धिः
तु + अक्षरम् - यण्सन्धिः

▶ समासः
समा बुद्धिः यस्य सः - समबुद्धिः - समानाधिकरणबहुव्रीहिसमासः
सर्वभूतानाम् हितम् - तस्मिन् - षष्ठीतत्पुरुषः

▶ कृदन्ताः
सन्नियम्य - सम् + नि + यम् + ल्यप् प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ १२.५॥

पदच्छेदः
क्लेशः अधिकतरः तेषाम् अव्यक्तासक्तचेतसाम् अव्यक्ता हि गतिः दुःखं देहवद्भिः अवाप्यते

पदपरिचयः
क्लेशः - अकार पु प्र एक
अधिकतरः - अकार पु प्र एक
अव्यक्तासक्तचेतसाम् - अकार पु ष बहु
अव्यक्ता - आकार स्त्री प्र एक
गतिः - इकार स्त्री प्र एक
दुःखं - अकार नपु द्वि एक
देहवद्भिः - तकार पु तृ बहु
अवाप्यते - लट् प्रपु एक

पदार्थः
क्लेशः - प्रयासः
अधिकतरः - बहुतरः
अव्यक्तासक्तचेतसाम् - अव्यक्तासक्तचेतसाम्
अव्यक्ता - अव्यक्ता
गतिः - स्थानम्
दुःखं - क्लेशेन

Downloaded from www.omkaravidya.com

देहवद्भिः - देहाभिमानवद्भिः
अवाप्यते - प्राप्यते

अन्वयः
तेषाम् अव्यक्तासक्तचेतसाम् क्लेशः अधिकतरः । हि अव्यक्ता गतिः देहवद्भिः दुःखं अवाप्यते ।

व्याकरणम्
▶ सन्धिः
क्लेशः + अधिकतरः -विसर्गउकारः पूर्वरूपसन्धिः
अधिकतरः + तेषाम् - विसर्गसकारः
गतिः + दुःखम् - विसर्गरेफः
देहवद्भिः + अवाप्यते - विसर्गरेफः

▶ समासः
अव्यक्ते असक्तं चेतः यस्य सः - अव्यक्तासक्तचेतसः - व्यधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - द्वादशोऽध्यायः - भक्तियोगः

मूलश्लोकः

ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ १२.०६॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥ १२.०७॥

Downloaded from www.omkaravidya.com

पदच्छेदः
ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्तः उपासते तेषाम् अहं समुद्धर्ता मृत्युसंसारसागरात् भवामि न चिरात् पार्थ मयि आवेशितचेतसाम्

पदपरिचयः
सर्वाणि - अकार नपु द्वि बहु
कर्माणि - अकार नपु द्वि बहु
सन्न्यस्य - ल्यबन्तम्
मत्पराः - अकार पु प्र बहु
अनन्येन - अकार पु तृ एक
योगेन- अकार पु तृ एक
ध्यायन्तः - तकार पु प्र बहु
उपासते - लट् प्रपु बहु
समुद्धर्ता - ऋकार पु प्र एक
मृत्युसंसारसागरात् - अकार पु प्र एक
भवामि - लट् उपु एक
चिरात् - अव्ययम्
पार्थ - अकार पु सं प्र
आवेशितचेतसाम् - अकार पु ष बहु

पदार्थः
सर्वाणि - सकलानि
कर्माणि - कार्याणि
सन्न्यस्य - निग्रहं कृत्वा मत्पराः - मत्मनसः
अनन्येन - केवलेन
योगेन - समाधिना
ध्यायन्तः - चिन्तयन्तः

Downloaded from www.omkaravidya.com

उपासते - पूज्यन्ते
समुद्धर्ता - उद्धारकः
मृत्युसंसारसागरात् -मरणसंसारसमुद्रात्
भवामि - अस्मि
न चिरात् -शीघ्रम्
पार्थ - अर्जुन आवेशितचेतसाम् - प्रवेशितचित्तानाम्

अन्वयः
हे पार्थ! ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्तः उपासते मयि आवेशितचेतसाम् तेषाम् मृत्युसंसारसागरात् अहं न चिरात् समुद्धर्ता भवामि ।

व्याकरणम्
▶ सन्धिः
अनन्येन + एव - वृद्धिसन्धिः
ध्यायन्तः + उपासते - विसर्गलोपः
मयि + आवेशितचेतसाम् -यण्सन्धिः

▶ समासः
अहं परः येषां ते - मत्पराः - समानाधिकरबहुव्रीहिसमासः
आवेशितं चेतः यैः तैः आवेशितचेतसः -समानाधिकरबहुव्रीहिसमासः
संसार एव सागरः - संसारसागरः - अवधारणापूर्वपदकर्मधारयसमासः
मृत्युयुक्तः संसारसागरः - मृत्युसंसारसागरः - मध्यमपदलोपी

Downloaded from www.omkaravidya.com

मूलश्लोकः

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः । १२.०८॥

पदच्छेदः
मयि एव मनः आधत्स्व मयि बुद्धिं निवेशय निवसिष्यसि मयि एव
अतः ऊर्ध्वं न संशयः

पदपरिचयः
मनः - सकार नपु द्वि एक
आधत्स्व - लोट् मपु एक
बुद्धिं - इकार स्त्री द्वि एक
निवेशय - लोट् मपु एक
निवसिष्यसि - लृट् मपु एक
ऊर्ध्वं - अव्ययम्
संशयः - अकार पु प्र एक

पदार्थः
मनः - सङ्कल्पविकल्पात्मकम्
आधत्स्व - स्थापय
बुद्धिं -मतिम्
निवेशय - योजय
निवसिष्यसि - निवत्स्यसि
ऊर्ध्वं -परम्
संशयः - सन्देहः

Downloaded from www.omkaravidya.com

अन्वयः
मयि एव मन: आधत्स्व । मयि बुद्धिं निवेशय ।अत:  ऊर्ध्वं  मयि एव निवसिष्यसि । (अत्र)
न संशय: ।

व्याकरणम्
▶ सन्धिः
मयि + एव - यण्सन्धि:
मन: + आधत्स्व - विसर्गलोप:
अत: + ऊर्ध्वम् - विसर्गलोप:

श्रीमद्भगवद्गीता - द्वादशोऽध्याय: - भक्तियोग:

मूलश्लोकः

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥ १२.९॥

पदच्छेदः
अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् अभ्यासयोगेन ततः माम् इच्छ आप्तुं धनञ्जय

पदपरिचयः
चित्तं - अकार नपु द्वि एक
समाधातुं - सम् + आ+ धा+ तुमुनन्तम्
शक्नोषि - लट् मपु एक

Downloaded from www.omkaravidya.com

स्थिरम् - अकार नपु द्वि एक
अभ्यासयोगेन - अकार पु तृ एक
इच्छ - लोट् मपु एक
आप्तुं - तुमुनन्तम्
धनञ्जय - अकार पु सं प्र

पदार्थः
चित्तं - अन्तः करणम्
समाधातुं - स्थापयितुम्
शक्नोषि - शक्नोषि
स्थिरम् - अचलम्
अभ्यासयोगेन -अभ्यासयोगेन
इच्छ - प्रार्थयस्व
आप्तुं - प्राप्तुम्
धनञ्जय - अर्जुन

अन्वयः
हे धनञ्जय!
अथ चित्तं मयि स्थिरम् समाधातुं न शक्नोषि ततः अभ्यासयोगेन
माम् आप्तुं  इच्छ ।

व्याकरणम्
▶ सन्धिः
ततः + माम् - विसर्गउकारः
इच्छ + आप्तुम् - सवर्णदीर्घसन्धिः

▶ समासः
अभ्यासः एव योगः - अभ्यासयोगः - अवधारणापूर्वपदकर्मधारयसमासः

Downloaded from www.omkaravidya.com

▶ कृदन्ताः
समाधातुम् - सम् + आ + धा + तुमुन् प्रत्ययः
आप्तुम् - आप् + तुमुन् प्रत्ययः

श्रीमद्भगवद्गीता - अथ द्वादशोऽध्यायः - भक्तियोगः

मूलश्लोकः

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥ १२.१०॥

पदच्छेदः
अभ्यासे अपि असमर्थः असि मत्कर्मपरमः भव मदर्थम् अपि कर्माणि कुर्वन् सिद्धिम् अवाप्स्यसि

पदपरिचयः
अभ्यासे - अकार पु स एक
असमर्थः - अकार पु प्र एक
असि - लट् मपु एक
मत्कर्मपरमः - अकार पु प्र एक
भव - लोट् मपु एक
मदर्थम् - अव्ययम
कर्माणि - अकार नपु द्वि बहु
कुर्वन् - तकार पु प्र एक
सिद्धिम् - इकार स्त्री द्वि एक

Downloaded from www.omkaravidya.com

अवाप्स्यसि - लृट् मपु एक

पदार्थः

अभ्यासे - प्रयत्ने

असमर्थः - असक्तः

मत्कर्मपरमः - मदर्थकर्माचरणप्रधानः

भव - तिष्ठ

मदर्थम् - मामुद्दिश्य

कर्माणि - क्रियाः

कुर्वन् - आचरन्

सिद्धिम् - सत्त्वसिद्धिज्ञानप्राप्तिद्वारेण

अवाप्स्यसि - प्राप्स्यसि

अन्वयः

अभ्यासे अपि असमर्थः असि मत्कर्मपरमः भव मदर्थम् कर्माणि कुर्वन् अपि सिद्धिम् अवाप्स्यसि ।

व्याकरणम्

▶ सन्धिः

अभ्यासे + अपि - पूर्वरूपसन्धिः

अपि + असमर्थः - यण्सन्धिः

असमर्थः + असि - विसर्गउकारः पूर्वरूपसन्धिः

मत्कर्मपरमः + भव - विसर्गउकारः

▶ समासः

मम कर्माणि - मत्कर्माणि - षष्ठीतत्पुरुषः

मत्कर्माणि एव परमाणि यस्य सः - मत्कर्मपरमः - समानाधिकरणबहुव्रीहिसमासः

न समर्थः असमर्थः - नञ्तत्पुरुषः

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता - अथ द्वादशोऽध्यायः - भक्तियोगः

मूलश्लोकः

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ १२.११॥

पदच्छेदः
अथ एतत् अपि अशक्तः असि कर्तुं मद्योगम् आश्रितः सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्

पदपरिचयः
अथ - अव्ययम्
अशक्तः - अकार पु प्र एक
असि - लट् मपु एक
कर्तुं - तुमुनन्तम्
मद्योगम् - अकार पु द्वि एक
आश्रितः -अकार पु प्र एक
सर्वकर्मफलत्यागं - अकार पु द्वि एक
कुरु - लोट् मपु एक
यतात्मवान् - तकार पु प्र एक

पदार्थः
अथ - यदि
अशक्तः - असमर्थः
असि - भवसि
कर्तुं - आचरितुम्

Downloaded from www.omkaravidya.com

मद्योगम् - सर्वकर्मसमर्पणम्
आश्रित: - अवलम्बित:
सर्वकर्मफलत्यागं - सकलकर्मसाफलत्यागम्
तत: - अनन्तरम्
कुरु - कुरु
यतात्मवान् - संयतचित्त:

अन्वयः
अथ एतत् अपि कर्तुं अशक्त: असि तत: मद्योगम् आश्रित: यतात्मवान् सर्वकर्मफलत्यागं कुरु ।

व्याकरणम्
▶ सन्धिः
अथ + एतत् - वृद्धिसन्धि:
एतत् + अपि - जश्त्वसन्धि:
अपि + अशक्त: - यण्सन्धि:
अशक्त: + असि - विसर्गउकार: पूर्वरूपसन्धि:

▶ समासः
सर्वाणि कर्माणि - सर्वकर्माणि - विशेषणपूर्वपदकर्मधारयसमास:
सर्वकर्माणां फलम् - सर्वकर्मफलम् - षष्ठीतत्पुरुष:
सर्वकर्मफलस्य त्याग: - सर्वकर्मफलत्याग: षष्ठीतत्पुरुष:

Downloaded from www.omkaravidya.com

मूलश्लोकः

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥१२.१२

पदच्छेदः
श्रेयः हि ज्ञानम् अभ्यासात् ज्ञानात् ध्यानम् विशिष्यते ध्यानात् कर्मफलत्यागः त्यागात् शान्तिः अनन्तरम्

पदपरिचयः
श्रेयः - सकार नपु प्र एक
ज्ञानम् अकार नपु प्र एक
अभ्यासात् - अकार पु प एक
ज्ञानात् - अकार नपु प एज
ध्यानम् - अकार नपु प्र एक
विशिष्यते - कर्मणि प्रपु एक
ध्यानात् - अकार नपु प एक
कर्मफलत्यागः - अकार पु प्र एक
त्यागात् - अकार पु प एक
शान्तिः - इकार स्त्री प्र एक

पदार्थः
श्रेयः - प्रशस्यतरम्
ज्ञानम् - ज्ञानम्
अभ्यासात् - अविवेकपूर्वकात् अभ्यासात्
ज्ञानात् - ज्ञानपूर्वकं

Downloaded from www.omkaravidya.com

ध्यानम् - ध्यानम्  विशिष्यते - अतिशेते
ध्यानात् - ध्यानात्
कर्मफलत्यागः - कर्मफलस्यत्यागः
त्यागात् -  त्यागात्
शान्तिः - उपशमः

अन्वयः
अभ्यासात् ज्ञानम् श्रेयः हि । ज्ञानात् ध्यानम्  विशिष्यते । ध्यानात् कर्मफलत्यागः (श्रेष्ठः) त्यागात्  अनन्तरम् शान्तिः (भवति)

व्याकरणम्
▶ सन्धिः
श्रेयः + हि - विसर्गउकारः
अभ्यासात् +  ज्ञानात् - जश्त्वसन्धिः श्चुत्वसन्धिः
ज्ञानात् + ध्यानम् - जश्त्वसन्धिः
कर्मफलत्यागः + त्यागात् - विसर्गसकारः
त्यागात् + शान्तिः - श्चुत्वसन्धिः छत्वसन्धिः

▶ समासः
कर्मणाम् फलम् - कर्मफलम् - षष्ठीतत्पुरुषः
कर्मफलस्य त्यागः - कर्मफलत्यगः - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - अथ द्वादशोऽध्यायः - भक्तियोगः

मूलश्लोकः

अद्वेष्टा सर्वभूतानाम् मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुः खसुखः क्षमी ॥ १२.१३॥

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १२.१४॥

पदच्छेदः
अद्वेष्टा सर्वभूतानाम् मैत्रः करुणः एव च निर्ममः निरहङ्कारः समदुः खसुखः क्षमी सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः मयि अर्पितमनोबुद्धिः यः मद्भक्तः सः मे प्रियः

पदपरिचयः
अद्वेष्टा - ऋकार पु प्र एक
सर्वभूतानाम् - अकार नपु ष बहु
मैत्रः - अकार पु प्र एक
करुणः- अकार पु प्र एक
निर्ममः - अकार पु प्र एक
निरहङ्कारः - अकार पु प्र एक
समदुःखसुखः- अकार पु प्र एक
क्षमी - नकार पु प्र एक
सन्तुष्टः - अकार पु प्र एक
योगी - नकार पु प्र एक
यतात्मा - नकार पु प्र एक

Downloaded from www.omkaravidya.com

दृढनिश्चयः - अकार पु प्र एक
अर्पितमनोबुद्धिः - इकार पु प्र एक
मद्भक्तः- अकार पु प्र एक
प्रियः- अकार पु प्र एक

पदार्थः
अद्वेष्टा - अवैरी
सर्वभूतानाम् - सकलप्राणिनाम्
मैत्रः- मित्रभावः
करुणः - कृपालुः
निर्ममः - ममप्रत्ययवर्जितः
निरहङ्कारः - अहङ्कारवर्जितः
समदुःखसुखः- क्लेशसन्तीपयोः समानः
क्षमी - क्षमावान्
सन्तुष्टः - तुष्टः
योगी - समाहितचित्तः
यतात्मा - संयतस्वभावः
दृढनिश्चयः - स्थिरनिश्चयः
अर्पितमनोबुद्धिः - निवेशितचित्तः
मद्भक्तः - मम भक्तः
प्रियः - इष्टः

अन्वयः
सर्वभूतानाम् अद्वेष्टा मैत्रः करुणः एव च निर्ममः निरहङ्कारः समदुः खसुखः क्षमी सततं सन्तुष्टः योगी यतात्मा दृढनिश्चयः मयि अर्पितमनोबुद्धिः मद्भक्तः यः सः मे प्रियः ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

करुणः + एव - विसर्गलोपः
निर्ममः + निरहङ्कारः - विसर्गउकारः
मयि + अर्पितमनोबुद्धिः- यण्सन्धिः
अर्पितमनोबुद्धिः + यः - विसर्गरेफः
यः + मद्भक्तः - विसर्गउकारः
सः + मे - विसर्गलोपः

▶ समासः

समे दुः खसुःखे यस्य सः - समदुखःसुखः - समानाधिकरणबहुव्रीहिसमासः
अर्पिते मनोबुद्धिः येन सः - समानाधिकरणबहुव्रीहिसमासः
निगतं ममत्वं यस्मात् सः - निर्ममः - समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - अथ द्वादशोऽध्यायः - भक्तियोगः

मूलश्लोकः

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १२.१५॥

पदच्छेदः

यस्मात् न उद्विजते लोकः लोकात् न उद्विजते च यः हर्षामर्षभयोद्वेगैः मुक्तः यः सः च मे प्रियः

पदपरिचयः

यस्मात् - दकार पु प एक

Downloaded from www.omkaravidya.com

उद्विजते - उत् + विज् + लट् प्रपु एक
लोकः - अकार पु प्र एक
लोकात् - अकार पु प एक
उद्विजते - उत् + विज् + लट् प्रपु एक
हर्षामर्षभयोद्वेगैः - अकार पु तृ बहु
मुक्तः - - अकार पु प्र एक
प्रियः- अकार पु प्र एक

पदार्थः
यस्मात् - यस्मात्
उद्विजते - उद्वेगं गच्छति
लोकः - जनः
लोकात् - जनात्
हर्षामर्षभयोद्वेगैः - सन्तोषसूयात्रासक्षोभैः
मुक्तः -मुक्तः
प्रियः- इष्टः

अन्वयः
यस्मात् लोकः न उद्विजते यः लोकात् न उद्विजते च हर्षामर्षभयोद्वेगैः मुक्तः यः सः च मे प्रियः ।

व्याकरणम्
▶ सन्धिः
यस्मात् + न - अनुनासिकसन्धिः
लोकः + लोकात् - विसर्गउकारः
लोकात् + न - अनुनासिकसन्धिः
हर्षामर्षभयोद्वेगैः + मुक्तः- विसर्गरेफः
सः + च - विसर्गलोपः

Downloaded from www.omkaravidya.com

▶ समासः
हर्षः च अमर्षः च भयं च उद्वेगः च - हर्षामर्षभयोद्वेगाः - इतरेतरद्वन्द्वसमासः

▶ कृदन्ताः
मुक्तः - मुच् + क्त प्रत्ययः

श्रीमद्भगवद्गीता - अथ द्वादशोऽध्यायः - भक्तियोगः

मूलश्लोकः

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १२.१६॥

पदच्छेदः
अनपेक्षः शुचिः दक्षः उदासीनः गतव्यथः सर्वारम्भपरित्यागी यः
मद्भक्तः स मे प्रियः

पदपरिचयः
अनपेक्षः - अकार पु प्र एक
शुचिः - इकार पु प्र एक
दक्षः - अकार पु प्र एक
उदासीनः -अकार पु प्र एक
गतव्यथः - अकार पु प्र एक
सर्वारम्भपरित्यागी - नकार पु प्र एक
मद्भक्तः - अकार पु प्र एक
प्रियः - अकार पु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
अनपेक्षः - निस्पृहः
शुचिः - शुद्धः
दक्षः - समर्थः
उदासीनः - पक्षपातरहितः
गतव्यथः - गतभयः
सर्वारम्भपरित्यागी -सकामकर्मानुष्ठानत्यागी
मद्भक्तः - मम भक्तः
प्रियः - इष्टः

अन्वयः
यः अनपेक्षः शुचिः दक्षः उदासीनः गतव्यथः सर्वारम्भपरित्यागी
च मद्भक्तः सः मे प्रियः

व्याकरणम्
▶ सन्धिः
शुचिः + दक्षः - विसर्गरेफः
दक्षः + उदासीनः - विसर्गलोपः
उदासीनः + गतव्यथः - विसर्गउकारः
यः + मद्भक्तः - विसर्गउकारः
सः + च - विसर्गलोपः

▶ समासः
न अपेक्ष : अनपेक्षः - नञ्तत्पुरुषः
सर्वे आरम्भाः - सर्वारम्भः - कर्मधारयसमासः
सर्वारम्भाणां परित्यागी - सर्वारम्भपरित्यागी - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - द्वादशोऽध्यायः - भक्तियोगः

मूलश्लोकः

योन हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥१२.१७॥

पदच्छेदः
यः न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति शुभाशुभपरित्यागी भक्तिमान् यः सः मे प्रियः

पदपरिचयः
हृष्यति - लट् प्रपु एक
द्वेष्टि - लट् प्रपु एक
शोचति - लट् प्रपु एक
काङ्क्षति - लट् प्रपु एक
शुभाशुभपरित्यागी - नकार पु प्र एक
भक्तिमान् - तकार पु प्र एक
प्रियः - अकार पु प्र एक

पदार्थः
हृष्यति - तुष्यति
द्वेष्टि - द्वेष्टि
शोचति - दुःखं अनुभवति
काङ्क्षति - अभिलषति
शुभाशुभपरित्यागी - इष्टानिष्टकर्मत्यागी
भक्तिमान् - भक्तः

Downloaded from www.omkaravidya.com

प्रिय: - इष्ट:

अन्वयः
य: न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति शुभाशुभपरित्यागी भक्तिमान्  स: मे प्रिय: ।

व्याकरणम्
▶ सन्धिः
य: + न - विसर्गउकार:
स: + मे - विसर्गलोप:

श्रीमद्भगवद्गीता - द्वादशोऽध्याय: - भक्तियोग:

मूलश्लोकः

सम: शत्रौ च मित्रे च तथा मानापमानयो: ।
शीतोष्णसुखदु:खेषु सम: सङ्गविवर्जित: ॥ १२.१८॥

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेत: स्थिरमतिर्भक्तिमान्मे प्रियो नर: ॥ १२.१९॥

पदच्छेदः
सम: शत्रौ च मित्रे च तथा मानापमानयो: शीतोष्णसुखदु:खेषु सम: सङ्गविवर्जित:  तुल्यनिन्दास्तुति: मौनी सन्तुष्ट:  येन केनचित् अनिकेत: स्थिरमति: भक्तिमान् मे  प्रियो नर:

Downloaded from www.omkaravidya.com

पदपरिचयः

समः - अकार पु प्र एक

शत्रौ - उकार पु स एक

मित्रे - अकार नपु स एक

मानापमानयोः - अकार पु स द्वि

शीतोष्णसुखदुःखेषु - अकार नपु स बहु

समः - अकार पु प्र एक

सङ्गविवर्जितः - अकार पु प्र एक

तुल्यनिन्दास्तुतिः- इकार पु प्र एक

मौनी - नकार पु प्र एक

सन्तुष्टः - अकार पु प्र एक

केनचित् - अव्ययम्

अनिकेतः - अकार पु प्र एक

स्थिरमतिः - अकार पु प्र एक

भक्तिमान् - तकार पु प्र एक

प्रियः - अकार पु प्र एक

नरः - अकार पु प्र एक

पदार्थः

समः - तुल्यः

शत्रौ - अरौ

मित्रे - स्नेहिते

मानापमानयोः - पूजापरिभवयोः

शीतोष्णसुखदुःखेषु - शीतोष्णसुखदुःखेषु

समः - तुल्यः

सङ्गविवर्जितः - विषयसङ्गरहितः

तुल्यनिन्दास्तुतिः -दूषणश्लघनयोः समानः

मौनी - मौनवान्

Downloaded from www.omkaravidya.com

सन्तुष्टः - तुष्टः
अनिकेतः - अनिवासः स्थिरमतिः - निश्चलचित्तः
भक्तिमान्  - भक्तः
प्रियः - इष्टः
नरः - मनुष्यः

अन्वयः
शत्रौ च मित्रे च तथा मानापमानयोः समः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः  तुल्यनिन्दास्तुतिः मौनी येन केनचित् सन्तुष्टः अनिकेतः स्थिरमतिः भक्तिमान् नरः मे  प्रियः ।

व्याकरणम्
▶ सन्धिः
तुल्यनिन्दास्तुतिः + मौनी - विसर्गरेफः
सन्तुष्टः + येन - विसर्गउकारः
स्थिरमतिः + भक्तिमान् - विसर्गरेफः
प्रियः + नरः - विसर्गउकारः

▶ समासः
निन्दा च स्तुतिः च - निन्दास्तुती - इतरेतरद्वन्द्वसमासः
ते तुल्ये यस्य सः - तुल्यनिनदास्तुतिः - समानाधिकरणबहुव्रीहिसमासः
न विद्यते निकेतः यस्य सः - अनिकेतः - नञ्बहुव्रीहिसमासः
स्थिरा मतिः यस्य सः - स्थिरमतिः - समानाधिकरणबहुव्रीहिसमासः

Downloaded from www.omkaravidya.com

मूलश्लोकः

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥१२.२०॥

पदच्छेदः
ये तु धर्म्यामृतम् इदं यथोक्तं पर्युपासते श्रद्दधानाः मत्परमाः भक्ताः ते अतीव मे प्रियाः

पदपरिचयः
धर्म्यामृतम् - अकार नपु द्वि एक
पर्युपासते - लट् पंरपु एक
श्रद्दधानाः - अकार पु प्र बहु
मत्परमाः - अकार पु प्र बहु
भक्ताः - अकार पु प्र बहु
अतीव - अव्ययम्
प्रियाः - अकार पु प्र बहु

पदार्थः
धर्म्यामृतम् -धर्म्यामृतम्
पर्युपासते - सेवन्ते
श्रद्दधानाः - विश्वासयुक्ताः
मत्परमाः - मन्निष्ठाः
भक्ताः - भक्तिमन्तः
अतीव - अत्यन्तम्
प्रियाः - इष्टाः

Downloaded from www.omkaravidya.com

अन्वयः
ये तु भक्ता: श्रद्दधाना: मत्परमा: यथोक्तं इदं धर्म्यामृतम् पर्युपासते ते मे अतीव प्रिया: ।

व्याकरणम्
▶ सन्धिः
श्रद्दधाना: + मत्परमा: - विसर्गलोप:
मत्परमा: + भक्ता: -विसर्गलोप:
भक्ता: + ते - विसर्गसकार:
ते + अतीव - पूर्वरूपसन्धि:

▶ समासः
धर्म्यम् एव अमृतम् - धर्म्यामृतम् - अवधारणापूर्वपदकर्मधारयसमास:
अहं परम: यस्य स: - मत्परम: - समानाधिकरणबहुव्रीहिसमास:

श्रीमद्भगवद्गीता - अथ द्वादशोऽध्याय: - भक्तियोग:

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोध्याय: ॥ १२ ॥

पदच्छेदः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे भक्तियोग: नाम द्वादश: अध्याय:

Downloaded from www.omkaravidya.com

पदपरिचयः

ॐ - अव् धातुः + मन् प्रत्ययः

तत् - दकार. नपु. पु एक

सत् - दकार. नपु. प्र एक

इति - अव्ययम्

श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु

उपनिषत्सु - दकार. स्त्री स बहु

ब्रह्मविद्यायां - आकार. स्त्री स एक

योगशास्त्रे - अकार. नपु. स. एक

श्रीकृष्णार्जुनसंवादे - अकार. पु. स. एक

भक्तियोगः- अकार. पु. प्र. एक

नाम - नकार.नपु. प्र एक

द्वादशः - अकार. पु. प्र एक

अध्यायः - अकार. पु. प्र एक

पदार्थः

ॐ - ओम्

तत् - तत्

सत् - सत्

इति - एवम्

श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु

उपनिषत्सु - उपनिषत्सु

ब्रह्मविद्यायां - ब्रह्म पाठे

योगशास्त्रे - योगशास्त्रे

श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयोः मध्ये संवादे

भक्तियोगः - भक्तियोगः

नाम - नाम

Downloaded from www.omkaravidya.com

द्वादशः - द्वादशः
अध्यायः - अध्यायः

अन्वयः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगः नाम द्वादशः अध्यायः (संपूर्णम् भवति) ।

व्याकरणम्
▶सन्धिः
श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः
योगः + नाम - विसर्ग उकारः
एकादशः + अध्यायः - विसर्ग उकारः पूर्वरूपसन्धिः
▶ समासः
ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारयः

Downloaded from www.omkaravidya.com